४१ आणाखंडणकारी, जइ वि तिकालं महाविभूईए ।
पूएइ वीयरायं, सव्वं पि निरत्थयं तस्स ॥२६॥

४२ रन्नो आणाभंगे, इक्कु च्चिय होइ निग्गहो लोए ।
सव्वन्नुआणभंगे, अणंतसो निग्गहो होइ ॥२७॥

४३ जह भोयणमविहिकयं, विणासए विहिकयं जियावेइ ।
तह अविहिकओ धम्मो, देइ भवं विहिकओ मुक्खं ॥२८॥

४७ जत्थ य अज्जालद्धं, पडिग्गहमाई य विविहमुवगरणं ।
पडिभुंजइ साहूहिं, तं गोयम ! केरिसं गच्छं ? ॥२९॥

४८ जहिं नत्थि सारणा वारणा य, पडिचोयणा य गच्छंमि ।
सो य अगच्छो गच्छो, संजमकामीहिं मुत्तव्वो ॥३०॥

५४ जत्थ य अज्जाहिं समं, थेरा वि न उल्लवंति गयदसणा ।
न य झायंतित्थीणं, अंगोवंगाइ तं गच्छं ॥३१॥

५५ वज्जेइ अप्पमत्तो, अज्जासंसग्गि अग्गिविससरिसिं ।
अज्जाणुचरो साहू, लहइ अकित्तिं खु अचिरेणं ॥३२॥

५६ जो देइ कणयकोडिं, अहवा कारेइ कणयजिणभवणं ।
तस्स न तत्तिय पुन्नं, जत्तिय बंभव्वए धरिए ॥३३॥

५७ सीलं कुलआहरणं, सीलं रूवं च उत्तमं होइ ।
सीलं चिय पंडित्तं, सीलं चिय निरुवमं धम्मं ॥३४॥

५८ वरं वाही वरं मच्चू, वरं दारिद्दसंगमो ।
वरं अरण्णवासो अ, मा कुमित्ताण संगमो ॥३५॥

५९ अगीयत्थकुसीलेहिं, संगं तिविहेण वोसिरे ।
मुक्खमग्गंमिमे विग्घं, पहंमि तेणगे जहा ॥३६॥

६० उम्मग्गदेसणाए, चरणं नासंति जिणवरिंदाणं ।
वावन्नदंसणा खलु, न हु लब्भा तारिसं दट्ठुं ॥३७॥

६१ परिवारपूअहेऊ, ओसन्नाणं च आणुवित्तीए ।
चरणकरणं निगूहई, तं दुल्लहबोहिअं जाण ॥३८॥

६२ अंबस्स य निंबस्स य, दुण्हंपि समागयाइं मूलाइं ।
संसग्गेण विणट्ठो, अंबो निंबत्तणं पत्तो ॥३९॥

६३ पक्कणकुले वसंतो, सउणीपारो वि गरहिओ होई ।
इय दंसणा सुविहिआ, मज्झि वसंता कुसीलाणं ॥४०॥

९८ असुइट्ठाणे पडिआ, चंपकमाला न कीरइ सीसे ।
पासत्थाइठाणेसु, वट्टमाणो तह अपूज्जो ॥४१॥

६४ उत्तमजणसंसग्गी, सीलदरिद्दं पि कुणई सीलड्ढं ।
जह मेरुगिरिविलग्गं, तणं पि कणगत्तणमुवेई ॥४२॥

૬૭ जयणा य धम्मजणणी, जयणा धम्मस्स पालणी चेव ।
तव्वुड्ढिकरी जयणा, एगंतसुहावहा जयणा ॥४३॥

૬૮ जं अज्जिअं चरित्तं, देसूणाए वि पुव्वकोडीए ।
तं पि हु कसायमित्तो, हारेइ नरो मुहुत्तेणं ॥४४॥

૬૯ कोहो पीइं पणासेई, माणो विणयनासणो ।
माया मित्ताणि नासेइ, लोहो सव्वविणासणो ॥४५॥

૭૦ खंती सुहाण मूलं, मूलं धम्मस्स उत्तमा खंती ।
हरइ महाविज्जा इव, खंती दुरियाइं सव्वाइं ॥४६॥

૭૧ सयं गेहं परिचज्ज, परगेहं च वावडे ।
निमित्तेण य ववहरई, पावसमणु त्ति वुच्चई ॥४७॥

૭૨ दुद्धदहीविगईओ, आहारेई अभिक्खणं ।
न करेई तवोकम्मं, पावसमणु त्ति वुच्चई ॥४८॥

૭૪ जइ चउदसपुव्वधरो, वसइ निगोएसुऽणंतयं कालं ।
निद्दापमायवसओ, ता होहिसि कह तुमं जीव !? ॥४९॥

૭૫ हयं नाणं कियाहीणं, हया अन्नाणओ किया ।
पासंतो पंगुलो दड्ढो, धावमाणो अ अंधओ ॥५०॥

૭૬ संजोगसिद्धीइ फलं वयंति, न हु एगचक्केण रहो पयाई ।
अंधो य पंगू य वणे समिच्चा, ते संपउत्ता नगरं पविट्ठा ॥५१॥

૭૭ सुबहुं पि सुअमहीअं, किं काही चरणविप्पहीणस्स ? ।
अंधस्स जह पलित्ता, दीवसयसहस्सकोडीओ ॥५२॥

૭૮ अप्पं पि सुअमहीअं, पयासगं होई चरणजुत्तस्स ।
इक्को वि जह पईवो, सचक्खुअस्स पयासेई ॥५३॥

८१ जहा खरो चंदणभारवाही, भारस्स भागी न हु चंदणस्स ।
एवं खु नाणी चरणेण हीणो, भारस्स भागी न हु सुग्गईए ॥५४॥

९० आजम्मं जं पावं, बंधइ मिच्छत्तसंजुओ कोई ।
वयभंगं काउमणो, बंधइ तं चेव अट्ठगुणं ॥५५॥

९१ सयसहस्साण नारीणं, पिट्टं फाडेइ निग्घिणो ।
सत्तट्ठमासिए गब्भे, तप्फडंते निकंतइ ॥५६॥

९२ तं तस्स जत्तियं पावं, तं नवगुणियमेलियं हुज्जा ।
एगित्थियजोगेणं, साहू बंधिज्ज मेहूणाओ ॥५७॥

९३ अक्खंडियचारित्तो, वयधारी जो व होइ गिहत्थो ।
तस्स सगासे दंसण-वयगहणं सोहिकारणं च ॥५८॥

९९ छट्ठट्ठमदसमदुवालसेहिं, मासद्धमासखमणेहिं ।
इत्तो उ अणेगगुणा, सोही जिमियस्स नाणिस्स ॥५९॥

१०० जं अन्नाणी कम्मं, खवेइ बहुआहि वासकोडीहिं ।
तन्नाणी तिहिं गुत्तो, खवेइ उस्सासमित्तेणं ॥६०॥

१०१ जिणपवयणवुड्डिकरं, पभावगं नाणदंसणगुणाणं ।
रक्खंतो जिणदव्वं, तित्थयरत्तं लहइ जीवो ॥६१॥

१०२ जिणपवयणवुड्डिकरं, पभावगं नाणदंसणगुणाणं ।
भक्खंतो जिणदव्वं, अणंतसंसारिओ होई ॥६२॥

१०३ भक्खेइ जो उवेक्खेइ, जिणदव्वं तु सावओ ।
पन्नाहीणो भवे जीवो, लिप्पइ पावकम्मुणा ॥६३॥

१०४ चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे ।
संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥६४॥

१०६ तित्थयरत्तं सम्मत्त-खाइयं सत्तमीए तईयाए ।
साहूण वंदणेणं, बद्धं च दसारसीहेणं ॥६५॥

१०८ अणथोवं वणथोवं, अग्गीथोवं च कसायथोवं च ।
न हु भे विससिअव्वं, थोवं पि हु तं बहु होई ॥६६॥

११८ सव्वो पुव्वकयाणं, कम्माणं पावए फलविवागं ।
अवराहेसु गुणेसु अ, निमित्तमित्तं परो होइ ॥६७॥

१२४ धन्नाणं विहिजोगो, विहिपक्खाराहगा सया धन्ना ।
विहिबहुमाणा धन्ना, विहिपक्खअदूसगा धन्ना ॥६८॥

~~ पञ्चसूत्र-प्रथम-पापप्रतिघात-गुणबीजाधानसूत्रम् ~~

णमो वीयरागाणं सव्वण्णूणं देविंदपूइयाणं जहट्ठियवत्थुवाईणं तेलोक्कगुरुणं अरुहंताणं भगवंताणं ।

जे एवमाइक्खंति - इह खलु अणाइ जीवे, अणाइ जीवस्स भवे, अणाइ कम्मसंजोगणिव्वत्तिए, दुक्खरूवे, दुक्खफले, दुक्खाणुबंधे ।

एयस्स णं वोच्छित्ती सुद्धधम्माओ, सुद्धधम्मसंपत्ती पावकम्मविगमाओ, पावकम्मविगमो तहाभव्वत्ताइभावाओ ।

तस्स पुण विवागसाहणाणि - चउसरणगमणं, दुक्कडगरिहा, सुकडाण सेवणं । अओ कायव्वमिणं होउकामेणं सया सुप्पणिहाणं, भुज्जो भुज्जो संकिलेसे, तिकालमसंकिलेसे ॥

जावज्जीवं मे भगवंतो परमतिलोगणाहा, अणुत्तरपुण्णसंभारा, खीणरागदोसमोहा अचिंतचिंतामणी भवजलहिपोया, एगंतसरण्णा अरहंता सरणं ।

तहा पहीणजरमरणा, अवेयकम्मकलंका, पणट्ठवाबाहा, केवलनाणदंसणा, सिद्धिपुरनिवासी, णिरुवमसुहसंगया, सव्वहा कयकिच्चा सिद्धा सरणं ।

तहा पसंतगंभीरासया, सावज्जजोगविरया, पंचविहायार-जाणगा, परोवयारनिरया, पउमाइणिदंसणा, झाणज्झयणसंगया, विसुज्झमाणभावा साहू सरणं ।

तहा सुरासुरमणुयपूइओ, मोहतिमिरंसुमाली, रागद्दोसविस-परममंतो, हेऊ सयलकल्लाणाणं, कम्मवणविहावसू, साहगो सिद्ध-भावस्स केवलिपण्णत्तो धम्मो जावज्जीवं मे भगवं सरणं ।

सरणमुवगओ य एएसिं, गरिहामि दुक्कडं - जण्णं अरिहंतेसु वा, सिद्धेसु वा, आयरिएसु वा, उवज्झाएसु वा, साहूसु वा, साहुणीसु वा, अन्नेसु वा धम्मट्ठाणेसु, माणणिज्जेसु, पूयणिज्जेसु, तहा माईसु वा, पिईसु वा, बंधूसु वा, मित्तेसु वा, उवयारीसु वा, ओहेण वा जीवेसु, मग्गट्ठिएसु, अमग्गट्ठिएसु, मग्गसाहणेसु, अमग्गसाहणेसु, जं किंचि वितहमायरियं, अणायरियव्वं, अणिच्छियव्वं पावं पावाणुबंधि, सुहुमं वा, बायरं वा, मणेणं वा, वायाए वा, काएणं वा, कयं वा, काराविय़ं वा, अणुमोइयं वा, रागेण वा, दोसेण वा, मोहेण वा, इत्थ वा जम्मे, जम्मंतरेसु वा, गरहियमेयं, दुक्कडमेयं, उज्झियव्वमेयं, वियाणिअं मए कल्लाणमित्तगुरुभयवंतवयणाओ, एवमेयं ति रोइयं सद्धाए, अरिहंतसिद्धसमक्खं गरहामि अहमिणं दुक्कडमेयं उज्झि-अव्वमेयं । इत्थ मिच्छा मि दुक्कडं, मिच्छा मि दुक्कडं, मिच्छा मि दुक्कडं ।

होउ मे एसा सम्मं गरहा । होउ मे अकरणनियमो । बहुमयं ममेयं ति । इच्छामो अणुसट्ठिं अरहंताणं भगवंताणं, गुरुणं कल्लाण-मित्ताणं ति ।

होउ मे एएहिं संजोगो, होउ मे एसा सुपत्थणा, होउ मे एत्थ बहुमाणो, होउ मे इओ मोक्खबीयं ।

पत्तेसु एएसु अहं सेवारिहे सिया, आणारिहे सिया, पडिवत्ति-जुत्ते सिया, निरइयारपारगे सिया ।

संविग्गो जहासत्तीए सेवेमि सुकडं । अणुमोएमि सव्वेसिं अरहंताणं अणुट्ठाणं, सव्वेसिं सिद्धाणं सिद्धभावं, सव्वेसिं आयरियाणं आयारं, सव्वेसिं उवज्झायाणं सुत्तप्पयाणं, सव्वेसिं साहूणं साहुकिरियं, सव्वेसिं सावगाणं मोक्खसाहणजोगे, सव्वेसिं देवाणं, सव्वेसिं जीवाणं होउकामाणं कल्लाणासयाणं मग्गसाहणजोगे ।

होउ मे एसा अणुमोयणा सम्मं विहिपुव्विआ, सम्मं सुद्धा-सया, सम्मं पडिवत्तिरूवा, सम्मं निरईयारा परमगुणजुत्तअरहंताइ-सामत्थओ ।

अचिंतसत्तिजुत्ता हि ते भगवंतो वीयरागा, सव्वण्णू, परम-कल्लाणा, परमकल्लाणहेउ सत्ताणं ।

मूढे अम्हि पावे अणाइमोहवासिए, अणभिण्णे भावओ, हियाहियाणं अभिण्णे सिया, अहिअनिवित्ते सिया, हियपवित्ते सिया, आराहगे सिया, उचियपडिवत्तिए सव्वसत्ताणं सहियंति ।

इच्छामि सुकडं, इच्छामि सुकडं, इच्छामि सुकडं ।

एवमेयं सम्मं पढमाणस्स सुणमाणस्स अणुप्पेहमाणस्स सिढिलीभवंति परिहायंति खिज्जंति असुहकम्माणुबंधा, निरणुबंधे वा

असुहकम्मे भग्गसामत्थे सुहपरिणामेणं कडगबद्धे विअ विसे अप्प-फले सिया, सुहावणिज्जे सिया, अपुणभावे सिया ।

तहा आसगलिज्जंति परिपोसिज्जंति निम्मविज्जंति सुहकम्मा-णुबंधा, साणुबंधं च सुहकम्मं पगिट्ठं पगिट्ठभावज्जियं नियमफलयं, सुपउत्ते विव महागए सुहफले सिया, सुहपवत्तगे सिया परमसुहसाहगे सिया ।

अओ अप्पडिबंधमेयं असुहभावनिरोहेणं सुहभावबीयं ति सुप्पणिहाणं सम्मं पढियव्वं सम्मं सोयव्वं सम्मं अणुपेहियव्वंति ।

नमो नमियनमियाणं परमगुरुवीयरागाणं । नमो सेसनमुक्कारा-रिहाणं । जयउ सव्वण्णुसासणं । परमसंबोहीए सुहिणो भवंतु जीवा, सुहिणो भवंतु जीवा, सुहिणो भवंतु जीवा ।

इइ पावपडिग्घायगुणबीजाहाणसुत्तं समत्तं ।

## શાંતસુધારસ સૂક્ત - રત્ન - મંજૂષા

## उपाध्यायविनयविजयकृत: शान्तसुधारस:

### ~~~ अनित्यभावना ~~~

१०　आयुर्वायुतरत्तरङ्गतरलं लग्नापदः सम्पदः,
सर्वेऽपीन्द्रियगोचराश्च चटुलाः सन्ध्याऽभ्ररागादिवत् ।
मित्रस्त्रीस्वजनादिसङ्गमसुखं स्वप्नेन्द्रजालोपमं,
तत् किं वस्तु भवे भवेदिह मुदां आलम्बनं यत् सताम् ? ॥१॥

११　प्रातर्भ्रातरिहावदातरुचयो ये चेतनाचेतना,
दृष्टा विश्वमनःप्रमोदविदुरा भावाः स्वतः सुन्दराः ।
तांस्तत्रैव दिने विपाकविरसान् हा ! नश्यतः पश्यतः,
चेतः प्रेतहतं जहाति न भवप्रेमानुबन्धं मम ॥२॥

१/१　मूढ ! मुह्यसि मुधा, मूढ ! मुह्यसि मुधा,
विभवमनुचिन्त्य हृदि सपरिवारम् ।
कुशशिरसि नीरमिव गलदनिलकम्पितं,
विनय ! जानीहि जीवितमसारम् ॥३॥

१/५　सुखमनुत्तरसुरावधि यदतिमेदुरं,
कालतस्तदपि कलयति विरामम् ।
कतरदितरत् तदा वस्तु सांसारिकं,
स्थिरतरं भवति ? चिन्तय निकामम् ॥४॥

१/६　यैः समं क्रीडिता ये च भृशमीडिताः,
यैः सहाकृष्महि प्रीतिवादम् ।
तान् जनान् वीक्ष्य बत भस्मभूयङ्गतान्,
निर्विशङ्काः स्म इति धिक् प्रमादम् ! ॥५॥

१/८ कवलयन्नविरतं जङ्गमाजङ्गमं,
जगदहो ! नैव तृप्यति कृतान्तः ।
मुखगतान् खादतस्तस्य करतलगतैः,
न कथमुपलप्स्यतेऽस्माभिरन्तः ? ॥६॥

१/७ नित्यमेकं चिदानन्दमयमात्मनो,
रूपमभिरूप्य सुखमनुभवेयम् ।
प्रशमरसनवसुधापानविनयोत्सवो,
भवतु सततं सतामिह भवेऽयम् ॥७॥

~~ अशरणभावना ~~

१ ये षट्खण्डमहीमहीनतरसा निर्जित्य बभ्राजिरे,
ये च स्वर्गभुजो भुजोर्जितमदा मेदुर्मुदा मेदुराः ।
तेऽपि क्रूरकृतान्तवक्त्ररदनैर्निर्दल्यमाना हठाद्,
अत्राणाः शरणाय हा ! दश दिशः प्रेक्षन्त दीनाननाः ॥८॥

२ तावदेव मदविभ्रममाली, तावदेव गुणगौरवशाली ।
यावदक्षमकृतान्तकटाक्षैः, नेक्षितो विशरणो नरकीटः ॥९॥

२/१ स्वजनजनो बहुधा हितकामं, प्रीतिरसैरभिरामम् ।
मरणदशावशमुपगतवन्तं, रक्षति कोऽपि न सन्तम् ॥

विनय ! विधीयतां रे, श्रीजिनधर्मः शरणम् ।
अनुसन्धीयतां रे, शुचितरचरणस्मरणम् ॥१०॥

२/४ विद्यामन्त्रमहौषधिसेवां, सृजतु वशीकृतदेवाम् ।
रसतु रसायनमुपचयकरणं, तदपि न मुञ्चति मरणम् ॥११॥

२/६ सृजतीमसितशिरोरुहललितं, मनुजशिरः सितपलितम् ।
को विदधानां भूघनमरसं, प्रभवति रोद्धुं जरसम् ?॥१२॥

२/७ उद्यत उग्ररुजा जनकायः, कः स्यात्तत्र सहायः ? ।
एकोऽनुभवति विधुरुपरागं, विभजति कोऽपि न भागम् ॥१३॥

२/८ शरणमेकमनुसर चतुरङ्गं, परिहर ममतासङ्गम् ।
विनय ! रचय शिवसौख्यनिधानं, शान्तसुधारपानम् ॥१४॥

~~ संसारभावना ~~

१ इतो लोभः क्षोभं जनयति दुरन्तो दव इवो-
ल्लसल्लाभाम्भोभिः कथमपि न शक्यः शमयितुम् ।
इतस्तृष्णाऽक्षाणां तुदति मृगतृष्णेव विफला,
कथं स्वस्थैः स्थेयं विविधभयभीमे भववने ? ॥१५॥

३ सहित्वा सन्तापानशुचिजननीकुक्षिकुहरे,
ततो जन्म प्राप्य प्रचुरतरकष्टक्रमहतः ।
सुखाभासैर्यावत् स्पृशति कथमप्यर्तिविरतिं,
जरा तावत्कायं कवलयति मृत्योः सहचरी ॥१६॥

३/१ कलय संसारमतिदारुणं, जन्ममरणादिभयभीत ! रे ।
मोहरिपुणेह सगलग्रहं, प्रतिपदं विपदमुपनीत ! रे ॥१७॥

३/२ घटयसि क्वचन मदमुन्नतेः, क्वचिदहो ! हीनतादीन रे ।
प्रतिभवं रूपमपरापरं, वहसि बत कर्मणाऽऽधीन ! रे ॥१८॥

३/५ व्रजति तनयोऽपि ननु जनकतां, तनयतां व्रजति पुनरेष रे ।
भावयन् विकृतिमिति भवगतेः, त्यजतमां नृभवशुभशेष रे ॥१९॥

३/७ दर्शयन् किमपि सुखवैभवं, संहरंस्तदथ सहसैव रे ।
विप्रलम्भयति शिशुमिव जनं, कालबटुकोऽयमत्रैव रे ॥२०॥

३/८ सकलसंसारभयभेदकं, जिनवचो मनसि निबधान रे ।
विनय ! परिणमय निःश्रेयसं, विहितशमरससुधापान रे ॥२१॥

~~ एकत्वभावना ~~

३ कृतिनां दयितेति चिन्तनं, परदारेषु यथा विपत्तये ।
विविधार्तिभयावहं तथा, परभावेषु ममत्वभावनम् ॥२२॥

५ एकतां समतोपेताम्, एनामात्मन् ! विभावय ।
लभस्व परमान्द-सम्पदं नमिराजवत् ॥२३॥

४/१ विनय ! चिन्तय वस्तुतत्त्वं, जगति निजमिह कस्य किम् ? ।
भवति मतिरिति यस्य हृदये, दुरितमुदयति तस्य किम् ? ॥२४॥

४/२ एक उत्पद्यते तनुमान्, एक एव विपद्यते ।
एक एव हि कर्म चिनुते, सैककः फलमश्नुते ॥२५॥

४/३ यस्य यावान् परपरिग्रहः, विविधममतावीवधः ।
जलधिविनिहितपोतयुक्त्या, पतति तावदसावधः ॥२६॥

४/४ स्वस्वभावं मद्यमुदितो, भुवि विलुप्य विचेष्टते ।
दृश्यतां परभावघटनात्, पतति विलुठति जृम्भते ॥२७॥

४/८ रुचिरसमताऽमृतरसं क्षणम्, उदितमास्वादय मुदा ।
विनय ! विषयातीतसुखरस-रतिरुदञ्चतु ते सदा ॥२८॥

~~ अन्यत्वभावना ~~

३ यस्मै त्वं यतसे बिभेषि च यतो यत्रानिशं मोदसे,
यद्यच्छोचसि यद्यदिच्छसि हृदा यत्प्राप्य पेप्रीयसे ।
स्निग्धो येषु निजस्वभावममलं निर्लोठ्य लालप्यसे,
तत्सर्वं परकीयमेव भगवन् ! आत्मन्न किञ्चित्तव ॥२९॥

४ दुष्टाः कष्टकदर्थना कति न ताः सोढास्त्वया संसृतौ ?,
तिर्यङ्नारकयोनिषु प्रतिहतश्छिन्नो विभिन्नो मुहुः ।
सर्वं तत्परकीयदुर्विलसितं विस्मृत्य तेष्वेव हा !,
रज्यन् मुह्यसि मूढ ! तानुपरचन्, आत्मन्न किं लज्जसे ? ॥३०॥

५/२ येन सहाश्रयसेऽतिविमोहाद्, इदमहमित्यविभेदम् ।
तदपि शरीरं नियतमधीरं, त्यजति भवन्तं धृतखेदम् ॥३१॥

५/३ जन्मनि जन्मनि विविधपरिग्रहम्, उपचिनुषे च कुटुम्बम् ।
तेषु भवन्तं परभवगमने, नानुसरति कृशमपि शुम्बम् ॥३२॥

५/५ पथि पथि विविधपथैः पथिकैः सह, कुरुते कः प्रतिबन्धम् ? ।
निजनिजकर्मवशैः स्वजनैः सह, किं कुरुषे ममताबन्धम् ? ॥३३॥

५/६ प्रणयविहीने दधदभिष्वङ्गं, सहते बहुसन्तापम् ।
त्वयि निःप्रणये पुद्गलनिचये, वहसि मुधा ममतातापम् ॥३४॥

५/८ भज जिनपतिमसहायसहायं, शिवगतिसुगमोपायम् ।
पिब गदशमनं परिहृतवमनं, शान्तसुधारसमनपायम् ॥३५॥

~~ अशुचिभावना ~~

३ कर्पूरादिभिरर्चितोऽपि लशुनो नो गाहते सौरभं,
नाजन्मोपकृतोऽपि हन्त ! पिशुनः सौजन्यमालम्बते ।
देहोऽप्येष तथा जहाति न नृणां स्वाभाविकीं विस्रतां,
नाभ्यक्तोऽपि विभूषितोऽपि बहुधा पुष्टोऽपि विश्वस्यते ॥३६॥

४ यदीयसंसर्गमवाप्य सद्यो, भवेच्छुचीनामशुचित्वमुच्चैः ।
अमेध्ययोनेः वपुषोऽस्य शौचसंकल्पमोहोऽयमहो ! महीयान् ॥३७॥

६/२ भजति सचन्द्रं शुचिताम्बूलं, कर्तुं मुखमारुतमनुकूलम् ।
तिष्ठति सुरभि कियन्तं कालं, मुखमसुगन्धि जुगुप्सितलालम् ॥३८॥

६/३ द्वादश नव रन्ध्राणि निकामं, गलदशुचीनि न यान्ति विरामम् ।
यत्र वपुषि तत् कलयसि पूतं, मन्ये तव नूतनमाकूतम् ॥३९॥

६/५ अशितमुपस्करसंस्कृतमन्नं, जगति जुगुप्सां जनयति हन्नम् ।
पुंसवनं धैनवमपि लीढं, भवति विगर्हितमति जनमीढम् ॥४०॥

६/७ केवलमलमयपुद्गलनिचये, अशुचीकृतशुचिभोजनसिचये ।
वपुषि विचिन्तय परमिह सारं, शिवसाधनसामर्थ्यमुदारम् ॥४१॥

६/८ येन विराजितमिदमतिपुण्यं, तच्चिन्तय चेतन ! नैपुण्यम् ।
विशदागममधिगम्य निपानं, विरचय शान्तसुधारसपानम् ॥४२॥

## ~~ आश्रवभावना ~~

३ मिथ्यात्वाविरतिकषाययोगसञ्ज्ञाः,
चत्वारः सुकृतिभिराश्रवाः प्रदिष्टाः ।
कर्माणि प्रतिसमयं स्फुटैरमीभिः,
बध्नन्तो भ्रमवशतो भ्रमन्ति जीवाः ॥४३॥

४ इन्द्रियाव्रतकषाययोगजाः, पञ्च पञ्च चतुरन्वितास्त्रयः ।
पञ्चविंशतिरसत्क्रिया इति, नेत्रवेदपरिसंख्ययाऽप्यमी ॥४४॥

७/३ अविरतचित्ता रे, विषयवशीकृता, विषहन्ते विततानि ।
इहपरलोके रे, कर्मविपाकजान्यविरलदुःखशतानि ॥४५॥

७/४ करिझषमधुपा रे, शलभमृगादयो, विषयविनोदरसेन ।
हन्त लभन्ते रे, विविधा वेदना, बत परिणतिविरसेन ॥४६॥

७/५ उदितकषाया रे, विषयवशीकृता, यान्ति महानरकेषु ।
परिवर्तन्ते रे, नियतमनन्तशो, जन्मजरामरणेषु ॥४७॥

७/६ मनसा वाचा रे, वपुषा चञ्चला, दुर्जयदुरितभरेण ।
उपलिप्यन्ते रे, तत आश्रवजये, यततां कृतमपरेण ॥४८॥

७/८ मोदस्वैवं रे, साश्रवपाप्मनां, रोधे धियमाधाय ।
शान्तसुधारसपानमनारतं, विनय ! विधाय विधाय ॥४९॥

~~~ संवरभावना ~~~

२ संयमेन विषयाविरतत्वे, दर्शनेन वितथाभिनिवेशम् ।
ध्यानमार्त्तमथ रौद्रमजस्त्रं, चेतसः स्थिरतया च निरुन्ध्याः ॥५०॥

३ क्रोधं क्षान्त्या मार्दवेनाभिमानं, हन्या मायामार्जवेनोज्ज्वलेन ।
लोभं वारां राशिरौद्रं निरुन्ध्याः, संतोषेण प्रांशुना सेतुनेव ॥५१॥

८/१ शृणु शिवसुखसाधनसदुपायं, शृणु शिवसुखसाधनसदुपायम् ।
ज्ञानादिकपावनरत्नत्रयपरमाराधनमनपायम् ॥५२॥

८/२ विषयविकारमपाकुरु दूरं, क्रोधं मानं सहमायम् ।
लोभं रिपुं च विजित्य सहेलं, भज संयमगुणमकषायम् ॥५३॥

८/६ ब्रह्मव्रतमङ्गीकुरु विमलं, बिभ्राणं गुणसमवायम् ।
उदितं गुरुवदनादुपदेशं, संगृहाण शुचिमिव रायम् ॥५४॥

८/७ संयमवाङ्मयकुसुमरसैरति-सुरभय निजमध्यवसायम् ।
चेतनमुपलक्षय कृतलक्षण-ज्ञानचरणगुणपर्यायम् ॥५५॥

८/८ वदनमलङ्कुरु पावनरसनं, जिनचरितं गायं गायम् ।
सविनय ! शान्तसुधारसमेनं, चिरं नन्द पायं पायम् ॥५६॥
~~~

~~~ निर्जराभावना ~~~

४ निकाचितानामपि कर्मणां यद्, गरीयसां भूधरदुर्धराणाम् ।
विभेदने वज्रमिवातितीव्रं, नमोऽस्तु तस्मै तपसेऽद्भुताय ॥५७॥

५ किमुच्यते सत्तपसः प्रभावः ?, कठोरकर्मार्जितकिल्बिषोऽपि ।
दृढप्रहारीव निहत्य पापं, यतोऽपवर्गं लभतेऽचिरेण ॥५८॥

९/१ विभावय विनय ! तपोमहिमानं, विभावय विनय ! तपोमहिमानं ।
बहुभवसञ्चितदुष्कृतममुना, लभते लघु लघिमानम् ॥५९॥

९/२ याति घनाऽपि घनाघनपटली, खरपवनेन विरामम् ।
भजति तथा तपसा दुरिताली, क्षणभङ्गुरपरिणामम् ॥६०॥

९/३ वाञ्छितमाकर्षति दूरादपि, रिपुमपि व्रजति वयस्यम् ।
तप इदमाश्रय निर्मलभावाद्, आगमपरमरहस्यम् ॥६१॥

९/६ शमयति तापं गमयति पापं, रमयति मानसहंसम् ।
हरति विमोहं दूरारोहं, तप इति विगताशंसम् ॥६२॥

९/८ कर्मगदौषधमिदमिदमस्य च, जिनपतिमतमनुपानम् ।
विनय ! समाचर सौख्यनिधानं, शान्तसुधारसपानम् ॥६३॥

~~~ धर्मस्वाख्यातभावना ~~~

६ त्रैलोक्यं सचराचरं विजयते यस्य प्रसादादिदं,
योऽत्रामुत्र हितावहस्तनुभृतां सर्वार्थसिद्धिप्रदः ।
येनानर्थकदर्थना निजमहःसामर्थ्यतो व्यर्थिता,
तस्मै कारुणिकाय धर्मविभवे भक्तिप्रणामोऽस्तु मे ॥६४॥

७ प्राज्यं राज्यं सुभगदयिता नन्दना नन्दनानां,
रम्यं रूपं सरसकविताचातुरी सुस्वरत्वम् ।
नीरोगत्वं गुणपरिचयः सज्जनत्वं सुबुद्धिः,
किं नु ब्रूमः फलपरिणतिं धर्मकल्पद्रुमस्य ? ॥६५॥

१०/२ पालय पालय मां जिनधर्म !
सिञ्चति पयसा जलधरपटली, भूतलममृतमयेन ।
सूर्याचन्द्रमसावुदयेते, तव महिमाऽतिशयेन ॥६६॥

१०/३ निरालम्बमियमसदाधारा, तिष्ठति वसुधा येन ।
तं विश्वस्थितिमूलस्तम्भं, त्वां सेवे विनयेन ॥६७॥

१०/४ बन्धुरबन्धुजनस्य दिवानिशम्, असहायस्य सहायः ।
भ्राम्यति भीमे भवगहनेऽङ्गी, त्वां बान्धवमपहाय ॥६८॥

१०/७ द्रङ्गति गहनं जलति कृशानुः, स्थलति जलधिरचिरेण ।
तव कृपयाऽखिलकामितसिद्धिः, बहुना किं नु परेण ? ॥६९॥

१०/८ सर्वतन्त्रनवनीत ! सनातन !, सिद्धिसदनसोपान ! ।
जय जय विनयवतां प्रतिलम्भितशान्तसुधारसपान ! ॥७०॥

~~ लोकस्वरूपभावना ~~

४ यो वैशाखस्थानकस्थायिपादः,
श्रोणीदेशे न्यस्तहस्तद्वयश्च ।
कालेऽनादौ शश्वदूर्ध्वंदमत्वाद्,
बिभ्राणोऽपि श्रान्तमुद्रामखिन्नः ॥७१॥

५ सोऽयं ज्ञेयः पुरुषो लोकनामा,
षड्द्रव्यात्माऽकृत्रिमोऽनाद्यनन्तः ।
धर्माधर्माकाशकालात्मसञ्ज्ञैः,
द्रव्यैः पूर्णः सर्वतः पुद्गलैश्च ॥७२॥

११/४ विनय ! विभावय शाश्वतं हृदि लोकाकाशम् ।
एकरूपमपि पुद्गलैः, कृतविविधविवर्तम् ।
काञ्चनशैलशिखरोन्नतं, क्वचिदवनतगर्तम् ॥७३॥

११/५ क्वचन तविषमणिमन्दिरैः, उदितोदितरूपम् ।
घोरतिमिरनरकादिभिः, क्वचनातिविरूपम् ॥७४॥

११/६ क्वचिदुत्सवमयमुज्ज्वलं, जयमङ्गलनादम् ।
क्वचिदमन्दहाहारवं, पृथुशोकविषादम् ॥७५॥

११/७ बहुपरिचितमनन्तशो, निखिलैरपि सत्त्वैः ।
जन्ममरणपरिवर्तिभिः, कृतमुक्तममत्वैः ॥७६॥

११/६ इह पर्यटनपराङ्मुखाः, प्रणमत भगवन्तम् ।
शान्तसुधारसपानतो, धृतविनयमवन्तम् ॥७७॥

## ~~ बोधिदुर्लभभावना ~~

१ यस्माद्विस्मापयितसुमनःस्वर्गसंपद्विलास-
प्राप्तोल्लासाः पुनरपि जनिः सत्कुले भूरिभोगे ।
ब्रह्माद्वैतप्रगुणपदवीप्रापकं निःसपत्नं,
तद्दुष्प्रापं भृशमुरुधियः ! सेव्यतां बोधिरत्नम् ॥७८॥

६ यावद्देहमिदं गदैर्न मृदितं नो वा जराजर्जरम्,
यावत्त्वक्षकदम्बकं स्वविषयज्ञानावगाहक्षमम् ।
यावच्चायुरभङ्गुरं निजहिते तावद्बुधैः यत्यतां,
कासारे स्फुटिते जले प्रचलिते पालिः कथं बध्यते ? ॥७९॥

१२/२ चक्रिभोज्यादिरिव नरभवो दुर्लभो, भ्राम्यतां घोरसंसारकक्षे ।
बहुनिगोदादिकायस्थितिव्यायते, मोहमिथ्यात्वमुखचोरलक्षे ॥८०॥

१२/३ लब्ध इह नरभवोऽनार्यदेशेषु यः, स भवति प्रत्युतानर्थकारी ।
जीवहिंसादिपापाश्रवव्यसनिनां, माघवत्यादिमार्गानुसारी ॥८१॥

१२/४ आर्यदेशस्पृशामपि सुकुलजन्मनां, दुर्लभा विविदिषा धर्मतत्त्वे ।
रतपरिग्रहभयाहारसञ्ज्ञार्तिभिः, हन्त ! मग्नं जगद्दुःस्थितत्वे ॥८२॥

१२/५ विविदिषायामपि श्रवणमतिदुर्लभं,
धर्मशास्त्रस्य गुरुसन्निधाने ।
वितथविकथादितत्तद्रसावेशतो,
विविधविक्षेपमलिनेऽवधाने ॥८३॥

१२/८ एवमतिदुर्लभात् प्राप्य दुर्लभतमं, बोधिरत्नं सकलगुणनिधानम् ।
कुरु गुरुप्राज्यविनयप्रसादोदितं, शान्तरससरसपीयूषपानम् ॥८४॥

## ~~ मैत्रीभावना ~~

४ सर्वत्र मैत्रीमुपकल्पयात्मन् !,
चिन्त्यो जगत्यत्र न कोऽपि शत्रुः ।
कियद्दिनस्थायिनि जीवितेऽस्मिन्,
किं खिद्यते वैरिधिया परस्मिन् ? ॥८५॥

८ या रागरोषादिरुजो जनानां, शाम्यन्तु वाक्कायमनोद्रुहस्ताः ।
सर्वेऽप्युदासीनरसं रसन्तु, सर्वत्र सर्वे सुखिनो भवन्तु ॥८६॥

१३/२ विनय ! विचिन्तय मित्रतां ।
सर्वे ते प्रियबान्धवा, न हि रिपुरिह कोऽपि ।
मा कुरु कलिकलुषं मनो, निजसुकृतविलोपि ॥८७॥

१३/३ यदि कोपं कुरुते परो, निजकर्मवशेन ।
अपि भवता किं भूयते, हृदि रोषवशेन ? ॥८८॥

१३/४ अनुचितमिह कलहं सतां, त्यज समरसमीन ! ।
भज विवेककलहंसतां, गुणपरिचयपीन ! ॥८९॥

१३/६ सकृदपि यदि समतालवं, हृदयेन लिहन्ति ।
विदितरसास्तत इह रतिं, स्वत एव वहन्ति ॥९०॥

१३/८ परमात्मनि विमलात्मनां, परिणम्य वसन्तु ।
विनय ! समामृतपानतो, जनता विलसन्तु ॥९१॥

~~ प्रमोदभावना ~~

६ जिह्वे ! प्रह्वीभव त्वं सुकृतिसुचरितोच्चारणे सुप्रसन्ना,
भूयास्तामन्यकीर्त्तिश्रुतिरसिकतया मेऽद्य कर्णौ सुकर्णौ ।
वीक्ष्यान्यप्रौढलक्ष्मीं द्रुतमुपचिनुतं लोचने रोचनत्वं,
संसारेऽस्मिन्नसारे फलमिति भवतां जन्मनो मुख्यमेव ॥९२॥

७ प्रमोदमासाद्य गुणैः परेषां, येषां मतिर्मज्जति साम्यसिन्धौ ।
देदीप्यते तेषु मनःप्रसादो, गुणास्तथैते विशदीभवन्ति ॥९३॥

१४/३ येषां मन इह विगतविकारं, ये विदधति भुवि जगदुपकारं ।
तेषां वयमुचिताचरितानां, नाम जपामो वारंवारम् ॥९४॥

१४/५ अदधुः केचन शीलमुदारं,
गृहिणोऽपि परिहृतपरदारम् ।
यश इह सम्प्रत्यपि शुचि तेषां,
विलसति फलिताफलसहकारम् ॥९५॥

१४/६ या वनिता अपि यशसा साकं,
कुलयुगलं विदधति सुपताकम् ।
तासां सुचरितसञ्चितराकं,
दर्शनमपि कृतसुकृतविपाकम् ॥९६॥

१४/७ तात्त्विकसात्त्विकसुजनवतंसाः,
केचन युक्तिविवेचनहंसाः ।
अलमकृषत किल भुवनाभोगं,
स्मरणममीषां कृतशुभयोगम् ॥९७॥

१४/८ इति परगुणपरिभावनसारं,
सफलय सततं निजमवतारम् ।
कुरु सुविहितगुणनिधिगुणगानं,
विरचय शान्तसुधारसपानम् ॥९८॥

## ~~ करुणाभावना ~~

२ उपायानां लक्षैः कथमपि समासाद्य विभवं,
भवाभ्यासात्तत्र ध्रुवमिति निबध्नाति हृदयम् ।
अथाकस्मादस्मिन् विकिरति रजः क्रूरहृदयो,
रिपुर्वा रोगो वा भयमुत जरा मृत्युरथवा ॥९९॥

६ शृण्वन्ति ये नैव हितोपदेशं, न धर्मलेशं मनसा स्पृशन्ति ।
रुजः कथङ्कारमथापनेयाः, स्तेषामुपायस्त्वयमेक एव ॥१००॥

१५/२ क्षणमुपधाय मनः स्थिरतायां, पिबत जिनागमसारम् रे ।
कापथघटनाविकृतविचारं, त्यजत कृतान्तमसारं रे ॥१०१॥

१५/३ परिहरणीयो गुरुरविवेकी, भ्रमयति यो मतिमन्दम् रे ।
सुगुरुवचः सकृदपि परिपीतं, प्रथयति परमानन्दं रे ॥१०२॥

१५/४ कुमततमोभरमीलितनयनं, किमु पृच्छत पन्थानम् रे ? ।
दधिबुद्ध्या नर ! जलमन्थन्यां, किमु निदधत मन्थानं रे ? ॥१०३॥

१५/७ सह्यत इह किं भवकान्तारे, गदनिकुरम्बमपारम् रे ? ।
अनुसरताहितजगदुपकारं, जिनपतिमगदङ्कारं रे ॥१०४॥

१५/८ शृणुतैकं विनयोदितवचनं, नियतायतिहितरचनम् रे ।
रचयत कृतसुखशतसन्धानं, शांतसुधारसपानं रे ॥१०५॥

~~~ माध्यस्थ्यभावना ~~~

३ मिथ्या शंसन् वीरतीर्थेश्वरेण,
रोद्धुं शेके न स्वशिष्यो जमालिः ।
अन्यः को वा रोत्स्यते केन पापात् ?
तस्मादौदासीन्यमेवात्मनीनम् ॥१०६॥

४ अर्हन्तोऽपि प्राज्यशक्तिस्पृशः किं, धर्मोद्योगं कारयेयुः प्रसह्य ? ।
दद्युः शुद्धं किन्तु धर्मोपदेशं, यत्कुर्वाणा दुस्तरं निस्तरन्ति ॥१०७॥

१६/२ परिहर परचिन्तापरिवारं, चिन्तय निजमविकारं रे ।
तव किं ? कोऽपि चिनोति करीरं, चिनुतेऽन्यः सहकारं रे ॥१०८॥

१६/३ योऽपि न सहते हितमुपदेशं, तदुपरि मा कुरु कोपं रे ।
निष्फलया किं परजनतप्त्या, कुरुषे निजसुखलोपं रे ? ॥१०९॥
~~~

१६/४ सूत्रमपास्य जडा भाषन्ते, केचन मतमुत्सूत्रं रे ।
किं कुर्मस्ते परिहृतपयसो, यदि पिबन्ति मूत्रं रे ? ॥११०॥

१६/५ पश्यसि किं न मनःपरिणामं, निजनिजगत्यनुसारं रे ।
येन जनेन यथा भवितव्यं, तद्भवता दुर्वारं रे ॥१११॥

१६/८ परब्रह्मपरिणामनिदानं, स्फुटकेवलविज्ञानं रे ।
विरचय विनय ! विवेचितज्ञानं, शान्तसुधारसपानं रे ॥११२॥

## પ્રશમરતિ સૂક્ત - રત્ન - મંજૂષા

### उमास्वातिकृतं प्रशमरतिप्रकरणं

२ जिनसिद्धाचार्योपाध्यायान्, प्रणिपत्य सर्वसाधूँश्च ।
प्रशमरतिस्थैर्यार्थं, वक्ष्ये जिनशासनात् किञ्चित् ॥१॥

१२ ये तीर्थकृत्प्रणीता, भावास्तदनन्तरैश्च परिकथिताः ।
तेषां बहुशोऽप्यनुत्कीर्तनं, भवति पुष्टिकरमेव ॥२॥

१६ दृढतामुपैति वैराग्य-भावना येन येन भावेन ।
तस्मिँस्तस्मिन् कार्यः, कायमनोवाग्भिरभ्यासः ॥३॥

२८१ प्रवचनभक्तिः श्रुतसम्पदुद्यमो व्यतिकरश्च संविग्नैः ।
वैराग्यमार्गसद्भाव-भावधीस्थैर्यजनकानि ॥४॥

७८ यद्वत् कश्चित् क्षीरं, मधुशर्करया सुसंस्कृतं हृद्यम् ।
पित्तार्दितेन्द्रियत्वाद्, वितथमतिर्मन्यते कटुकम् ॥५॥

७९ तद्वन्निश्चयमधुरम्, अनुकम्पया सद्भिरभिहितं पथ्यम् ।
तथ्यमवमन्यमाना, रागद्वेषोदयोद्वृत्ताः ॥६॥

६४ भवकोटीभिरसुलभं, मानुष्यं प्राप्य कः प्रमादो मे ? ।
न च गतमायुर्भूयः, प्रत्येत्यपि देवराजस्य ॥७॥

६५ आरोग्यायुर्बलसमुदयाः, चला वीर्यमनियतं धर्मे ।
तल्लब्ध्वा हितकार्ये, मयोद्यमः सर्वथा कार्यः ॥८॥

१८५ शास्त्राध्ययने चाध्यापने च, सञ्चिन्तने तथाऽऽत्मनि च ।
धर्मकथने च सततं, यत्नः सर्वात्मना कार्यः ॥९॥

१२० पैशाचिकमाख्यानं, श्रुत्वा गोपायनं च कुलवध्वाः ।
संयमयोगैरात्मा, निरन्तरं व्यापृतः कार्यः ॥१०॥

२५ क्रोधात् प्रीतिविनाशं, मानाद् विनयोपघातमाप्नोति ।
शाठ्यात् प्रत्ययहानिः, सर्वगुणविनाशनं लोभात् ॥११॥

२६ क्रोधः परितापकरः, सर्वस्योद्वेगकारकः क्रोधः ।
वैरानुषङ्गजनकः, क्रोधः क्रोधः सुगतिहन्ता ॥१२॥

२७ श्रुतशीलविनयसन्दूषणस्य, धर्मार्थकामविघ्नस्य ।
मानस्य कोऽवकाशं, मुहूर्तमपि पण्डितो दद्यात् ? ॥१३॥

२८ मायाशीलः पुरुषो, यद्यपि न करोति किञ्चिदपराधम् ।
सर्प इवाविश्वास्यो, भवति तथाऽप्यात्मदोषहतः ॥१४॥

२९ सर्वविनाशाश्रयिणः, सर्वव्यसनैकराजमार्गस्य ।
लोभस्य को मुखगतः, क्षणमपि दुःखान्तरमुपेयात् ? ॥१५॥

४० दुःखद्विट् सुखलिप्सुः, मोहान्धत्वाद् अदृष्टगुणदोषः ।
यां यां करोति चेष्टां, तया तया दुःखमादत्ते ॥१६॥

४१ कलरिभितमधुरगान्धर्व-तूर्ययोषिद्विभूषणरवाद्यैः ।
श्रोत्रावबद्धहृदयो, हरिण इव विनाशमुपयाति ॥१७॥

४२ गतिविभ्रमेङ्गिताकार-हास्यलीलाकटाक्षविक्षिप्तः ।
रूपावेशितचक्षुः, शलभ इव विपद्यते विवशः ॥१८॥

४३ स्नानाङ्गरागवर्तिक-वर्णकधूपाधिवासपटवासैः ।
गन्धभ्रमितमनस्को, मधुकर इव नाशमुपयाति ॥१९॥

४४ मिष्टान्नपानमांसौदनादि-मधुररसविषयगृद्धात्मा ।
गलयन्त्रपाशबद्धो, मीन इव विनाशमुपयाति ॥२०॥

४५ शयनासनसम्बाधन-सुरतस्नानानुलेपनासक्तः ।
स्पर्शव्याकुलितमतिः, गजेन्द्र इव बध्यते मूढः ॥२१॥

४६ एकैकविषयसङ्गाद्, रागद्वेषातुरा विनष्टास्ते ।
किं पुनरनियमितात्मा, जीवः पञ्चेन्द्रियवशार्त्तः ? ॥२२॥

४८ न हि सोऽस्तीन्द्रियविषयो, येनाभ्यस्तेन नित्यतृषितानि ।
तृप्तिं प्राप्नुयुरक्षाण्यनेकमार्गप्रलीनानि ॥२३॥

५२ तानेवार्थान् द्विषतः, तानेवार्थान् प्रलीयमानस्य ।
निश्चयतोऽस्यानिष्टं, न विद्यते किञ्चिदिष्टं वा ॥२४॥

५४ यस्मिन्निन्द्रियविषये, शुभमशुभं वा निवेशयति भावम् ।
रक्तो वा द्विष्टो वा, स बन्धहेतुर्भवति तस्य ॥२५॥

१०६ आदावत्यभ्युदया, मध्ये शृङ्गारहास्यदीप्तरसाः ।
निकषे विषया बीभत्स-करुणलज्जाभयप्रायाः ॥२६॥

१०७ यद्यपि निषेव्यमाणा, मनसः परितुष्टिकारका विषयाः ।
किम्पाकफलादनवद्, भवन्ति पश्चादतिदुरन्ताः ॥२७॥

१०८ यद्वत् शाकाष्टादशम्, अन्नं बहुभक्ष्यपेयवत् स्वादु ।
विषसंयुक्तं भुक्तं, विपाककाले विनाशयति ॥२८॥

१०९ तद्वदुपचारसंभृत-रम्यकरागरससेविता विषयाः ।
भवशतपरम्परास्वपि, दुःखविपाकानुबन्धकराः ॥२९॥

१२१ क्षणविपरिणामधर्मा, मर्त्यानामृद्धिसमुदयाः सर्वे ।
सर्वे च शोकजनकाः, संयोगा विप्रयोगान्ताः ॥३०॥

१२२ भोगसुखैः किमनित्यैः, भयबहुलैः काङ्क्षितैः परायत्तैः ? ।
नित्यमभयमात्मस्थं, प्रशमसुखं तत्र यतितव्यम् ॥३१॥

१२४ यत् सर्वविषयकाङ्क्षोद्भवं, सुखं प्राप्यते सरागेण ।
तदनन्तकोटिगुणितं, मुधैव लभते विगतरागः ॥३२॥

१२५ इष्टवियोगाप्रियसम्प्रयोगकाङ्क्षासमुद्भवं दुःखम् ।
प्राप्नोति यत् सरागो, न संस्पृशति तद् विगतरागः ॥३३॥

१२६ प्रशमितवेदकषायस्य, हास्यरत्यरतिशोकनिभृतस्य ।
भयकुत्सानिरभिभवस्य, यत् सुखं तत् कुतोऽन्येषाम् ? ॥३४॥

१२७ सम्यग्दृष्टिर्ज्ञानी, ध्यानतपोबलयुतोऽप्यनुपशान्तः ।
तं लभते न गुणं यं, प्रशमगुणमुपाश्रितो लभते ॥३५॥

१२८ नैवास्ति राजराजस्य, तत्सुखं नैव देवराजस्य ।
यत्सुखमिहैव साधोः, लोकव्यापाररहितस्य ॥३६॥

२३५ स्वगुणाभ्यासरतमतेः, परवृत्तान्तान्धमूकबधिरस्य ।
मदमदनमोहमत्सर-रोषविषादैरधृष्यस्य ॥३७॥

२३६ प्रशमाव्याबाधसुखाभिकाङ्क्षिणः, सुस्थितस्य सद्धर्मे ।
तस्य किमौपम्यं स्यात्, सदेवमनुजेऽपि लोकेऽस्मिन् ? ॥३८॥

२३७ स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् ।
प्रत्यक्षं प्रशमसुखं, न परवशं न च व्ययप्राप्तम् ॥३९॥

२३८ निर्जितमदमदनानां, वाक्कायमनोविकाररहितानाम् ।
विनिवृत्तपराशानाम्, इहैव मोक्षः सुविहितानाम् ॥४०॥

२४० स्वशरीरेऽपि न रज्यति, शत्रावपि न प्रदोषमुपयाति ।
रोगजरामरणभयैः, अव्यथितो यः स नित्यसुखी ॥४१॥

२४२ विषयसुखनिरभिलाषः, प्रशमगुणगणाभ्यलङ्कृतः साधुः ।
द्योतयति यथा न तथा, सर्वाण्यादित्यतेजांसि ॥४२॥

२५५ सातर्द्धिरसेष्वगुरुः, प्राप्यर्द्धिविभूतिमसुलभामन्यैः ।
सक्तः प्रशमरतिसुखे, न भजति तस्यां मुनिः सङ्गम् ॥४३॥

२५६ या सर्वसुरवरर्द्धिः, विस्मयनीयाऽपि साऽनगारर्द्धेः ।
नार्धति सहस्रभागं, कोटिशतसहस्रगुणिताऽपि ॥४४॥

१४० यद्वत् पङ्काधारमपि, पङ्कजं नोपलिप्यते तेन ।
धर्मोपकरणधृतवपुरपि, साधुरलेपकस्तद्वत् ॥४५॥

१४१ यद्वत् तुरगः सत्स्वप्याभरणविभूषणेष्वनभिसक्तः ।
तद्वदुपग्रहवानपि, न सङ्गमुपयाति निर्ग्रन्थः ॥४६॥

७६ केचित् सातर्द्धिरसातिगौरवात्, साम्प्रतेक्षिणः पुरुषाः ।
मोहात् समुद्रवायसवद्, आमिषपरा विनश्यन्ति ॥४७॥

८१ ज्ञात्वा भवपरिवर्ते, जातीनां कोटीशतसहस्रेषु ।
हीनोत्तममध्यत्वं, को जातिमदं बुधः कुर्याद् ? ॥४८॥

८४ यस्याशुद्धं शीलं, प्रयोजनं तस्य किं कुलमदेन ? ।
स्वगुणाभ्यलङ्कृतस्य हि, किं शीलवतः कुलमदेन ? ॥४९॥

८६ नित्यं परिशीलनीये, त्वङ्मांसाच्छादिते कलुषपूर्णे ।
निश्चयविनाशधर्मिणि, रूपे मदकारणं किं स्यात् ? ॥५०॥

८८ तस्मादनियतभावं, बलस्य सम्यग् विभाव्य बुद्धिबलात् ।
मृत्युबले चाबलतां, न मदं कुर्याद् बलेनापि ॥५१॥

८९ उदयोपशमनिमित्तौ, लाभालाभावनित्यकौ मत्वा ।
नालाभे वैकल्यं, न च लाभे विस्मयः कार्यः ॥५२॥

९२ पूर्वपुरुषसिंहानां, विज्ञानातिशयसागरानन्त्यम् ।
श्रुत्वा साम्प्रतपुरुषाः, कथं स्वबुद्ध्या मदं यान्ति ? ॥५३॥

९४ गर्वं परप्रसादात्मकेन, वाल्लभ्यकेन यः कुर्यात् ।
तं वाल्लभ्यकविगमे, शोकसमुदयः परामृशति ॥५४॥

९६ संपर्कोद्यमसुलभं, चरणकरणसाधकं श्रुतज्ञानम् ।
लब्ध्वा सर्वमदहरं, तेनैव मदः कथं कार्यः ? ॥५५॥

९८ जात्यादिमदोन्मत्तः, पिशाचवद् भवति दुःखितश्चेह ।
जात्यादिहीनतां, परभवे च निःसंशयं लभते ॥५६॥

१०० परपरिभवपरिवादाद्, आत्मोत्कर्षाच्च बध्यते कर्म ।
नीचैर्गोत्रं प्रतिभवं, अनेकभवकोटिदुर्मोचम् ॥५७॥

१३५ व्रणलेपाक्षोपाङ्गवद्, असङ्गयोगभरमात्रयात्रार्थम् ।
पन्नग इवाभ्यवहरेद्, आहारं पुत्रपलवच्च ॥५८॥

१३७ कालं क्षेत्रं मात्रां, सात्म्यं द्रव्यगुरुलाघवं स्वबलम् ।
ज्ञात्वा योऽभ्यवहार्यं, भुङ्क्ते किं भेषजैस्तस्य ? ॥५९॥

१४७ तच्चिन्त्यं तद्भाष्यं, तत्कार्यं भवति सर्वथा यतिना ।
नात्मपरोभयबाधकम्, इह यत् परतश्च सर्वाद्धम् ॥६०॥

१४३ यज्ज्ञानशीलतपसाम्, उपग्रहं निग्रहं च दोषाणाम् ।
कल्पयति निश्चये यत्, तत् कल्प्यमकल्प्यमवशेषम् ॥६१॥

१४४ यत् पुनरुपघातकरं, सम्यक्त्वज्ञानशीलयोगानाम् ।
तत् कल्प्यमप्यकल्प्यं, प्रवचनकुत्साकरं यच्च ॥६२॥

१५१ इष्टजनसंप्रयोगर्द्धि-विषयसुखसम्पदस्तथाऽऽरोग्यम् ।
देहश्च यौवनं जीवितं च, सर्वाण्यनित्यानि ॥६३॥

१५२ जन्मजरामरणभयैः, अभिद्रुते व्याधिवेदनाग्रस्ते ।
जिनवरवचनादन्यत्र, नास्ति शरणं क्वचिल्लोके ॥६४॥

१५३ एकस्य जन्ममरणे, गतयश्च शुभाशुभा भवावर्ते ।
तस्मादाकालिकहितम्, एकेनैवात्मनः कार्यम् ॥६५॥

१५४ अन्योऽहं स्वजनात् परिजनाच्च, विभवात् शरीरकाच्चेति ।
यस्य नियता मतिरियं, न बाधते तं हि शोककलिः ॥६६॥

१५५ अशुचिकरणसामर्थ्याद्, आद्युत्तरकारणाशुचित्वाच्च ।
देहस्याशुचिभावः, स्थाने स्थाने भवति चिन्त्यः ॥६७॥

१५६ माता भूत्वा दुहिता, भगिनी भार्या च भवति संसारे ।
व्रजति सुतः पितृतां, भ्रातृतां पुनः शत्रुतां चैव ॥६८॥

१५७ मिथ्यादृष्टिरविरतः, प्रमादवान् यः कषायदण्डरुचिः ।
तस्य तथाऽऽस्रवकर्मणि, यतेत तन्निग्रहे तस्मात् ॥६९॥

१५८ या पुण्यपापयोरग्रहणे, वाक्कायमानसी वृत्तिः ।
सुसमाहितो हितः, संवरो वरददेशितश्चिन्त्यः ॥७०॥

१५९ यद्वद्विशोषणादुपचितोऽपि, यत्नेन जीर्यते दोषः ।
तद्वत् कर्मोपचितं, निर्जरयति संवृतस्तपसा ॥७१॥

१६० लोकस्याधस्तिर्यग्, विचिन्तयेदूर्ध्वमपि च बाहल्यम् ।
सर्वत्र जन्ममरणे, रूपिद्रव्योपयोगांश्च ॥७२॥

१६१ धर्मोऽयं स्वाख्यातो, जगद्धितार्थं जिनैः जितारिगणैः ।
येऽत्र रतास्ते संसार-सागरं लीलयोत्तीर्णाः ॥७३॥

१६२ मानुष्यकर्मभूम्यार्यदेशकुलकल्यताऽऽयुरुपलब्धौ ।
श्रद्धाकथकश्रवणेषु, सत्स्वपि सुदुर्लभा बोधिः ॥७४॥

१६३ तां दुर्लभां भवशतैः, लब्ध्वाऽतिदुर्लभा पुनर्विरतिः ।
मोहाद् रागात् कापथविलोकनाद् गौरववशाच्च ॥७५॥

१६८ धर्मस्य दया मूलं, न चाक्षमावान् दयां समादत्ते ।
तस्माद् यः क्षान्तिपरः, स साधयत्युत्तमं धर्मम् ॥७६॥

१६९ विनयायत्ता गुणाः सर्वे, विनयश्च मार्दवायत्तः ।
यस्मिन् मार्दवमखिलं, स सर्वगुणभाक्त्वमाप्नोति ॥७७॥

१७० नानार्जवो विशुध्यति, न धर्ममाराधत्यशुद्धात्मा ।
धर्मादृते न मोक्षो, मोक्षात् परमं सुखं नान्यत् ॥७८॥

१७१ यद् द्रव्योपकरणभक्तपानदेहाधिकारकं शौचम् ।
तद् भवति भावशौचानुपरोधाद् यत्नतः कार्यम् ॥७९॥

१७२ पञ्चाश्रवाद् विरमणं, पञ्चेन्द्रियनिग्रहः कषायजयः ।
दण्डत्रयविरतिश्चेति, संयमः सप्तदशभेदः ॥८०॥

१७३ बान्धवधनेन्द्रियसुखत्यागात्, त्यक्तभयविग्रहः साधुः ।
त्यक्तात्मा निर्ग्रन्थः, त्यक्ताहङ्कारममकारः ॥८१॥

१७४ अविसंवादनयोगः, कायमनोवागजिह्मता चैव ।
सत्यं चतुर्विधं तच्च, जिनवरमतेऽस्ति नान्यत्र ॥८२॥

१७५ अनशनमूनोदरता, वृत्तेः संक्षेपणं रसत्यागः ।
कायक्लेशः संलीनतेति, बाह्यं तपः प्रोक्तम् ॥८३॥

१७६ प्रायश्चित्तध्याने, वैयावृत्त्यविनयावथोत्सर्गः ।
स्वाध्याय इति तपः, षट्प्रकारमभ्यन्तरं भवति ॥८४॥

१७७ दिव्यात् कामरतिसुखात्, त्रिविधं त्रिविधेन विरतिरिति नवकम् ।
औदारिकादपि तथा, तद् ब्रह्माष्टादशविकल्पम् ॥८५॥

१७८ अध्यात्मविदो मूर्च्छां, परिग्रहं वर्णयन्ति निश्चयतः ।
तस्माद् वैराग्येप्सोः, आकिञ्चन्यं परो धर्मः ॥८६॥

१७९ दशविधधर्मानुष्ठायिनः, सदा रागद्वेषमोहानाम् ।
दृढरूढघनानामपि, भवत्युपशमोऽल्पकालेन ॥८७॥

६७ कुलरूपवचनयौवन-धनमित्रैश्वर्यसम्पदपि पुंसाम् ।
विनयप्रशमविहीना, न शोभते निर्जलेव नदी ॥८८॥

६८ न तथा सुमहार्घ्यैरपि, वस्त्राभरणैरलङ्कृतो भाति ।
श्रुतशीलमूलनिकषो, विनीतविनयो यथा भाति ॥८९॥

६६ शास्त्रागमादृते न हितमस्ति, न च शास्त्रमस्ति विनयम् ऋते ।
तस्माच्छास्त्रागमलिप्सुना, विनीतेन भवितव्यम् ॥९०॥

६९ गुर्वायत्ता यस्मात्, शास्त्रारम्भा भवन्ति सर्वेऽपि ।
तस्माद् गुर्वाराधनपरेण, हितकाङ्क्षिणा भाव्यम् ॥९१॥

७० धन्यस्योपरि निपतति, अहितसमाचरणघर्मनिर्वापी ।
गुरुवदनमलयनिसृतो, वचनसरसचन्दनस्पर्शः ॥९२॥

७१ दुष्प्रतिकारौ मातापितरौ, स्वामी गुरुश्च लोकेऽस्मिन् ।
तत्र गुरुरिहामुत्र च, सुदुष्करतरप्रतीकारः ॥९३॥

७२ विनयफलं शुश्रूषा, गुरुशुश्रूषाफलं श्रुतज्ञानम् ।
ज्ञानस्य फलं विरतिः, विरतिफलं चाश्रवनिरोधः ॥९४॥

७३ संवरफलं तपोबलम्, अथ तपसो निर्जरा फलं दृष्टम् ।
तस्मात् क्रियानिवृत्तिः, क्रियानिवृत्तेरयोगित्वम् ॥९५॥

७४ योगनिरोधाद् भवसन्ततिक्षयः, सन्ततिक्षयान्मोक्षः ।
तस्मात् कल्याणानां, सर्वेषां भाजनं विनयः ॥९६॥

१३१ लोकः खल्वाधारः, सर्वेषां ब्रह्मचारिणां यस्मात् ।
तस्माल्लोकविरुद्धं, धर्मविरुद्धं च सन्त्याज्यम् ॥९७॥

२३२ धर्मावश्यकयोगेषु, भावितात्मा प्रमादपरिवर्जी ।
सम्यक्त्वज्ञानचारित्राणाम्, आराधको भवति ॥९८॥

२४९ जिनवरवचनगुणगणं, सञ्चिन्तयतो वधाद्यपायांश्च ।
कर्मविपाकान् विविधान्, संस्थानविधीननेकांश्च ॥९९॥

२५१ नित्योद्विग्नस्यैवं, क्षमाप्रधानस्य निरभिमानस्य ।
धूतमायाकलिमलनिर्मलस्य, जितसर्वतृष्णस्य ॥१००॥

२५२ तुल्यारण्यकुलाकुल-विविक्तबन्धुजनशत्रुवर्गस्य ।
समवासीचन्दनकल्पन-प्रदेहादिदेहस्य ॥१०१॥

२५३ आत्मारामस्य सतः, समतृणमणिमुक्तलोष्ठकनकस्य ।
स्वाध्यायध्यानपरायणस्य, दृढमप्रमत्तस्य ॥१०२॥

२६४ क्षपकश्रेणिमुपगतः, स समर्थः सर्वकर्मिणां कर्म ।
क्षपयितुमेको यदि, कर्मसङ्क्रमः स्यात् परकृतस्य ॥१०३॥

२६७ मस्तकसूचिविनाशात्, तालस्य यथा ध्रुवो भवति नाशः ।
तद्वत् कर्मविनाशो, हि मोहनीयक्षये नित्यम् ॥१०४॥

२९५ देहमनोवृत्तिभ्यां, भवतः शारीरमानसे दुःखे ।
तदभावस्तदभावे, सिद्धं सिद्धस्य सिद्धिसुखम् ॥१०५॥

३०९ इत्येवं प्रशमरतेः, फलमिह स्वर्गापवर्गयोश्च शुभम् ।
सम्प्राप्यतेऽनगारैः, अगारिभिश्चोत्तरगुणाढ्यैः ॥१०६॥

३११ सद्भिः गुणदोषज्ञैः, दोषानुत्सृज्य गुणलवा ग्राह्याः ।
सर्वात्मना च सततं, प्रशमसुखायैव यतितव्यम् ॥१०७॥

३१३ सर्वसुखमूलबीजं, सर्वार्थविनिश्चयप्रकाशकरम् ।
सर्वगुणसिद्धिसाधनम्, अर्हच्छासनं जयति ॥१०८॥

## અધ્યાત્મકલ્પદ્રુમ સૂક્ત - રત્ન - મંજૂષા

## मुनिसुन्दरसूरिकृतं अध्यात्मकल्पद्रुमप्रकरणं

१/१ जयश्रीरान्तरारीणां, लेभे येन प्रशान्तितः ।
तं श्रीवीरजिनं नत्वा, रसः शान्तो विभाव्यते ॥१॥

१/१० भजस्व मैत्रीं जगदङ्गिराशिषु, प्रमोदमात्मन् गुणिषु त्वशेषतः ।
भवार्तिदीनेषु कृपारसं सदाऽप्युदासवृत्तिं खलु निर्गुणेष्वपि ॥२॥

५/६ यतः शुचीन्यप्यशुचीभवन्ति,
कृम्याकुलात् काकशुनादिभक्ष्यात् ।
द्राग् भाविनो भस्मतया ततोऽङ्गात्,
मांसादिपिण्डात् स्वहितं गृहाण ॥३॥

५/२ कारागृहाद् बहुविधाशुचितादिदुःखात्,
निर्गन्तुमिच्छति जडोऽपि हि तद्विभिद्य ।
क्षिप्तस्ततोऽधिकतरे वपुषि स्वकर्म-
व्रातेन तद् दृढयितुं यतसे किमात्मन् ? ॥४॥

५/८ मृत्पिण्डरूपेण विनश्वरेण, जुगुप्सनीयेन गदालयेन ।
देहेन चेदात्महितं सुसाध्यं, धर्मान्न किं तद्यतसेऽत्र मूढ ? ॥५॥

१/६ यदिन्द्रियार्थैः सकलैः सुखं स्यात्, नरेन्द्रचक्रित्रिदशाधिपानां ।
तद् बिन्दवत्येव पुरो हि साम्यसुधाम्बुधेस्तेन तमाद्रियस्व ॥६॥

१/२७ स्वप्नेन्द्रजालादिषु यद्वदाप्तैः, रोषश्च तोषश्च मुधा पदार्थैः ।
तथा भवेऽस्मिन् विषयैः समस्तैः, एवं विभाव्यात्मलयेऽवधेहि ॥७॥

६/२ आपातरम्ये परिणामदुःखे,
सुखे कथं वैषयिके रतोऽसि ?।
जडोऽपि कार्यं रचयन् हितार्थी,
करोति विद्वन् ! यदुदर्कतर्कम् ॥८॥

१०/१८ दुःखं यथा बहुविधं सहसेऽप्यकामः,
कामं तथा सहसि चेत् करुणादिभावैः ।
अल्पीयसाऽपि तव तेन भवान्तरे स्यात्,
आत्यन्तिकी सकलदुःखनिवृत्तिरेव ॥९॥

१०/२५ शीतात् तापान्मक्षिकाकत्तृणादि-
स्पर्शाद्युत्थात् कष्टतोऽल्पाद् बिभेषि ।
तास्ताश्चैभिः कर्मभिः स्वीकरोषि,
श्वभ्रादीनां वेदना धिग् धियं ते ! ॥१०॥

१०/१२ आत्मानमल्पैरिह वञ्चयित्वा,
प्रकल्पितैर्वाक्तनुचित्तसौख्यैः ।
भवाधमे किं जन ! सागराणि,
सोढाऽसि ही नारकदुःखराशीन् ? ॥११॥

६/९ विमोह्यसे किं विषयप्रमादैः, भ्रमात् सुखस्यायतिदुःखराशेः ?।
तद्गर्धमुक्तस्य हि यत् सुखं ते, गतोपमं चायतिमुक्तिदं तत् ॥१२॥

१०/१४ पतङ्गभृङ्गैणखगाहिमीन-
द्विपद्विपारिप्रमुखाः प्रमादैः ।
शोच्या यथा स्युर्मृतिबन्धदुःखैः,
चिराय भावी त्वमपीति जन्तो ! ॥१३॥

२/१ मुह्यसि प्रणयचारुगिरासु,
प्रीतितः प्रणयिनीषु कृतिंस्त्वम् ! ।
किं न वेत्सि पततां भववार्द्धौ,
ता नृणां खलु शिला गलबद्धाः ? ॥१४॥

२/३ विलोक्य दूरस्थममेध्यमल्पं,
जुगुप्ससे मोटितनासिकस्त्वम् ।
भृतेषु तेनैव विमूढ ! योषा-
वपुष्षु तत् किं कुरुषेऽभिलाषम् ? ॥१५॥

२/७ अमेध्यभस्त्रा बहुरन्ध्रनिर्यन्-
मलाविलोद्यत्कृमिजालकीर्णा ।
चापल्यमायाऽनृतवञ्चिका स्त्री,
संस्कारमोहात् नरकाय भुक्ता ॥१६॥

२/८ निर्भूमिर्विषकन्दली गतदरी व्याघ्री निराह्वो महा-
व्याधिर्मृत्युरकारणश्च ललनाऽनभ्रा च वज्राशनिः ।
बन्धुस्नेहविघातसाहसमृषावादादिसंतापभूः,
प्रत्यक्षाऽपि च राक्षसीति बिरुदैर्ख्याताऽऽगमे त्यज्यताम् ॥१७॥

४/३ स्वर्गापवर्गौ नरकं तथाऽन्तर्मुहूर्तमात्रेण वशावशं यत् ।
ददाति जन्तोः सततं प्रयत्नाद्, वशं तदन्तःकरणं कुरुष्व ॥१८॥

१४/१८ विषयेन्द्रियसंयोगाभावात् के के न संयताः ? ।
रागद्वेषमनोयोगाभावाद् ये तु स्तवीमि तान् ॥१९॥

९/१२ तपोजपाद्याः स्वफलाय धर्मा, न दुर्विकल्पैर्हतचेतसः स्युः ।
तत् खाद्यपेयैः सुभृतेऽपि गेहे, क्षुधातृषाभ्यां म्रियते स्वदोषात् ॥२०॥

९/१६ स्वाध्याययोगैश्चरणक्रियासु, व्यापारणैर्द्वादशभावनाभिः ।
सुधीस्त्रियोगीसदसत्प्रवृत्तिफलोपयोगैश्च मनो निरुन्ध्यात् ॥२१॥

९/१७ भावनापरिणामेषु, सिंहेष्विव मनोवने ।
सदा जाग्रत्सु दुर्ध्यान-शूकरा न विशन्त्यपि ॥२२॥

१४/२ मनः संवृणु हे विद्वन् !, असंवृतमना यतः ।
याति तन्दुलमत्स्यो द्राक्, सप्तमीं नरकावनिम् ॥२३॥

१४/३ प्रसन्नचन्द्रराजर्षेः, मनःप्रसरसंवरौ ।
नरकस्य शिवस्यापि, हेतुभूतौ क्षणादपि ॥२४॥

८/३ अधीतिनोऽर्चादिकृते जिनागमः,
प्रमादिनो दुर्गतिपापतेर्मुधा ।
ज्योतिर्विमूढस्य हि दीपपातिनो,
गुणाय कस्मै शलभस्य चक्षुषी ? ॥२५॥

८/६ धिगागमैर्माद्यसि रञ्जयन् जनान्,
नोद्यच्छसि प्रेत्यहिताय संयमे ।
दधासि कुक्षिम्भरिमात्रतां मुने !,
क्व ते ? क्व तत् ? क्वैष च ते ? भवान्तरे ॥२६॥

८/९ अधीतिमात्रेण फलन्ति नागमाः,
समीहितैर्जीव ! सुखैर्भवान्तरे ।
स्वनुष्ठितैः किन्तु तदीरितैः खरो,
न यत् सिताया वहनश्रमात् सुखी ॥२७॥

७/१५ कष्टेन धर्मो लवशो मिलत्यं, क्षयं कषायैर्युगपत् प्रयाति च ।
अतिप्रयत्नार्जितमर्जुनं ततः, किमज्ञ ! ही हारयसे नभस्वता ? ॥२८॥

७/१६ शत्रूभवन्ति सुहृदः कलुषीभवन्ति,
धर्मा यशांसि निचितायशसीभवन्ति ।
स्निह्यन्ति नैव पितरोऽपि च बान्धवाश्च,
लोकद्वयेऽपि विपदो भविनां कषायैः ॥२९॥

१४/१९ कषायान् संवृणु प्राज्ञ !, नरकं यदसंवरात् ।
महातपस्विनोऽप्यापुः, करटोत्करटादयः ॥३०॥

७/१० धत्से कृतिन् ! यद्यपकारकेषु, क्रोधं ततो धेह्यरिषट्क एव ।
अथोपकारिष्वपि तद् भवार्तिकृत्कर्महृन्मित्रबहिर्द्विषत्सु ॥३१॥

७/११ अधीत्यनुष्ठानतपःशमाद्यान्, धर्मान् विचित्रान् विदधत् समायान् ।
न लप्स्यसे तत्फलमात्मदेहक्लेशाधिकं ताँश्च भवान्तरेषु ॥३२॥

७/१२ सुखाय धत्से यदि लोभमात्मनो,
ज्ञानादिरत्नत्रितये विधेहि तत् ।
दुःखाय चेदत्र परत्र वा कृतिन् !,
परिग्रहे तद् बहिरान्तरेऽपि च ॥३३॥

७/२ पराभिभूतौ यदि मानमुक्तिः, ततस्तपोऽखण्डमतः शिवं वा ।
मानादृतिः दुर्वचनादिभिश्चेत्, तपःक्षयात् तन्नरकादिदुःखम् ॥३४॥

७/९ पराभिभूत्याऽल्पिकयाऽपि, कुप्यस्यघैरपीमां प्रतिकर्तुमिच्छन् ।
न वेत्सि तिर्यङ्नरकादिकेषु, तास्तैरनन्तास्त्वतुला भवित्री ॥३५॥

७/४ श्रुत्वाऽऽक्रोशान् यो मुदा पूरितः स्यात्,
लोष्टाद्यैर्यश्चाहतो रोमहर्षी ।
यः प्राणान्तेऽप्यन्यदोषं न पश्यत्येष,
श्रेयो द्राग् लभेतैव योगी ॥३६॥

७/१७ रूपलाभकुलविक्रम-
विद्याश्रीतपोवितरणप्रभुताद्यैः ।
किं मदं वहसि ? वेत्सि न,
मूढानन्तशः स्म भृशलाघवदुःखम् ? ॥३७॥

१/१८ के गुणास्तव ? यतः स्तुतिमिच्छस्य-
द्भुतं किमकृथा ? मदवान् यत् ।
कैर्गता नरकभीः सुकृतैस्ते ?,
किं जितः पितृपतिर्यदचिन्तः ? ॥३८॥

७/२१ मृत्योः कोऽपि न रक्षितो न जगतो, दारिद्र्यमुत्त्रासितं,
रोगस्तेननृपादिजा न च भियो, निर्णाशिता षोडश ।
विध्वस्ता नरका न नापि सुखिता, धर्मैस्त्रिलोकी सदा,
तत् को नाम गुणो ? मदश्च ? विभुता, का ? ते स्तुतीच्छा
च का ? ॥३९॥

१०/५ विद्वानहं सकललब्धिरहं नृपोऽहं,
दाताऽहमद्भुतगुणोऽहमहं गरीयान् ।
इत्याद्यहङ्कृतिवशात् परितोषमेति,
नो वेत्सि किं परभवे लघुतां भवित्रीम् ? ॥४०॥

११/४ जनेषु गृह्णत्सु गुणान् प्रमोदसे,
ततो भवित्री गुणरिक्तता तव ।
गृह्णत्सु दोषान् परितप्यसे च चेद्,
भवन्तु दोषास्त्वयि सुस्थिरास्ततः ॥४१॥

११/५ प्रमोदसे स्वस्य यथाऽन्यनिर्मितैः,
स्तवैर्तथा चेत् प्रतिपन्थिनामपि ।
विगर्हणैः स्वस्य यथोपतप्यसे,
तथा रिपूणामपि चेत् ततोऽसि वित् ॥४४॥

११/७ भवेन्न कोऽपि स्तुतिमात्रतो गुणी,
ख्यात्या न बह्व्याऽपि हितं परत्र च ।
तदिच्छुरीर्ष्यादिभिरायतिं ततो,
मुधाऽभिमानग्रहिलो निहंसि किम् ? ॥४३॥

११/१० स्तुतैः श्रुतैर्वाऽप्यपरैर्निरीक्षितैः,
गुणस्तवात्मन् ! सुकृतैर्न कश्चन ।
फलन्ति नैव प्रकटीकृतैर्भुवो,
द्रुमा हि मूलैः निपतन्त्यपि त्वधः ॥४४॥

११/११ तपःक्रियाऽऽवश्यकदानपूजनैः, शिवं न गन्ता गुणमत्सरी जनः ।
अपथ्यभोजी न निरामयो भवेद्, रसायनैरप्यतुलैः यदातुरः ॥४५॥

१२/१ तत्त्वेषु सर्वेषु गुरुः प्रधानं, हितार्थधर्मा हि तदुक्तिसाध्याः ।
श्रयंस्तमेवेत्यपरीक्ष्य मूढ ! धर्मप्रयासान् कुरुषे वृथैव ॥४६॥

१२/२ भवी न धर्मैरविधिप्रयुक्तैः, गमी शिवं येषु गुरुर्न शुद्धः ।
रोगी हि कल्यो न रसायनैस्तैः, येषां प्रयोक्ता भिषगेव मूढः ॥४७॥

१२/८ नाम्रं सुसिक्तोऽपि ददाति निम्बकः,
पुष्टा रसैर्वन्ध्यगवी पयो न च ।
दुःस्थो नृपो नैव सुसेवितः श्रियं,
धर्मं शिवं वा कुगुरुर्न संश्रितः ॥४८॥

१२/१० मातापिता स्वः सुगुरुश्च तत्त्वात्,
प्रबोध्य यो योजयति शुद्धधर्मे ।
न तत्समोऽरि क्षिपते भवाब्धौ,
यो धर्मविघ्नादिकृतेश्च जीवम् ॥४९॥

११/२ शैथिल्यमात्सर्यकदाग्रहक्रुधो-
ऽनुतापदम्भाविधिगौरवाणि च ।
प्रमादमानौ कुगुरुः कुसङ्गतिः,
श्लाघार्थिता वा सुकृते मला इमे ॥५०॥

७/१३ करोषि यत् प्रेत्यहिताय किञ्चित्,
कदाचिदल्पं सुकृतं कथञ्चित् ।
मा जीहरस्तन्मदमत्सराद्यैः,
विना च तन्मा नरकातिथिर्भूः ॥५१॥

११/१३ दीपो यथाऽल्पोऽपि तमांसि हन्ति,
लवोऽपि रोगान् हरते सुधायाः ।
तृण्यां दहत्याशु कणोऽपि चाग्नेः,
धर्मस्य लेशोऽप्यमलस्तथांहः ॥५२॥

११/१४ भावोपयोगशून्याः कुर्वन्, आवश्यिकी क्रियाः सर्वाः ।
देहक्लेशं लभसे, फलमाप्स्यसि नैव पुनरासाम् ॥५३॥

८/१० दुर्गन्धतो यदणुतोऽपि पुरस्य मृत्युः,
आयूंषि सागरमितान्यप्यनुपक्रमाणि ।
स्पर्शः खरः क्रकचतोऽतितमामितश्च,
दुःखावनन्तगुणितौ भृशशैत्यतापौ ॥५४॥

८/११ तीव्रा व्यथाः सुरकृता विविधाश्च यत्र,
क्रन्दारवैः सततमभ्रभृतोऽप्यमुष्मात् ।
किं भाविनो न नरकात् कुमते ! बिभेषि ?,
यन्मोदसे क्षणसुखैर्विषयैः कषायी ॥५५॥

८/१२ बन्धोऽनिशं वाहनताडनानि, क्षुत्तृड्दुरामातपशीतवाताः ।
निजान्यजातीयभयापमृत्युदुःखानि तिर्यक्ष्विति दुस्सहानि ॥५६॥

८/१३ मुधाऽन्यदास्याभिभवाभ्यसूया, भियोऽन्तगर्भस्थितिदुर्गतीनाम् ।
एवं सुरेष्वप्यसुखानि नित्यं, किं तत्सुखैर्वा परिणामदुःखैः ? ॥५७॥

८/१४ सप्तभीत्यभिभवेष्टविप्लवानिष्टयोगगददुःसुप्तादिभिः ।
स्यात् चिरं विरसता नृजन्मनः, पुण्यतः सरसतां तदानय ॥५८॥

१/२६ स्निह्यन्ति तावद्धि निजा निजेषु, पश्यन्ति यावन् निजमर्थमेभ्यः ।
इमां भवेऽत्रापि समीक्ष्य रीतिं, स्वार्थे न कः प्रेत्यहिते यतेत ? ॥५९॥

१०/२२ यैः क्लिश्यसे त्वं धनबन्ध्वपत्य-
यशःप्रभुत्वादिभिराशयस्थैः ।
कियानिह प्रेत्य च तैर्गुणस्ते ?,
साध्यं किमायुश्च ? विचारयैवम् ॥६०॥

१०/२१ ये पालिता वृद्धिमिताः सहैव, स्निग्धा भृशं स्नेहपदं च ये ते ।
यमेन तानप्यदयं गृहीतान्, ज्ञात्वाऽपि किं न त्वरसे हिताय ? ॥६१॥

१२/१५ पूर्णे तटाके तृषितः सदैव, भृतेऽपि गेहे क्षुधितः स मूढः ।
कल्पद्रुमे सत्यपि हि दरिद्रो, गुर्वादियोगेऽपि हि यः प्रमादी ॥६२॥

१२/१६ न धर्मचिन्ता गुरुदेवभक्तिः, येषां न वैराग्यलवोऽपि चित्ते ।
तेषां प्रसूक्लेशफलः पशूनां, इवोद्भवः स्याद् उदरम्भरिणाम् ॥६३॥

१०/७ धर्मस्यावसरोऽस्ति पुद्गलपरावर्तैरनन्तैस्तवा-
यातः सम्प्रति जीव ! हे प्रसहतो दुःखान्यनन्तान्ययम् ।
स्वल्पाहः पुनरेष दुर्लभतमश्चास्मिन् यतस्वार्हतो,
धर्मं कर्तुमिमं विना हि न हि ते दुःखक्षयः कर्हिचित् ॥६४॥

१०/८ गुणस्तुतीर्वाञ्छसि निर्गुणोऽपि,
सुखप्रतिष्ठादि विनाऽपि पुण्यम् ।
अष्टाङ्गयोगं च विनाऽपि सिद्धिः,
वातूलता काऽपि नवा[१] तवात्मन् ! ॥६५॥

१०/४ कस्ते निरञ्जन ! चिरं जनरञ्जनेन,
धीमन् ! गुणोऽस्ति ? परमार्थदृशेति पश्य ।
तं रञ्जयाशु विशदैश्चरितैर्भवाब्धौ,
यस्त्वां पतन्तमबलं परिपातुमीष्टे ॥६६॥

१५/६ कृताकृतं स्वस्य तपोजपादि,
शक्तीरशक्तीः सुकृतेतरे[१] च ।
सदा समीक्षस्व हृदाऽथ साध्ये,
यतस्व हेयं त्यज चाव्ययार्थी ॥६७॥

१०/१० किमर्दयन् निर्दयमङ्गिनो लघून्,
विचेष्टसे कर्मसु ही प्रमादतः ? ।
यदेकशोऽप्यन्यकृतार्दनः,
सहत्यनन्तशोऽप्यङ्गययमर्दनं भवे ॥६८॥

१४/८ इहामुत्र च वैराय, दुर्वाचो नरकाय च ।
अग्निदग्धाः प्ररोहन्ति, दुर्वाग्दग्धा पुनर्न हि ॥६९॥

१४/९ अत एव जिना दीक्षा-कालादाकेवलोद्भवम् ।
अवद्यादिभिया ब्रूयुः, ज्ञानत्रयभृतोऽपि न ॥७०॥

१/९ न यस्य मित्रं न च कोऽपि शत्रुः,
निजः परो वाऽपि न कश्चनास्ते ।
न चेन्द्रियार्थेषु रमेत चेतः,
कषायमुक्तः परमः स योगी ॥७१॥

१५/९ कुर्या न कुत्रापि ममत्वभावं, न च प्रभो ! रत्यरती कषायान् ।
इहापि सौख्यं लभसेऽप्यनीहो, ह्यनुत्तरामर्त्यसुखाभमात्मन् ! ॥७२॥

१६/३ निःसङ्गतामेहि सदा तदात्मन् ! अर्थेष्वशेषेष्वपि साम्यभावात् ।
अवेहि विद्वन् ! ममतैव मूलं, शुचां सुखानां समतैव चेति ॥७३॥

१६/५ तमेव सेवस्व गुरुं प्रयत्नाद्, अधीष्व शास्त्राण्यपि तानि विद्वन् ! ।
तदेव तत्त्वं परिभावयात्मन् ! येभ्यो भवेत् साम्यसुधोपभोगः ॥७४॥

१३/२ स्वाध्यायमाधित्ससि नो प्रमादैः, शुद्धा न गुप्तीः समितीश्च धत्से ।
तपो द्विधा नार्जसि देहमोहाद्, अल्पेऽपि हेतौ दधसे कषायान् ॥७५॥

१३/३ परिषहान् नो सहसे न चोप-
सर्गान्न शीलाङ्गधरोऽपि चासि ।
तन्मोक्ष्यमाणोऽपि भवाब्धिपारं,
मुने ! कथं यास्यसि वेषमात्रात् ? ॥७६॥

१३/९ नाजीविकाप्रणयिनीतनयादिचिन्ता,
नो राजभीश्च भगवत्समयं च वेत्सि ।
शुद्धे तथाऽपि चरणे यतसे न भिक्षो !
तत्ते परिग्रहभरो नरकार्थमेव ॥७७॥

१३/११ उच्चारयस्यनुदिनं न करोमि सर्वं,
सावद्यमित्यसकृदेतदथो करोषि ।
नित्यं मृषोक्तिजिनवञ्चनभारितात् तत्,
सावद्यतो नरकमेव विभावये ते ॥७८॥

१३/१२ वेषोपदेशाद्युपधिप्रतारिता,
ददत्यभीष्टानृजवोऽधुना जनाः ।
भुङ्क्षे च शेषे च सुखं विचेष्टसे,
भवान्तरे ज्ञास्यसि तत्फलं पुनः ॥७९॥

१३/१६ गृह्णासि शय्याऽऽहृतिपुस्तकोपधीन्,
सदा परेभ्यः तपसस्त्वियं स्थितिः ।
तत्ते प्रमादाद् भरितात् प्रतिग्रहैः,
ऋणार्णमग्नस्य परत्र का गतिः ? ॥८०॥

१३/१३ आजीविकादिविविधार्त्तिभृशानिशार्त्ताः,
कृच्छ्रेण केऽपि महतैव सृजन्ति धर्मान् ।
तेभ्योऽपि निर्दय ! जिघृक्षसि सर्वमिष्टं,
नो संयमे च यतसे भविता कथं ही ? ॥८१॥

१३/२२ भवेद् गुणी मुग्धकृतैर्न हि स्तवैः,
न ख्यातिदानार्चनवन्दनादिभिः ।
विना गुणान् नो भवदुःखसंक्षयः,
ततो गुणानर्जय किं स्तवादिभिः ? ॥८२॥

१३/८ गुणांस्तवाश्रित्य नमन्त्यमी जना,
ददत्युपध्यालयभैक्ष्यशिष्यकान् ।
विना गुणान् वेषमृषेः बिभर्षि चेत्,
ततष्ठकानां तव भाविनी गतिः ॥८३॥

१३/२४ परिग्रहं चेद् व्यजहा गृहादेः, तत् किं नु धर्मोपकृतिच्छलात् तं ।
करोषि शय्योपधिपुस्तकादेः, गरोऽपि नामान्तरतोऽपि हन्ता ॥८४॥

१३/२७ रक्षार्थं खलु संयमस्य गदिता, येऽर्था यतिनां जिनैः,
वासःपुस्तकपात्रकप्रभृतयो धर्मोपकृत्यात्मकाः ।
मूर्छन्मोहवशात् त एव कुधियां संसारपाताय धिक्,
स्वं स्वस्यैव वधाय शस्त्रमधियां यद् दुष्प्रयुक्तं भवेत् ॥८५॥

१३/२८ संयमोपकरणच्छलात् परान्, भारयन् यदसि पुस्तकादिभिः ।
गोखरोष्ट्रमहिषादिरूपभृत्, तच्चिरं त्वमपि भारयिष्यसे ॥८६॥

१३/५५ विराधितैः संयमसर्वयोगैः,
पतिष्यतस्ते भवदुःखराशौ ।
शास्त्राणि शिष्योपधिपुस्तकाद्या,
भक्ताश्च लोका शरणाय नालम् ॥८७॥

१३/२९ वस्त्रपात्रतनुपुस्तकादिनः, शोभया न खलु संयमस्य सा ।
आदिमा च ददते भवं परा, मुक्तिमाश्रय तदिच्छयैकिकाम् ॥८८॥

१३/३२ यदत्र कष्टं चरणस्य पालने,
परत्र तिर्यङ्नरकेषु यत्पुनः ।
तयोर्मिथः सप्रतिपक्षता स्थिता,
विशेषदृष्ट्याऽन्यतरं जहीहि तत् ॥८९॥

१३/३६ अणीयसा साम्यनियन्त्रणाभुवा,
मुनेऽत्र कष्टेन चरित्रजेन च ।
यदि क्षयो दुर्गतिगर्भवासगा-
सुखावलेस्तत् किमवापि नार्थितम् ? ॥९०॥

१३/३७ त्यज स्पृहां स्वःशिवशर्मलाभे, स्वीकृत्य तिर्यङ्नरकादिदुःखम् ।
सुखाणुभिश्चेद् विषयादिजातैः, सन्तोष्यसे संयमकष्टभीरुः ॥९१॥

१३/३३ शमत्र यद् बिन्दुरिव प्रमादजं,
परत्र यच्चाब्धिरिव द्युमुक्तिजम् ।
तयोर्मिथः सप्रतिपक्षता स्थिता,
विशेषदृष्ट्याऽन्यतरद् गृहाण तत् ॥९२॥

१३/३४ नियन्त्रणा या चरणेऽत्र तिर्यक्-स्त्रीगर्भकुम्भीनरकेषु या च ।
तयोर्मिथः सप्रतिपक्षभावाद्, विशेषदृष्ट्याऽन्यतरां गृहाण ॥९३॥

१३/३५ सह तपोयमसंयमयन्त्रणां, स्ववशतासहने हि गुणो महान् ।
परवशस्त्वतिभूरि सहिष्यसे, न च गुणं बहुमाप्स्यसि कञ्चन ॥९४॥

१३/३८ समग्रचिन्तार्त्तिहृतेरिहापि, यस्मिन् सुखं स्यात् परमं रतानाम् ।
परत्र चेन्द्रादिमहोदयश्रीः, प्रमाद्यसीहापि कथं चरित्रे ? ॥९५॥

१३/३९ महातपोध्यानपरीषहादि,
न सत्त्वसाध्यं यदि धर्त्तुमीशः ।
तद् भावनाः किं समितीश्च गुप्तीः,
धत्से शिवार्थिन् ! न मनःप्रसाध्याः ? ॥९६॥

१३/४३ ध्रुवः प्रमादैर्भववारिधौ मुने !,
तव प्रपातः परमत्सरः पुनः ।
गले निबद्धोरुशिलोपमोऽस्ति चेत्,
कथं तदोन्मज्जनमप्यवाप्स्यसि ? ॥९७॥

१३/४४ महर्षयः केऽपि सहन्त्युदीर्या-
प्युग्रातपादीन् यदि निर्जरार्थम् ।
कष्टं प्रसङ्गागतमप्यणीयो-
ऽपीच्छन् शिवं किं सहसे न भिक्षो !? ॥९८॥

१३/४६ दधद् गृहस्थेषु ममत्वबुद्धिं, तदीयतप्त्या परितप्यमानः ।
अनिवृत्तान्तःकरणः सदा स्वैः, तेषां च पापैर्भ्रमिता भवेऽसि ॥९९॥

१३/४७ त्यक्त्वा गृहं स्वं परगेहचिन्ता-तप्तस्य को नाम गुणस्तवर्षे ! ? ।
आजीविकास्ते यतिवेषतोऽत्र, सुदुर्गतिः प्रेत्य तु दुर्निवारा ॥१००॥

१३/४८ कुर्वे न सावद्यमिति प्रतिज्ञां,
वदन्नकुर्वन्नपि देहमात्रात् ।
शय्यादिकृत्येषु नुदन् गृहस्थान्,
हृदा गिरा वाऽसि कथं मुमुक्षुः ? ॥१०१॥

१३/५६ यस्य क्षणोऽपि सुरधामसुखानि पल्य-
कोटीर्नृणां द्विनवतीं ह्यधिकां ददाति ।
किं हारयस्यधम ! संयमजीवितं तत् ?,
हा ! हा ! प्रमत्त ! पुनरस्य कुतस्तवाप्तिः ? ॥१०२॥

१३/५७ नाम्नाऽपि यस्येति जनेऽसि पूज्यः,
शुद्धात् ततो नेष्टसुखानि कानि ? ।
तत् संयमेऽस्मिन् यतसे मुमुक्षो !,
ऽनुभूयमानोरूफलेऽपि किं न ? ॥१०३॥

१३/६ जानेऽस्ति संयमतपोभिरमीभिरात्मन् !,
अस्य प्रतिग्रहभरस्य न निष्क्रयोऽपि ।
किं दुर्गतौ निपततः शरणं तवास्ते ?,
सौख्यञ्च दास्यति परत्र किमित्यवेहि ॥१०४॥

१३/१७ न काऽपि सिद्धिर्न च तेऽतिशायि,
मुने ! क्रियायोगतपःश्रुतादि ।
तथाऽप्यहङ्कारकदर्थितस्त्वं,
ख्यातीच्छया ताम्यसि धिङ्मुधा किम् ? ॥१०५॥

१३/१८ हीनोऽप्यरे ! भाग्यगुणैर्मुधाऽऽत्मन् !,
वाञ्छंस्तवार्चाद्यनवाप्नुवंश्च ।
ईर्ष्यन् परेभ्यो लभसेऽतितापं,
इहापि याता कुगतिं परत्र ॥१०६॥

१३/३० शीतातपाद्यान् न मनागपीह,
परीषहांश्चेत् क्षमसे विसोढुम् ।
कथं ततो नारकगर्भवास-
दुःखानि सोढाऽसि भवान्तरे त्वम् ? ॥१०७॥

१३/३१ मुने ! न किं नश्वरमस्वदेह-
मृत्पिण्डमेनं सुतपोव्रताद्यैः ।
निपीड्य भीतिर्भवदुःखराशेः,
हित्वाऽऽत्मसाच्छैवसुखं करोषि ? ॥१०८॥

# જ્ઞાનસાર સૂક્ત - રત્ન - મંજૂષા

## यशोविजयकृतः ज्ञानसारः

१/१ ऐन्द्रश्रीसुखमग्नेन, लीलालग्नमिवाखिलम् ।
सच्चिदानन्दपूर्णेन, पूर्णं जगदवेक्ष्यते ॥१॥

१/४ जागर्ति ज्ञानदृष्टिश्चेत्, तृष्णाकृष्णाहिजाङ्गुली ।
पूर्णानन्दस्य तत् किं स्याद्, दैन्यवृश्चिकवेदना ? ॥२॥

१/७ परस्वत्वकृतोन्माथा, भूनाथा न्यूनतेक्षिणः ।
स्वस्वत्वसुखपूर्णस्य, न्यूनता न हरेरपि ॥३॥

२/२ यस्य ज्ञानसुधासिन्धौ, परब्रह्मणि मग्नता ।
विषयान्तरसंचारः, तस्य हालाहलोपमः ॥४॥

२/३ स्वभावसुखमग्नस्य, जगत्तत्त्वावलोकिनः ।
कर्तृत्वं नान्यभावानां, साक्षित्वमवशिष्यते ॥५॥

२/६ ज्ञानमग्नस्य यच्छर्म, तद्वक्तुं नैव शक्यते ।
नोपमेयं प्रियाश्लेषैः, नापि तच्चन्दनद्रवैः ॥६॥

३/४ अन्तर्गतं महाशल्यं, अस्थैर्यं यदि नोद्धृतम् ।
क्रियौषधस्य को दोषः, तदा गुणमयच्छतः ? ॥७॥

४/१ अहं ममेति मन्त्रोऽयं, मोहस्य जगदान्ध्यकृत् ।
अयमेव हि नञ्पूर्वः, प्रतिमन्त्रोऽपि मोहजित् ॥८॥

४/२ शुद्धात्मद्रव्यमेवाहं, शुद्धज्ञानं गुणो मम ।
नान्योऽहं न ममान्ये चेत्यदो मोहास्त्रमुल्बणम् ॥९॥

५/१ मज्जत्यज्ञः किलाज्ञाने, विष्ठायामिव शूकरः ।
ज्ञानी निमज्जति ज्ञाने, मराल इव मानसे ॥१०॥

५/८ पीयूषमसमुद्रोत्थं, रसायनमनौषधम् ।
अनन्यापेक्षमैश्वर्यं, ज्ञानमाहुर्मनीषिणः ॥११॥

६/१ विकल्पविषयोत्तीर्णः, स्वभावालम्बनः सदा ।
ज्ञानस्य परिपाको यः, स शमः परिकीर्तितः ॥१२॥

६/५ ज्ञानध्यानतपःशील-सम्यक्त्वसहितोऽप्यहो ! ।
तं नाप्नोति गुणं साधुः, यं प्राप्नोति शमान्वितः ॥१३॥

६/६ स्वयम्भूरमणस्पर्द्धि-वर्धिष्णुसमतारसः ।
मुनिर्येनोपमीयेत, कोऽपि नासौ चराचरे ॥१४॥

६/७ शमसूक्तसुधासिक्तं, येषां नक्तंदिनं मनः ।
कदाऽपि ते न दह्यन्ते, रागोरगविषोर्मिभिः ॥१५॥

७/१ बिभेषि यदि संसारात्, मोक्षप्राप्तिं च काङ्क्षसि ।
तदेन्द्रियजयं कर्तुं, स्फोरय स्फारपौरुषम् ॥१६॥

७/४ आत्मानं विषयैः पाशैः, भववासपराङ्मुखम् ।
इन्द्रियाणि निबध्नन्ति, मोहराजस्य किङ्कराः ॥१७॥

७/७ पतङ्गभृङ्गमीनेभ-सारङ्गा यान्ति दुर्दशाम् ।
एकैकेन्द्रियदोषाच्चेद्, दुष्टैस्तैः किं न पञ्चभिः ? ॥१८॥

७/८ विवेकद्विपहर्यक्षैः, समाधिधनतस्करैः ।
इन्द्रियैर्यो न जितोऽसौ, धीराणां धुरि गण्यते ॥१९॥

८/२ युष्माकं सङ्गमोऽनादिः, बन्धवोऽनियतात्मनाम् ।
ध्रुवैकरूपान् शीलादि-बन्धूनित्यधुना श्रये ॥२०॥

८/५ गुरुत्वं स्वस्य नोदेति, शिक्षासात्म्येन यावता ।
आत्मतत्त्वप्रकाशेन, तावत् सेव्यो गुरूत्तमः ॥२१॥

९/१ ज्ञानी क्रियापरः शान्तो, भावितात्मा जितेन्द्रियः ।
स्वयं तीर्णो भवाम्भोधेः, परांस्तारयितुं क्षमः ॥२२॥

९/२ क्रियाविरहितं हन्त !, ज्ञानमात्रमनर्थकम् ।
गतिं विना पथज्ञोऽपि, नाप्नोति पुरमीप्सितम् ॥२३॥

९/४ बाह्यभावं पुरस्कृत्य, येऽक्रिया व्यवहारतः ।
वदने कवलक्षेपं, विना ते तृप्तिकाङ्क्षिणः ॥२४॥

९/५ गुणवद्बहुमानादेः, नित्यस्मृत्या च सत्क्रिया ।
जातं न पातयेद् भावम्, अजातं जनयेदपि ॥२५॥

९/६ क्षायोपशमिके भावे, या क्रिया क्रियते तया ।
पतितस्यापि तद्भाव-प्रवृद्धिर्जायते पुनः ॥२६॥

९/७ गुणवृद्ध्यै ततः कुर्यात्, क्रियामस्खलनाय वा ।
एकं तु संयमस्थानं, जिनानामवतिष्ठते ॥२७॥

१०/२ स्वगुणैरेव तृप्तिश्चेद्, आकालमविनश्वरी ।
ज्ञानिनो विषयैः किं तैः, यैर्भवेत् तृप्तिरित्वरी ? ॥२८॥

१०/३ या शान्तैकरसास्वादाद्, भवेत् तृप्तिरतीन्द्रिया ।
सा न जिह्वेन्द्रियद्वारा, षड्रसास्वादनादपि ॥२९॥

१०/५ पुद्गलैः पुद्गलास्तृप्तिं, यान्त्यात्मा पुनरात्मना ।
परतृप्तिसमारोपो, ज्ञानिनस्तन्न युज्यते ॥३०॥

१०/७ विषयोर्मिविषोद्गारः, स्यादतृप्तस्य पुद्गलैः ।
ज्ञानतृप्तस्य तु ध्यान-सुधोद्गारपरम्परा ॥३१॥

१०/८ सुखिनो विषयातृप्ता, नेन्द्रोपेन्द्रादयोऽप्यहो ! ।
भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः ॥३२॥

११/२ नाहं पुद्गलभावानां, कर्ता कारयिताऽपि च ।
नानुमन्ताऽपि चेत्यात्म-ज्ञानवान् लिप्यते कथम् ? ॥३३॥

१०/६ अलिप्तो निश्चयेनात्मा, लिप्तश्च व्यवहारतः ।
शुद्ध्यत्यलिप्तया ज्ञानी, क्रियावान् लिप्तया दृशा ॥३४॥

१२/१ स्वभावलाभात् किमपि, प्राप्तव्यं नावशिष्यते ।
इत्यात्मैश्वर्यसम्पन्नो, निःस्पृहो जायते मुनिः ॥३५॥

१२/२ संयोजितकरैः के के, प्रार्थ्यन्ते न स्पृहावहैः ? ।
अमात्रज्ञानपात्रस्य, निःस्पृहस्य तृणं जगत् ॥३६॥

१२/७ भूशय्या भैक्षमशनं, जीर्णं वासो वनं गृहम् ।
तथाऽपि निःस्पृहस्याहो !, चक्रिणोऽप्यधिकं सुखम् ॥३७॥

१२/८ परस्पृहा महादुःखं, निःस्पृहत्वं महासुखम् ।
एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥३८॥

१३/४ यतः प्रवृत्तिर्न मणौ, लभ्यते वा न तत्फलम् ।
अतात्त्विकी मणिज्ञप्तिः, मणिश्रद्धा च सा यथा॥३९॥

१३/५ तथा यतो न शुद्धात्म-स्वभावाचरणं भवेत् ।
फलं दोषनिवृत्तिर्वा, न तज्ज्ञानं न दर्शनम् ॥४०॥

१३/७ सुलभं वागनुच्चारं, मौनमेकेन्द्रियेष्वपि ।
पुद्गलेष्वप्रवृत्तिस्तु, योगानां मौनमुत्तमम् ॥४१॥

१४/३ तरङ्गतरलां लक्ष्मीम्, आयुर्वायुवदस्थिरम् ।
अदभ्रधीरनुध्यायेद्, अभ्रवद् भङ्गुरं वपुः ॥४२॥

१४/४ शुचीन्यप्यशुचीकर्तुं, समर्थेऽशुचिसम्भवे ।
देहे जलादिना शौच-भ्रमो मूढस्य दारुणः ॥४३॥

१५/२ देहात्माद्यविवेकोऽयं, सर्वदा सुलभो भवे ।
भवकोट्याऽपि तद्भेद-विवेकस्त्वतिदुर्लभः ॥४४॥

१५/८ संयमास्त्रं विवेकेन, शाणेनोत्तेजितं मुनेः ।
धृतिधारोल्बणं कर्म-शत्रुच्छेदक्षमं भवेत् ॥४५॥

१६/२ मनोवत्सो युक्तिगवीं, मध्यस्थस्यानुधावति ।
तामाकर्षति पुच्छेन, तुच्छाग्रहमनःकपिः ॥४६॥

१६/४ स्वस्वकर्मकृतावेशाः, स्वस्वकर्मभुजो नराः ।
न रागं नापि च द्वेषं, मध्यस्थस्तेषु गच्छति ॥४७॥

१६/७ स्वागमं रागमात्रेण, द्वेषमात्रात् परागमम् ।
न श्रयामस्त्यजामो वा, किन्तु मध्यस्थया दृशा ॥४८॥

१६/८ मध्यस्थया दृशा सर्वेष्वपुनर्बन्धकादिषु ।
चारिसंजीवनीचार-न्यायादाशास्महे हितम् ॥४९॥

१७/१ यस्य नास्ति परापेक्षा, स्वभावाद्वैतगामिनः ।
तस्य किं न भयभ्रान्ति-क्लान्तिसन्तानतानवम् ? ॥५०॥

१७/२ भवसौख्येन किं भूरि-भयज्वलनभस्मना ? ।
सदा भयोज्झितज्ञान-सुखमेव विशिष्यते ॥५१॥

१७/३ न गोप्यं क्वापि नारोप्यं, हेयं देयं च न क्वचित् ।
क्व भयेन मुनेः स्थेयं, ज्ञेयं ज्ञानेन पश्यतः ? ॥५२॥

१७/६ कृतमोहास्त्रवैफल्यं, ज्ञानवर्म बिभर्ति यः ।
क्व भीस्तस्य क्व वा भङ्गः, कर्मसङ्गरकेलिषु ? ॥५३॥

१७/८ चित्ते परिणतं यस्य, चारित्रमकुतोभयम् ।
अखण्डज्ञानराज्यस्य, तस्य साधोः कुतो भयम् ? ॥५४॥

१८/१ गुणैर्यदि न पूर्णोऽसि, कृतमात्मप्रशंसया ।
गुणैरेवासि पूर्णश्चेत्, कृतमात्मप्रशंसया ॥५५॥

१८/२ श्रेयोद्रुमस्य मूलानि, स्वोत्कर्षाम्भःप्रवाहतः ।
पुण्यानि प्रकटीकुर्वन्, फलं किं समवाप्स्यसि ? ॥५६॥

१८/३ आलम्बिता हिताय स्युः, परैः स्वगुणरश्मयः ।
अहो ! स्वयं गृहीतास्तु, पातयन्ति भवोदधौ ॥५७॥

१८/४ उच्चत्वदृष्टिदोषोत्थ-स्वोत्कर्षज्वरशान्तिकम् ।
पूर्वपुरुषसिंहेभ्यो, भृशं नीचत्वभावनम् ॥५८॥

१८/५ शरीररूपलावण्य-ग्रामारामधनादिभिः ।
उत्कर्षः परपर्यायैः, चिदानन्दघनस्य कः ? ॥५९॥

१८/६ शुद्धाः प्रत्यात्मसाम्येन, पर्यायाः परिभाविताः ।
अशुद्धाश्चापकृष्टत्वात्, नोत्कर्षाय महामुनेः ॥६०॥

१८/७ क्षोभं गच्छन् समुद्रोऽपि, स्वोत्कर्षपवनेरितः ।
गुणौघान् बुद्बुदीकृत्य, विनाशयसि किं मुधा ? ॥६१॥

१९/१ रूपे रूपवती दृष्टिः, दृष्ट्वा रूपं विमुह्यति ।
मज्जत्यात्मनि नीरूपे, तत्त्वदृष्टिस्त्वरूपिणी ॥६२॥

१९/३ ग्रामारामादि मोहाय, यद् दृष्टं बाह्यया दृशा ।
तत्त्वदृष्ट्या तदेवान्तर्, नीतं वैराग्यसम्पदे ॥६३॥

१९/४ बाह्यदृष्टेः सुधासार-घटिता भाति सुन्दरी ।
तत्त्वदृष्टेस्तु सा साक्षाद्, विण्मूत्रपिठरोदरी ॥६४॥

१९/५ लावण्यलहरीपुण्यं, वपुः पश्यति बाह्यदृग् ।
तत्त्वदृष्टिः श्वकाकानां, भक्ष्यं कृमिकुलाकुलम् ॥६५॥

१९/६ गजाश्वैर्भूपभवनं, विस्मयाय बहिर्दृशः ।
तत्राश्वेभवनात् कोऽपि, भेदस्तत्त्वदृशस्तु न ॥६६॥

१९/७ भस्मना केशलोचेन, वपुर्धृतमलेन वा ।
महान्तं बाह्यदृग् वेत्ति, चित्साम्राज्येन तत्त्ववित् ॥६७॥

२०/१ बाह्यदृष्टिप्रचारेषु, मुद्रितेषु महात्मनः ।
अन्तरेवावभासन्ते, स्फुटाः सर्वाः समृद्धयः ॥६८॥

२०/२ समाधिर्नन्दनं धैर्यं, दम्भोलिः समता शची ।
ज्ञानं महाविमानं च, वासवश्रीरियं मुनेः ॥६९॥

२१/१ दुःखं प्राप्य न दीनः स्यात्, सुखं प्राप्य च विस्मितः ।
मुनिः कर्मविपाकस्य, जानन् परवशं जगत् ॥७०॥

२१/२ येषां भ्रूभङ्गमात्रेण, भज्यन्ते पर्वता अपि ।
तैरहो ! कर्मवैषम्ये, भूपैर्भिक्षाऽपि नाप्यते ॥७१॥

२१/३ जातिचातुर्यहीनोऽपि, कर्मण्यभ्युदयावहे ।
क्षणाद् रङ्कोऽपि राजा स्यात्, छत्रच्छन्नदिगन्तरः ॥७२॥

२१/५ आरूढाः प्रशमश्रेणिं, श्रुतकेवलिनोऽपि च ।
भ्राम्यन्तेऽनन्तसंसारं, अहो ! दुष्टेन कर्मणा ॥७३॥

२२/६ तैलपात्रधरो यद्वद्, राधावेधोद्यतो यथा ।
क्रियास्वनन्यचित्तः स्याद्, भवभीतस्तथा मुनिः ॥७४॥

२३/१ प्राप्तः षष्ठं गुणस्थानं, भवदुर्गाद्रिलङ्घनम् ।
लोकसंज्ञारतो न स्याद्, मुनिर्लोकोत्तरस्थितिः ॥७५॥

२३/२ यथा चिन्तामणिं दत्ते, बठरो बदरीफलैः ।
हहा ! जहाति सद्धर्मं, तथैव जनरञ्जनैः ॥७६॥

२३/४ लोकमालम्ब्य कर्तव्यं, कृतं बहुभिरेव चेत् ।
तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात् कदाचन ॥७७॥

२३/५ श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे न च ।
स्तोका हि रत्नवणिजः, स्तोकाश्च स्वात्मसाधकाः ॥७८॥

२३/७ आत्मसाक्षिकसद्धर्म-सिद्धौ किं लोकयात्रया ? ।
तत्र प्रसन्नचन्द्रश्च, भरतश्च निदर्शने ॥७९॥

२४/१ चर्मचक्षुर्भृतः सर्वे, देवाश्चावधिचक्षुषः ।
सर्वतश्चक्षुषः सिद्धाः, साधवः शास्त्रचक्षुषः ॥८०॥

२४/४ शास्त्रे पुरस्कृते तस्माद्, वीतरागः पुरस्कृतः ।
पुरस्कृते पुनस्तस्मिन्, नियमात् सर्वसिद्धयः ॥८१॥

२४/५ अदृष्टार्थेऽनुधावन्तः, शास्त्रदीपं विना जडाः ।
प्राप्नुवन्ति परं खेदं, प्रस्खलन्तः पदे पदे ॥८२॥

२४/६ शुद्धोञ्छाद्यपि शास्त्राज्ञा-निरपेक्षस्य नो हितम् ।
भौतहन्तुर्यथा तस्य, पदस्पर्शनिवारणम् ॥८३॥

२४/७ अज्ञानाहिमहामन्त्रं, स्वाच्छन्द्यज्वरलङ्घनम् ।
धर्मारामसुधाकुल्यां, शास्त्रमाहुर्महर्षयः ॥८४॥

२५/३ यस्त्यक्त्वा तृणवद् बाह्यं, आन्तरं च परिग्रहम् ।
उदास्ते तत्पदाम्भोजं, पर्युपास्ते जगत्त्रयी ॥८५॥

२५/४ चित्तेऽन्तर्ग्रन्थगहने, बहिर्निर्ग्रन्थता वृथा ।
त्यागात्कञ्चुकमात्रस्य, भुजगो न हि निर्विषः ॥८६॥

२५/८ मूर्च्छाच्छन्नधियां सर्वं, जगदेव परिग्रहः ।
मूर्च्छया रहितानां तु, जगदेवापरिग्रहः ॥८७॥

२६/१ सन्ध्येव दिनरात्रिभ्यां, केवलश्रुतयोः पृथक् ।
बुधैरनुभवो दृष्टः, केवलार्कारुणोदयः ॥८८॥

२६/२ व्यापारः सर्वशास्त्राणां, दिक्प्रदर्शन एव हि ।
पारं तु प्रापयत्येको-ऽनुभवो भववारिधेः ॥८९॥

२६/४ ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः ।
कालेनैतावता प्राज्ञैः, कृतः स्यात् तेषु निश्चयः ॥९०॥

२७/१ मोक्षेण योजनाद् योगः, सर्वोऽप्याचार इष्यते ।
विशिष्य स्थानवर्णार्थालम्बनैकाग्र्यगोचरः ॥९१॥

२७/३ कृपानिर्वेदसंवेग-प्रशमोत्पत्तिकारिणः ।
भेदाः प्रत्येकमत्रेच्छा-प्रवृत्तिस्थिरसिद्धयः ॥९२॥

२७/४ इच्छा तद्वत्कथाप्रीतिः, प्रवृत्तिः पालनं परम् ।
स्थैर्यं बाधकभीहानिः, सिद्धिरन्यार्थसाधनम् ॥९३॥

२७/७ प्रीतिभक्तिवचोऽसङ्गैः, स्थानाद्यपि चतुर्विधम् ।
तस्मादयोगयोगाप्तेः, मोक्षयोगः क्रमाद् भवेत् ॥९४॥

२७/८ स्थानाद्ययोगिनस्तीर्थोच्छेदाद्यालम्बनादपि ।
सूत्रदाने महादोष, इत्याचार्याः प्रचक्षते ॥९५॥

२९/८ द्रव्यपूजोचिता भेदोपासना गृहमेधिनाम् ।
भावपूजा तु साधूनां, अभेदोपासनात्मिका ॥९६॥

३०/१ ध्याता ध्येयं तथा ध्यानं, त्रयं यस्यैकतां गतम् ।
मुनेरनन्यचित्तस्य, तस्य दुःखं न विद्यते ॥९७॥

३०/२ ध्याताऽन्तरात्मा ध्येयस्तु, परमात्मा प्रकीर्तितः ।
ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता ॥९८॥

३१/१ ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात् तपः ।
तदाभ्यन्तरमेवेष्टं, बाह्यं तदुपबृंहकम् ॥९९॥

३१/२ आनुश्रोतसिकी वृत्तिः, बालानां सुखशीलता ।
प्रातिश्रोतसिकी वृत्तिः, ज्ञानिनां परमं तपः ॥१००॥

३१/३ धनार्थिनां यथा नास्ति, शीततापादि दुःसहम् ।
तथा भवविरक्तानां, तत्त्वज्ञानार्थिनामपि ॥१०१॥

३१/४ सदुपायप्रवृत्तानां, उपेयमधुरत्वतः ।
ज्ञानिनां नित्यमानन्द-वृद्धिरेव तपस्विनाम् ॥१०२॥

३१/६ यत्र ब्रह्म जिनार्चा च, कषायाणां तथा हतिः ।
सानुबन्धा जिनाज्ञा च, तत् तपः शुद्धमिष्यते ॥१०३॥

३१/७ तदेव हि तपः कार्यं, दुर्ध्यानं यत्र नो भवेत् ।
येन योगा न हीयन्ते, क्षीयन्ते नेन्द्रियाणि च ॥१०४॥

उप./६ निर्विकारं निराबाधं, ज्ञानसारमुपेयुषाम् ।
विनिवृत्तपराशानां, मोक्षोऽत्रैव महात्मनाम् ॥१०५॥

उप./९ क्लेशक्षयो हि मण्डुक-चूर्णतुल्यः क्रियाकृतः ।
दग्धतच्चूर्णसदृशो, ज्ञानसारकृतः पुनः ॥१०६॥

उप./१० ज्ञानपूतां परेऽप्याहुः, क्रियां हेमघटोपमाम् ।
युक्तं तदपि तद्भावं, न यद् भग्नाऽपि सोज्झति ॥१०७॥

उप./११ क्रियाशून्यं च यद् ज्ञानं, ज्ञानशून्या च या क्रिया ।
अनयोरन्तरं ज्ञेयं, भानुखद्योतयोरिव ॥१०८॥

## અધ્યાત્મસાર સૂક્ત - રત્ન - મંજૂષા

### यशोविजयकृतः अध्यात्मसारः

१/१ ऐन्द्रश्रेणिनतः श्रीमान्, नन्दतान्नाभिनन्दनः ।
उद्दधार युगादौ यो, जगदज्ञानपङ्कतः ॥१॥

१/७ शास्त्रात् परिचितां सम्यक्, सम्प्रदायाच्च धीमताम् ।
इहानुभवयोगाच्च, प्रक्रियां कामपि ब्रुवे ॥२॥

१/१० अध्यात्मशास्त्रसम्भूत-सन्तोषसुखशालिनः ।
गणयन्ति न राजानं, न श्रीदं नापि वासवम् ॥३॥

१/१२ दम्भपर्वतदम्भोलिः, सौहार्दाम्बुधिचन्द्रमाः ।
अध्यात्मशास्त्रमुत्ताल-मोहजालवनानलः ॥४॥

१/१४ येषामध्यात्मशास्त्रार्थ-तत्त्वं परिणतं हृदि ।
कषायविषयावेश-क्लेशस्तेषां न कर्हिचित् ॥५॥

१/१५ निर्दयः कामचण्डालः, पण्डितानपि पीडयेत् ।
यदि नाध्यात्मशास्त्रार्थ-बोधयोधकृपा भवेत् ॥६॥

८/१६ विषवल्लिसमां तृष्णां, वर्धमानां मनोवने ।
अध्यात्मशास्त्रदात्रेण, छिन्दन्ति परमर्षयः ॥७॥

१/१७ वने वेश्म, धनं दौःस्थ्ये, तेजो ध्वान्ते, जलं मरौ ।
दुरापमाप्यते धन्यैः, कलावध्यात्मवाङ्मयम् ॥८॥

१/१९ भुजाऽऽस्फालनहस्तास्य-विकाराभिनयाः परे ।
अध्यात्मशास्त्रविज्ञास्तु, वदन्त्यविकृतेक्षणाः ॥९॥

१/२१ रसो भोगावधिः कामे, सद्भक्ष्ये भोजनावधिः ।
अध्यात्मशास्त्रसेवायां, रसो निरवधिः पुनः ॥१०॥

१/२२ धनिनां पुत्रदारादि, यथा संसारवृद्धये ।
तथा पाण्डित्यदृप्तानां, शास्त्रमध्यात्मवर्जितम् ॥११॥

२/२ गतमोहाधिकाराणां, आत्मानमधिकृत्य या ।
प्रवर्तते क्रिया शुद्धा, तदध्यात्मं जगुर्जिनाः ॥१२॥

२/५ आहारोपधिपूजर्द्धि-गौरवप्रतिबन्धतः ।
भवाभिनन्दी यां कुर्यात्, क्रियां साऽध्यात्मवैरिणी ॥१३॥

२/६ क्षुद्रो लाभरतिर्दीनो, मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्यात्, निष्फलारम्भसङ्गतः ॥१४॥

२/१२ ज्ञानं शुद्धं क्रिया शुद्धेत्यंशौ द्वाविह सङ्गतौ ।
चक्रे महारथस्येव, पक्षाविव पतत्रिणः ॥१५॥

२/१६ अशुद्धाऽपि हि शुद्धायाः, क्रिया हेतुः सदाशयात् ।
ताम्रं रसानुवेधेन, स्वर्णत्वमधिगच्छति ॥१६॥

२/१७ अतो मार्गप्रवेशाय, व्रतं मिथ्यादृशामपि ।
द्रव्यसम्यक्त्वमारोप्य, ददते धीरबुद्धयः ॥१७॥

२/१८ यो बुद्ध्वा भवनैर्गुण्यं, धीरः स्याद् व्रतपालने ।
स योग्यो भावभेदस्तु, दुर्लक्ष्यो नोपयुज्यते ॥१८॥

२/१९ नो चेद् भावापरिज्ञानात्, सिद्ध्यसिद्धिपराहतेः ।
दीक्षाऽदानेन भव्यानां, मार्गोच्छेदः प्रसज्यते ॥१९॥

२/२० अशुद्धानादरेऽभ्यासायोगान्नो दर्शनाद्यपि ।
सिद्ध्येन्निसर्गजं मुक्त्वा, तदप्याभ्यासिकं यतः ॥२०॥

२/२१ शुद्धमार्गानुरागेणाशठानां या तु शुद्धता ।
गुणवत्परतन्त्राणां, सा न क्वापि विहन्यते ॥२१॥

२/२७ गुर्वाज्ञापारतन्त्र्येण, द्रव्यदीक्षाग्रहादपि ।
वीर्योल्लासक्रमात् प्राप्ता, बहवः परमं पदम् ॥२२॥

३/३ दम्भेन व्रतमास्थाय, यो वाञ्छति परं पदम् ।
लोहनावं समारुह्य, सोऽब्धेः पारं यियासति ॥२३॥

३/४ किं व्रतेन तपोभिर्वा ?, दम्भश्चेन्न निराकृतः ।
किमादर्शेन किं दीपैः ?, यद्यान्ध्यं न दृशोर्गतम् ॥२४॥

३/६ सुत्यजं रसलाम्पट्यं, सुत्यजं देहभूषणम् ।
सुत्यजाः कामभोगाद्या, दुस्त्यजं दम्भसेवनम् ॥२५॥

३/८ असतीनां यथा शीलं, अशीलस्यैव वृद्धये ।
दम्भेनाव्रतवृद्ध्यर्थं, व्रतं वेषभृतां तथा ॥२६॥

३/१२ अत एव न यो धर्तुं, मूलोत्तरगुणानलम् ।
युक्ता सुश्राद्धता तस्य, न तु दम्भेन जीवनम् ॥२७॥

३/१४ निर्दम्भस्यावसन्नस्याप्यस्य शुद्धार्थभाषिणः ।
निर्जरां यतना दत्ते, स्वल्पाऽपि गुणरागिणः ॥२८॥

३/१५ व्रतभारासहत्वं ये, विदन्तोऽप्यात्मनः स्फुटम् ।
दम्भाद् यतित्वमाख्यान्ति, तेषां नामापि पाप्मने ॥२९॥

३/१६ कुर्वते ये न यतनां, सम्यक् कालोचितामपि ।
तैरहो यतिनाम्नैव, दाम्भिकैर्वञ्च्यते जगत् ॥३०॥

३/१९ आत्मार्थिना ततस्त्याज्यो, दम्भोऽनर्थनिबन्धनम् ।
शुद्धिः स्यादृजुभूतस्येत्यागमे प्रतिपादितम् ॥३१॥

३/२० जिनैर्नानुमतं किञ्चिद्, निषिद्धं वा न सर्वथा ।
कार्ये भाव्यमदम्भेनेत्येषाऽऽज्ञा पारमेश्वरी ॥३२॥

५/४ विषयैः क्षीयते कामो, नेन्धनैरिव पावकः ।
प्रत्युत प्रोल्लसच्छक्तिः, भूय एवोपवर्द्धते ॥३३॥

५/५ सौम्यत्वमिव सिंहानां, पन्नगानामिव क्षमा ।
विषयेषु प्रवृत्तानां, वैराग्यं खलु दुर्लभम् ॥३४॥

५/६ अकृत्वा विषयत्यागं, यो वैराग्यं दिधीर्षति ।
अपथ्यमपरित्यज्य, स रोगोच्छेदमिच्छति ॥३५॥

५/२१ बध्यते बाढमासक्तो, यथा श्लेष्मणि मक्षिका ।
शुष्कगोलवदश्लिष्टो, विषयेभ्यो न बध्यते ॥३६॥

५/२४ विषयाणां ततो बन्ध-जनने नियमोऽस्ति न ।
अज्ञानिनां ततो बन्धो, ज्ञानिनां तु न कर्हिचित् ॥३७॥

५/२९ बलेन प्रेर्यमाणानि, करणानि वनेभवत् ।
न जातु वशतां यान्ति, प्रत्युतानर्थवृद्धये ॥३८॥

६/७ गृहेऽन्नमात्रदौर्लभ्यं, लभ्यन्ते मोदका व्रते ।
वैराग्यस्यायमर्थो हि, दुःखगर्भस्य लक्षणम् ॥३९॥

६/८ कुशास्त्राभ्याससम्भूत-भवनैर्गुण्यदर्शनात् ।
मोहगर्भं तु वैराग्यं, मतं बालतपस्विनाम् ॥४०॥

६/११ अमीषां प्रशमोऽप्युच्चैः, दोषपोषाय केवलम् ।
अन्तर्निलीनविषम-ज्वरानुद्भवसन्निभः ॥४१॥

६/१२ कुशास्त्रार्थेषु दक्षत्वं, शास्त्रार्थेषु विपर्ययः ।
स्वच्छन्दता कुतर्कश्च, गुणवत्संस्तवोज्झनम् ॥४२॥

६/१३ आत्मोत्कर्षः परद्रोहः, कलहो दम्भजीवनम् ।
आस्रवाच्छादनं शक्त्युल्लङ्घनेन क्रियाऽऽदरः ॥४३॥

६/१४ गुणानुरागवैधुर्यं, उपकारस्य विस्मृतिः ।
अनुबन्धाद्यचिन्ता च, प्रणिधानस्य विच्युतिः ॥४४॥

६/१५ श्रद्धामृदुत्वमौद्धत्यं, अधैर्यमविवेकिता ।
वैराग्यस्य द्वितीयस्य, स्मृतेयं लक्षणावली ॥४५॥

६/१६ ज्ञानगर्भं तु वैराग्यं, सम्यक् तत्त्वपरिच्छिदः ।
स्याद्वादिनः शिवोपाय-स्पर्शिनस्तत्त्वदर्शिनः ॥४६॥

६/३४ तदेकान्तेन यः कश्चिद्, विरक्तस्यापि कुग्रहः ।
शास्त्रार्थबाधनात् सोऽयं, जैनाभासस्य पापकृत् ॥४७॥

६/३५ उत्सर्गे वाऽपवादे वा, व्यवहारेऽथ निश्चये ।
ज्ञाने कर्म्मणि वाऽयं चेद्, न तदा ज्ञानगर्भता ॥४८॥

६/३६ स्वागमेऽन्यागमार्थानां, शतस्येव परार्ध्यके ।
नावतारबुधत्वं चेद्, न तदा ज्ञानगर्भता ॥४९॥

६/३८ आज्ञयाऽऽगमिकार्थानां, यौक्तिकानां च युक्तितः ।
न स्थाने योजकत्वं चेद्, न तदा ज्ञानगर्भता ॥५०॥

६/३९ गीतार्थस्यैव वैराग्यं, ज्ञानगर्भं ततः स्थितम् ।
उपचारादगीतस्याप्यभीष्टं तस्य निश्रया ॥५१॥

६/४० सूक्ष्मेक्षिका च माध्यस्थ्यं, सर्वत्र हितचिन्तनम् ।
क्रियायामादरो भूयान्, धर्मे लोकस्य योजनम् ॥५२॥

६/४१ चेष्टा परस्य वृत्तान्ते, मूकान्धबधिरोपमा ।
उत्साहः स्वगुणाभ्यासे, दुःस्थस्येव धनार्जने ॥५३॥

६/४२ मदनोन्मादवमनं, मदसम्मर्दमर्दनम् ।
असूयातन्तुविच्छेदः, समताऽमृतमज्जनम् ॥५४॥

६/४३ स्वभावान्नैव चलनं, चिदानन्दमयात् सदा ।
वैराग्यस्य तृतीयस्य, स्मृतेयं लक्षणावली ॥५५॥

८/२ विषयैः किं परित्यक्तैः ?, जागर्ति ममता यदि ।
त्यागात् कञ्चुकमात्रस्य, भुजङ्गो न हि निर्विषः ॥५६॥

८/१० स्वयं येषां च पोषाय, खिद्यते ममतावशः ।
इहामुत्र च ते न स्युः, त्राणाय शरणाय वा ॥५७॥

८/११ ममत्वेन बहून् लोकान्, पुष्णात्येकोऽर्जितैर्धनैः ।
सोढा नरकदुःखानां, तीव्राणामेक एव तु ॥५८॥

८/१५ मनस्यन्यद्वचस्यन्यत्, क्रियायामन्यदेव च ।
यस्यास्तामपि लोलाक्षीं, साध्वीं वेत्ति ममत्ववान् ॥५९॥

८/३ कष्टेन हि गुणग्रामं, प्रगुणीकुरुते मुनिः ।
ममताराक्षसी सर्वं, भक्षयत्येकहेलया ॥६०॥

८/२६ धृतो योगो न ममता, हता न समताऽऽदृता ।
न च जिज्ञासितं तत्त्वं, गतं जन्म निरर्थकम् ॥६१॥

९/१३ दूरे स्वर्गसुखं मुक्ति-पदवी सा दवीयसी ।
मनःसंनिहितं दृष्टं, स्पष्टं तु समतासुखम् ॥६२॥

९/१९ क्षणं चेतः समाकृष्य, समता यदि सेव्यते ।
स्यात् तदा सुखमन्यस्य, यद् वक्तुं नैव पार्यते ॥६३॥

९/२६ सन्त्यज्य समतामेकां, स्याद् यत् कष्टमनुष्ठितम् ।
तदीप्सितकरं नैव, बीजमुप्तमिवोषरे ॥६४॥

९/२२ प्रचितान्यपि कर्म्माणि, जन्मनां कोटिकोटिभिः ।
तमांसीव प्रभा भानोः, क्षिणोति समता क्षणात् ॥६५॥

१०/३ आहारोपधिपूजर्द्धि-प्रभृत्याशंसया कृतम् ।
शीघ्रं सच्चित्तहन्तृत्वाद्, विषानुष्ठानमुच्यते ॥६६॥

१०/५ दिव्यभोगाभिलाषेण कालान्तरपरिक्षयात् ।
स्वादृष्टफलसम्पूर्त्तेः, गरानुष्ठानमुच्यते ॥६७॥

१०/८ प्रणिधानाद्यभावेन, कर्मानध्यवसायिनः ।
संमूर्च्छिमप्रवृत्त्याभं, अननुष्ठानमुच्यते ॥६८॥

१०/११ शुद्धस्यन्वेषणे तीर्थोच्छेदः स्यादिति वादिनाम् ।
लोकाचारादरश्रद्धा, लोकसंज्ञेति गीयते ॥६९॥

१०/१२ शिक्षितादिपदोपेतम्, अप्यावश्यकमुच्यते ।
द्रव्यतो भावनिर्मुक्तम्, अशुद्धस्य तु का कथा ? ॥७०॥

१०/१३ तीर्थोच्छेदभिया हन्ताविशुद्धस्यैव चादरे ।
सूत्रक्रियाविलोपः स्याद्, गतानुगतिकत्वतः ॥७१॥

१०/१४ धर्मोद्यतेन कर्तव्यं, कृतं बहुभिरेव चेत् ।
तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात् कदाचन ॥७२॥

१०/१६ अकामनिर्जराङ्गत्वं, कायक्लेशादिहोदितम् ।
सकामनिर्जरा तु स्यात्, सोपयोगप्रवृत्तितः ॥७३॥

१०/१७ सदनुष्ठानरागेण, तद्धेतुर्मार्गगामिनाम् ।
एतच्च चरमावर्ते-ऽनाभोगादेर्विना भवेत् ॥७४॥

१०/२५ सहजो भावधर्मो हि, शुद्धश्चन्दनगन्धवत् ।
एतद्गर्भमनुष्ठानं, अमृतं सम्प्रचक्षते ॥७५॥

१०/२६ जैनीमाज्ञां पुरस्कृत्य, प्रवृत्तं चित्तशुद्धितः ।
संवेगगर्भमत्यन्तं, अमृतं तद्विदो विदुः ॥७६॥

१०/२७ शास्त्रार्थालोचनं सम्यक्, प्रणिधानं च कर्म्मणि ।
कालाद्यङ्गाविपर्यासो-ऽमृतानुष्ठानलक्षणम् ॥७७॥

१०/२९ आदरः करणे प्रीतिः, अविघ्नः सम्पदागमः ।
जिज्ञासा तज्ज्ञसेवा च, सदनुष्ठानलक्षणम् ॥७८॥

१०/३१ इच्छा तद्वत्कथा प्रीतिः, युक्ताऽविपरिणामिनी ।
प्रवृत्तिः पालनं सम्यक्, सर्वत्रोपशमान्वितम् ॥७९॥

१०/३२ सत्क्षयोपशमोत्कर्षाद्, अतिचारादिचिन्तया ।
रहितं तु स्थिरं सिद्धिः, परेषामर्थसाधकम् ॥८०॥

१०/३४ अनुकम्पा च निर्वेदः, संवेगः प्रशमस्तथा ।
एतेषामनुभावाः स्युः, इच्छादीनां यथाक्रमम् ॥८१॥

११/१० अनिगृहीतमनाः कुविकल्पतो, नरकमृच्छति तन्दुलमत्स्यवत् ।
इयमभक्षणजा तदजीर्णताऽनुपनतार्थविकल्पकदर्थना ॥८२॥

११/१५ प्रथमतो व्यवहारनयस्थितोऽशुभविकल्पनिवृत्तिपरो भवेत् ।
शुभविकल्पमयव्रतसेवया, हरति कण्टक एव हि कण्टकम् ॥८३॥

१४/८ व्रतानि चीर्णानि तपोऽपि तप्तं, कृता प्रयत्नेन च पिण्डशुद्धिः ।
अभूत् फलं यत्तु न निह्नवानां, असद्ग्रहस्यैव हि सोऽपराधः ॥८४॥

१४/१४ आमे घटे वारि धृतं यथा सद्, विनाशयेत् स्वं च घटं च सद्यः ।
असद्ग्रहग्रस्तमतेस्तथैव, श्रुतात् प्रदत्ताद् उभयोर्विनाशः ॥८५॥

१४/१८ दम्भाय चातुर्यमघाय शास्त्रं, प्रतारणाय प्रतिभापटुत्वम् ।
गर्वाय धीरत्वमहो ! गुणानां, असद्ग्रहस्थे विपरीतसृष्टिः ॥८६॥

१५/११ देहनिर्वाहमात्रार्था, याऽपि भिक्षाऽटनादिका ।
क्रिया सा ज्ञानिनो-ऽसङ्गात् नैव ध्यानविघातिनी ॥८७॥

१५/१८ श्रुत्वा पैशाचिकीं वार्तां, कुलवध्वाश्च रक्षणम् ।
नित्यं संयमयोगेषु, व्यापृतात्मा भवेद् यतिः ॥८८॥

१५/२४ ज्ञानं क्रियाविहीनं न, क्रिया वा ज्ञानवर्जिता ।
गुणप्रधानभावेन, दशाभेदः किलैनयोः ॥८९॥

१५/४६ अर्वाग्दशायां दोषाय, वैषम्ये साम्यदर्शनम् ।
निरपेक्षमुनीनां तु, रागद्वेषक्षयाय तत् ॥९०॥

१६/४ शब्दादीनामनिष्टानां, वियोगासम्प्रयोगयोः ।
चिन्तनं वेदनायाश्च, व्याकुलत्वमुपेयुषः ॥९१॥

१६/५ इष्टानां प्रणिधानं च, सम्प्रयोगावियोगयोः ।
निदानचिन्तनं पापं, आर्त्तमित्थं चतुर्विधम् ॥९२॥

१६/७ क्रन्दनं रुदनं प्रोच्चैः, शोचनं परिदेवनं ।
ताडनं लुञ्चनं चेति, लिङ्गान्यस्य विदुर्बुधाः ॥९३॥

१६/८ मोघं निन्दनं निजं कृत्यं, प्रशंसन् परसम्पदः ।
विस्मितः प्रार्थयन्नेताः, प्रसक्तश्चैतदर्जने ॥९४॥

१६/९ प्रमत्तश्चेन्द्रियार्थेषु, गृद्धो धर्मपराङ्मुखः ।
जिनोक्तमपुरस्कुर्वन्, आर्त्तध्याने प्रवर्तते ॥९५॥

१६/११ निर्दयं वधबन्धादि-चिन्तनं निबिडक्रुधा ।
पिशुनासभ्यमिथ्यावाक्-प्रणिधानं च मायया ॥९६॥

१६/१२ चौर्य्यधीर्निरपेक्षस्य, तीव्रक्रोधाकुलस्य च ।
सर्वाभिशङ्काकलुषं, चित्तं च धनरक्षणे ॥९७॥

१६/१३ एतत् सदोषकरण-कारणानुमतिस्थिति ।
देशविरतिपर्यन्तं, रौद्रध्यानं चतुर्विधं ॥९८॥

१६/३५ आज्ञाऽपायविपाकानां, संस्थानस्य च चिन्तनात् ।
धर्मध्यानोपयुक्तानां, ध्यातव्यं स्याच्चतुर्विधम् ॥९९॥

१६/६५ दुःखेष्वनुद्विग्नमनाः, सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः, स्थितधीर्मुनिरुच्यते ॥१००॥

२०/३८ निन्द्यो न कोऽपि लोके, पापिष्ठेष्वपि भवस्थितिश्चिन्त्या ।
पूज्या गुणगरिमाऽऽढ्या, धार्यो रागो गुणलवेऽपि ॥१०१॥

२०/३९ निश्चित्यागमतत्त्वं, तस्मादुत्सृज्य लोकसंज्ञां च ।
श्रद्धाविवेकसारं, यतितव्यं योगिना नित्यं ॥१०२॥

२०/४० ग्राह्यं हितमपि बालाद्, आलापैर्न दुर्जनस्य द्वेष्यम् ।
त्यक्तव्या च पराशा, पाशा इव सङ्गमा ज्ञेया ॥१०३॥

२०/४१ स्तुत्या स्मयो न कार्यः, कोपोऽपि च निन्दया जनैः कृतया ।
सेव्या धर्माचार्याः, तत्त्वं जिज्ञासनीयं च ॥१०३॥

२०/४२ शौचं स्थैर्यमदम्भो, वैराग्यं चात्मनिग्रहः कार्यः ।
दृश्या भवगतदोषाः, चिन्त्यं देहादिवैरुप्यं ॥१०५॥

२०/४३ भक्तिर्भागवती धार्या, सेव्यो देशः सदा विविक्तश्च ।
स्थातव्यं सम्यक्त्वे, विश्वस्यो न प्रमादरिपुः ॥१०६॥

२०/४४ ध्येयाऽऽत्मबोधनिष्ठा, सर्वत्रैवागमः पुरस्कार्यः ।
त्यक्तव्याः कुविकल्पाः, स्थेयं वृद्धानुवृत्त्या च ॥१०७॥

२०/४५ साक्षात्कार्यं तत्त्वं, चिद्रूपानन्दमेदुरैर्भाव्यम् ।
हितकारी ज्ञानवतां, अनुभववेद्यः प्रकारोऽयम् ॥१०८॥

# અધ્યાત્મ ઉપનિષદાદિ સૂક્ત - રત્ન - મંજૂષા

~~~ वाचकयशोविजयकृतं अध्यात्मोपनिषत्प्रकरणम् ~~~

१/१ ऐन्द्रवृन्दनतं नत्वा, वीतरागं स्वयम्भुवम् ।
अध्यात्मोपनिषन्नाम्ना, ग्रन्थोऽस्माभिर्विधीयते ॥१॥

१/२ आत्मानमधिकृत्य स्याद्, यः पञ्चाचारचारिमा ।
शब्दयोगार्थनिपुणाः, तदध्यात्मं प्रचक्षते ॥२॥

१/३ रुढ्यर्थनिपुणास्त्वाहुः, चित्तं मैत्र्यादिवासितम् ।
अध्यात्मं निर्मलं बाह्य-व्यवहारोपबृंहितम् ॥३॥

१/६ मनोवत्सो युक्तिगवीं, मध्यस्थस्यानुधावति ।
तामाकर्षति पुच्छेन, तुच्छाग्रहः मनःकपिः ॥४॥

१/७ अनर्थायैव नार्थाय, जातिप्रायाश्च युक्तयः ।
हस्ति हन्तीति वचने, प्राप्ताप्राप्तविकल्पवत् ॥५॥

१/११ शुद्धोञ्छाद्यपि शास्त्राज्ञा-निरपेक्षस्य नो हितम् ।
भौतहन्तुर्यथा तस्य, पदस्पर्शनिषेधनम् ॥६॥

१/७२ पुत्रदारादि संसारो, धनिनां मूढचेतसाम् ।
पण्डितानां तु संसारः, शास्त्रमध्यात्मवर्जितम् ॥७॥

२/६ आत्मज्ञाने मुनिर्मग्नः, सर्वं पुद्गलविभ्रमं ।
महेन्द्रजालवद् वेत्ति, नैव तत्रानुरज्यते ॥८॥

२/७ आस्वादिता सुमधुरा, येन ज्ञानरतिः सुधा ।
न लगत्येव तच्चेतो, विषयेषु विषेष्विव ॥९॥
~~~

२/९ विषयान् साधकः पूर्वम्, अनिष्टत्वधिया त्यजेत् ।
न त्यजेन्न च गृह्णीयात्, सिद्धो विन्द्यात् स तत्त्वतः ॥१०॥

२/१२ सर्वं परवशं दुःखं, सर्वं आत्मवशं सुखं ।
एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥११॥

२/१३ ज्ञानमग्नस्य यच्छर्म, तद्वक्तुं नैव पार्यते ।
नोपमेयं प्रियाश्लेषैः, नापि तच्चन्दनद्रवैः ॥१२॥

२/४९ आदौ शमदमप्रायैः, गुणैः शिष्यं प्रबोधयेत् ।
पश्चात् सर्वमिदं ब्रह्म, शुद्धस्त्वमिति बोधयेत् ॥१३॥

२/५० अज्ञस्यार्धप्रबुद्धस्य, सर्वं ब्रह्मेति यो वदेत् ।
महानरकजालेषु, स तेन विनियोजितः ॥१४॥

२/५१ तेनादौ शोधयेत् चित्तं, सद्विकल्पैर्व्रतादिभिः ।
यत् कामादिविकाराणां, प्रतिसङ्ख्याननाश्यता ॥१५॥

२/५६ व्रतादिः शुभसङ्कल्पो, निर्णाश्याशुभवासनाम् ।
दाह्यं विनेव दहनः, स्वयमेव विनङ्क्ष्यति ॥१६॥

३/१३ क्रियाविरहितं हन्त ! ज्ञानमात्रमनर्थकम् ।
गतिं विना पथज्ञोऽपि, नाप्नोति पुरमीप्सितम् ॥१७॥

३/१५ बाह्यभावं पुरस्कृत्य, येऽक्रिया व्यवहारतः ।
वदने कवलक्षेपं, विना ते तृप्तिकाङ्क्षिणः ॥१८॥

३/३३ इत्थं च ज्ञानिनो ज्ञान-नाश्यकर्मक्षये सति ।
क्रियैकनाश्यकर्मौघ-क्षयार्थं साऽपि युज्यते ॥१९॥

३/३८ तेन ये क्रियया मुक्ता, ज्ञानमात्राभिमानिनः ।
ते भ्रष्टा ज्ञानकर्माभ्यां, नास्तिका नात्र संशयः ॥२०॥

३/३९ ज्ञानोत्पत्तिं समुद्भाव्य, कामादीनन्यदृष्टितः ।
अपह्नुवानैर्लोकेभ्यो, नास्तिकैर्वञ्चितं जगत् ॥२१॥

३/४२ ज्ञाने चैव क्रियायां च, युगपद् विहितादरः ।
द्रव्यभावविशुद्धः सन्, प्रयात्येव परं पदम् ॥२२॥

३/३७ सम्प्राप्तकेवलज्ञाना, अपि यज्जिनपुङ्गवाः ।
क्रियां योगनिरोधाख्यां, कृत्वा सिद्ध्यन्ति नान्यथा ॥२३॥

४/२ आत्मप्रवृत्तावतिजागरुकः, परप्रवृत्तौ बधिरान्धमूकः ।
सदा चिदानन्दपदोपयोगी, लोकोत्तरं साम्यमुपैति योगी ॥२४॥

४/३ परीषहैश्च प्रबलोपसर्गयोगाच्चलत्येव न साम्ययुक्तः ।
स्थैर्याद् विपर्यासमुपैति जातु, क्षमा न शैलैर्न च सिन्धुनाथैः ॥२५॥

४/८ विना समत्वं प्रसरन्ममत्वं, सामायिकं मायिकमेव मन्ये ।
आये समानां सति सद्गुणानां, शुद्धं हि तच्छुद्धनया विदन्ति ॥२६॥

४/११ अल्पेऽपि साधुर्न कषायवह्नौ, अह्नाय विश्वासमुपैति भीतः ।
प्रवर्धमानः स दहेद् गुणौघं, साम्याम्बुपूरैर्यदि नापनीतः ॥२७॥

४/१३ साम्यं विना यस्य तपःक्रियादेः,
निष्ठा प्रतिष्ठाऽर्जनमात्र एव ।
स्वर्धेनुचिन्तामणिकामकुम्भान्,
करोत्यसौ काणकपर्दमूल्यान् ॥२८॥

४/१४ ज्ञानी क्रियावान् विरतस्तपस्वी, ध्यानी च मौनी स्थिरदर्शनश्च ।
साधुर्गुणं तं लभते न जातु, प्राप्नोति यं साम्यसमाधिनिष्ठः ॥२९॥

४/१५ दुर्योधनेनाभिहतश्चुकोप, न पाण्डवैर्यो न नुतो जहर्ष ।
स्तुमो भदन्तं दमदन्तमन्तः, समत्ववन्तं मुनिसत्तमं तं ॥३०॥

४/१६ यो दह्यमानां मिथिलां निरीक्ष्य,
शक्रेण नुन्नोऽपि नमिः पुरीं स्वाम् ।
न मेऽत्र किञ्चिज्ज्वलतीति मेने,
साम्येन तेनोरुयशो वितेने ॥३१॥

४/१७ साम्यप्रसादास्तवपुर्ममत्वाः,
सत्त्वाधिकाः स्वं ध्रुवमेव मत्वा ।
न सेहिरेऽर्तिं किमु तीव्रयन्त्र-
निष्पीडिताः स्कन्धकसूरिशिष्याः ? ॥३२॥

४/१८ लोकोत्तरं चारुचरित्रमेतद्, मेतार्यसाधोः समतासमाधेः ।
हृदाऽप्यकुप्यन् न यदार्द्रचर्मबद्धेऽपि मूर्धन्ययमाप तापम् ॥३३॥

४/१९ जज्वाल नान्तः श्वसुराधमेन,
प्रोज्ज्वालितेऽपि ज्वलनेन मौलौ ।
मौलिर्मुनीनां स न कैर्निषेव्यः ?,
कृष्णानुजन्मा समताऽमृताब्धिः ॥३४॥

४/२० गङ्गाजले यो न जहौ सुरेण, विद्धोऽपि शूले समताऽनुवेधम् ।
प्रयागतीर्थोदयकृन्मुनीनां, मान्यः स सूरिस्तनुजोऽर्णिकायाः ॥३५॥

४/२१ स्त्रीभ्रूणगोब्राह्मणघातजातपापादधःपातकृताभिमुख्याः ।
दृढप्रहारिप्रमुखाः क्षणेन, साम्यावलम्बात् पदमुच्चमापुः ॥३६॥

~~ वाचकयशोविजयकृता वैराग्यकल्पलता ~~

१/१२६ समुद्धृतं पारगतागमाब्धेः, समाधिपीयूषमिदं निपीय ।
महाशयाः ! पीतमनादिकालात्, कषायहालाहलमुद्वमन्तु ॥३७॥

१/१३० विना समाधिं परिशीलितेन,
क्रियाकलापेन न कर्मभङ्गः ।
शक्तिं विना किं समुपाश्रितेन,
दुर्गेण राज्ञो द्विषतां जयः स्यात् ? ॥३८॥

१/१३६ अन्तः समाधेः सुखमाकलय्य, बाह्ये सुखे नो रतिमेति योगी ।
अटत्यटव्यां क इवार्थलुब्धो, गृहे समुत्सर्पति कल्पवृक्षे ? ॥३९॥

१/१४७ इतस्ततो भ्राम्यति चित्तपक्षी, वितत्य यो रत्यरतिस्वपक्षौ ।
स्वच्छन्दतावारणहेतुरस्य, समाधिसत्पञ्जरयन्त्रणैव ॥४०॥

१/१५६ असह्यया वेदनयाऽपि धीरा, रुदन्ति नात्यन्तसमाधिशुद्धाः ।
कल्पान्तकालाग्निमहार्चिषाऽपि, नैव द्रवीभावमुपैति मेरुः ॥४१॥

१/२३३ ज्ञानी तपस्वी परमक्रियावान्,
सम्यक्त्ववानप्युपशान्तिहीनः ।
प्राप्नोति तं नैव गुणं कदापि,
समाहितात्मा लभते शमी यत् ॥४२॥

१/२३५ नूनं परोक्षं सुरसद्मसौख्यं, मोक्षस्य चात्यन्तपरोक्षमेव ।
प्रत्यक्षमेकं समतासुखं तु, समाधिसिद्धानुभवोदयानाम् ॥४३॥

१/१३२ न दोषदर्शिष्वपि रोषपोषो, गुणस्तुतावप्यवलिप्तता नो ।
न दम्भसंरम्भविधेर्लवोऽपि, न लोभसंक्षोभजविप्लवोऽपि ॥४४॥

१/१४४ लाभेऽप्यलाभेऽपि सुखे च दुःखे,
ये जीवितव्ये मरणे च तुल्याः ।
रत्याऽप्यरत्याऽप्यनिरस्तभावाः,
समाधिसिद्धा मुनयस्त एव ॥४५॥

१/१५४ उग्रे विहारे च सुदुष्करायां, भिक्षाविशुद्धौ च तपस्यसह्ये ।
समाधिलाभव्यवसायहेतोः, क्व वैमनस्यं मुनिपुङ्गवानाम् ? ॥४६॥

१/१४९ इष्टप्रणाशेऽप्यनभीष्टलाभेऽनित्यस्वभावं नियतिञ्च जानन् ।
सन्तापमन्तर्न समाधिवृष्टिविध्यातशोकाग्निरुपैति साधुः ॥४७॥

१/१६३ रणाङ्गणे शूरपुरस्सरास्तु, पश्यन्ति पृष्ठं न हि मृत्युभीताः ।
समाहिताः प्रव्रजितास्तथैव, वाञ्छन्ति नोत्प्रव्रजितुं कदाचित् ॥४८॥

१/१७५ न मूत्रविष्ठापिठरीषु रागं, बध्नन्ति कान्तासु समाधिशान्ताः ।
अनङ्गकीटालयतत्प्रसङ्गं, अब्रह्मदौर्गन्ध्यभियास्त्यजन्ति ॥४९॥

१/२२८ रम्यं सुखं यद्विषयोपनीतं, नरेन्द्रचक्रित्रिदशाधिपानाम् ।
समाहितास्तज्ज्वलदिन्द्रियाग्नि-ज्वालाघृताहुत्युपमं विदन्ति ॥५०॥

१/२४८ जना मुदं यान्ति समाधिसाम्य-जुषां मुनीनां सुखमेव दृष्ट्वा ।
चन्द्रेक्षणादेव चकोरबालाः, पीतामृतोद्गारपरा भवन्ति ॥५१॥

१/२५१ अपेक्षितान्तप्रतिपक्षपक्षैः, कर्माणि बद्धान्यपि कर्मलक्षैः ।
प्रभा तमांसीव रवेः क्षणेन, समाधिसिद्धा समता क्षिणोति ॥५२॥

१/२५२ संसारिणो नैव निजं स्वरूपं, पश्यन्ति मोहावृतबोधनेत्राः ।
समाधिसिद्धा समतैव तेषां, दिव्यौषधं दोषहरं प्रसिद्धम् ॥५३॥

१/२५३ बबन्ध पापं नरकैकवेद्यं, प्रसन्नचन्द्रो मनसाऽप्रशान्तः ।
तत्कालमेव प्रशमे तु लब्धे, समाधिभृत् केवलमाससाद ॥५४॥

१/२५४ षट्खण्डसाम्राज्यभुजोऽपि वश्या, यत् केवलश्रीर्भरतस्य जज्ञे ।
न याति पारं वचसोऽनुपाधि-समाधिसाम्यस्य विजृम्भितं तत् ॥५५॥

१/२५५ अप्राप्तधर्माऽपि पुराऽऽदिमार्हन्-माता शिवं यद् भगवत्यवाप ।
समाधिसिद्धा समतैव हेतुः, तत्रापि बाह्यस्तु न कोऽपि योगः ॥५६॥

१/२४१ निरञ्जनाः शङ्खवदाश्रयन्तोऽस्खलद्गतित्वं भुवि जीववच्च ।
वियद्वदालम्बनविप्रमुक्ताः, समीरवच्च प्रतिबन्धशून्याः ॥५७॥

१/२४२ शरत्सरोनीरविशुद्धचित्ता, लेपोज्झिताः पुष्करपत्रवच्च ।
गुप्तेन्द्रियाः कूर्मवदेकभावं, उपागताः खड्गिविषाणवच्च ॥५८॥

१/२४३ सदा विहङ्गा इव विप्रमुक्ता, भारण्डपक्षीन्द्रवदप्रमत्ताः ।
शौण्डीर्यभाजो गजवच्च जातस्थामप्रकर्षा वृषभा इवोच्चैः ॥५९॥

१/२४४ दुर्द्धर्षतां सिंहवदब्धिवच्च, गम्भीरतां मन्दरवत् स्थिरत्वम् ।
प्राप्ताः सितांशूज्ज्वलसौम्यलेश्याः, सूर्या इवात्यद्भुतदीप्तिमन्तः ॥६०॥

१/२४५ सुजातरूपास्तपनीयवच्च, भारक्षमा एव वसुन्धरावत् ।
ज्वलत्त्विषो वह्निवदुल्लसन्ति, समाधिसाम्योपगता मुनीन्द्राः ॥६१॥

१/२४६ गजाश्च सिंहा गरुडाश्च नागाः, व्याघ्राश्च गावश्च सुरासुराश्च ।
तिष्ठन्ति पार्श्वे मिलिताः समाधिसाम्यस्पृशामुज्झितनित्यवैराः ॥६२॥

१/१५५ समाधिभाजोऽपि विपद्दशायां, न यान्ति धीराः करुणाऽऽस्पदत्वम् ।
जात्यस्य जायेत विवर्णभावः, किमग्नितापादपि काञ्चनस्य ? ॥६३॥

१/१६८ यन्नैव सूत्रे विहितं न चापि, निवारितं किन्तु चिरप्ररूढम् ।
समाहिता मार्गभिदाभियैव, तदप्यनालोच्य न दूषयन्ति ॥६४॥

१/१७४ कुत्सां मलक्लिन्नकलेवरेषु, कुर्वन्ति नो शुद्धसमाधिभाजः ।
व्रजन्ति नोद्वेगमनिष्टभावात्, निवर्तयन्त्यक्षि न चाप्रशस्तात् ॥६५॥

१/२२९ समाहितस्वान्तमहात्मनां स्यात्,
सुखेऽप्यहो वैषयिके जिहासा ।
को वा विपश्चिन्ननु भोक्तुमिच्छेत्,
मिष्टान्नमप्युग्रविषेण युक्तम् ? ॥६६॥

~~ वाचकयशोविजयकृतं मार्गपरिशुद्धिप्रकरणम् ~~

१ ऐन्द्रश्रेणिनताय, प्रथमाननयप्रमाणरूपाय ।
भूतार्थभासनाय, त्रिजगद्गुरुशासनाय नमः ॥६७॥

९ निश्चयतो निश्चयभाग्, मत्त इव भिनत्ति यश्चरणमुद्राम् ।
तस्य पदे व्यवहारो, वज्रमयी शृङ्खला देया ॥६८॥

१० अव्यवहारिणि जीवे, निश्चयनयविषयसाधनं नास्ति ।
ऊषरदेशे कथमपि, न भवति खलु शस्यनिष्पत्तिः ॥६९॥

११ व्यवहारप्रतिभासो, दुर्नयकृद्बालिशस्य भवबीजम् ।
व्यवहाराचरणं पुनः, अनभिनिविष्टस्य शिवबीजम् ॥७०॥

१३ व्यवहारवतस्तनुरपि, बोधः सितपक्षचन्द्र इव वृद्धिम् ।
इतरस्य याति हानिं, पृथुरपि शितिपक्षचन्द्र इव ॥७१॥

१४ अवगतसमयोपनिषद्-गुरुकुलवासः सतां सदा सेव्यः ।
आचारादौ निगदितमाद्यं, व्यवहारबीजमिदम् ॥७२॥

१५ अस्मादेव हि चरणं, सिद्ध्यति मार्गानुसारिभावेन ।
गुरुकुलवासत्यागे, नेयं भणिताऽकृतज्ञस्य ॥७३॥

१६ सामान्यधर्मतः खलु, कृतज्ञभावाद् विशिष्यते चरणं ।
सामान्यविरहिणि पुनः, न विशेषस्य स्थितिर्दृष्टा ॥७४॥

१७ तस्माद् गुरुकुलवासः, श्रयणीयश्चरणधनविवृद्धिकृते ।
गुरुरपि गुणवानेव, श्लाघ्यत्वमुपैति विमलधियाम् ॥७५॥

१२ गुरुपारतन्त्र्यस्यातो, माषतुषादेः पुमर्थसंसिद्धिः ।
स्फटिक इव पुष्परूपं, तत्र प्रतिफलति गुरुबोधः ॥७६॥

११३ इभ्यो नृपमिव शिष्यः, सेवेत गुरुं ततो विनयवृद्ध्या ।
सद्दर्शनानुरागादपि, शुद्धिर्गौतमस्येव ॥७७॥

११४ गुरुसेवाऽभ्यासवतां, शुभानुबन्धो भवे परत्रापि ।
तत्परिवारो गच्छः, तद्वासे निर्जरा विपुला ॥७८॥

२५६ व्यूढो गणधरशब्दो, गौतममुख्यैः स्वयं पुरुषसिंहैः ।
यस्तमपात्रे धत्ते, जानानोऽसौ महापापः ॥७९॥

२६० पददानेऽयोग्यानां, गुरुतरगुणमलनया परित्यक्ताः ।
शिष्या भवन्ति नियमाद्, आज्ञाकोपेन चात्माऽपि ॥८०॥

२८१ युष्माभिरपि च नायं, मोक्तव्यो भववने महागहने ।
सिद्धिपुरसार्थवाहः, क्षणमपि नित्यं तु संसेव्यः ॥८१॥

२८२ आज्ञाकोपोऽपरथा, स्यादतिदुःखप्रदस्तदेतस्य ।
निर्भर्त्सितैरपि पदौ, न त्याज्यौ कुलवधूज्ञातात् ॥८२॥

२६ गुणवानेव हि शिष्यो, लोकद्वयहितकरो गुरोर्भवति ।
इतरस्त्वार्त्तध्यानं, श्रद्धाऽभावात् प्रवर्द्धयति ॥८३॥

२२ उत्पन्नमार्यदेशे, जातिकुलविशुद्धमल्पकर्माणम् ।
कृशतरकषायहासं, कृतज्ञमविरुद्धकार्यकरम् ॥८४॥

२३ मरणनिमित्तं जन्म, श्रीश्चपला दुर्लभं च मनुजत्वम् ।
न परनिमित्तं निजसुखं, इति चिन्तोत्पन्नवैराग्यम् ॥८२॥

२५ नानीदृशस्य हृदये, रमते जिनगीर्भवाभिनन्दितया ।
कुङ्कुमरागो वाससि, मलिने न कदाऽपि परिणमते ॥८६॥

२५२ यः सद् बाह्यमनित्यं, दानं दत्ते न शक्तिमान् लुब्धः ।
दुर्द्धरतरं कथमयं, बिभर्ति शीलव्रतं क्लीबः ? ॥८७॥

२५३ नाशीलः शुद्धतपः, कर्तुं सहते न मोहपरतन्त्रः ।
शक्त्या तपोऽप्यकुर्वन्, भावयति सुभावनाजालम् ॥८८॥

११९ सद्योगवृद्धिजननं, सद्ध्यानसमन्वितं त्वनशनादि ।
कुर्यात् तपोऽपि यस्माद्, अपैति चितमांसशोणितता ॥८९॥

८२ येन क्षुदादयः खलु, कर्मक्षयकारणानि भावयतः ।
ज्वरिणामिह बाधन्ते, कटुकौषधपानमिव न मनः ॥९०॥

१५९ असकृदपि क्षाराद्यैः, प्राप्तैरप्राप्तवेधपरिणामः ।
वेधं शुद्धिं च यथा, जात्यमणिर्याति तैरेव ॥९१॥

१६० अकलितवीर्योल्लासः, तथा श्रुतादप्यनन्तशः प्राप्तात् ।
लभते वीर्योल्लासं, भव्यः शुद्धिं च तत एव ॥९२॥

१७२ द्रव्याख्यं सम्यक्त्वं, जिनवचनं तत्त्वमिति रुचिः परमा ।
भूतार्थबोधशक्त्या, परिणमते भावसम्यक्त्वम् ॥९३॥

१७३ अज्ञातगुणे सम्यग्, या श्रद्धा भवति सुन्दरे रत्ने ।
हन्त ततोऽनन्तगुणा, विज्ञातगुणे पुनस्तस्मिन् ॥९४॥

१३४ अविनिश्चितो हि न भवेद्, अपवादोत्सर्गविषयवित् सम्यक् ।
अविषयदेशनया च, स्वपरविनाशी स नियमेन ॥९५॥

२९१ निरुपक्रमकर्मवशात्, नित्यं मार्गैकदत्तदृष्टिरपि ।
चरणकरणे त्वशुद्धे, शुद्धं मार्गं प्ररूपयतु ॥९६॥

२९२ दर्शनशास्त्राभ्यासाद्, हीनोऽपि पथप्रभावनोद्युक्तः ।
यल्लभते फलमतुलं, न तत् क्रियामात्रमग्नमतिः ॥९७॥

२२१ शुद्धेतरपरिणामौ, निश्चयतो मोक्षबन्धनोपायौ ।
अत्याज्यसन्निधानाः, परपरिणामा उदासीनाः ॥९८॥

३०३ स्नेहालिङ्गितवपुषो, रेणुभिराश्लिष्यते यथा गात्रम् ।
रागद्वेषास्तमतेः, कर्मस्कन्धैस्तथा श्लेषः ॥९९॥

३१० मायोदकं यथावत्, पश्यन् यात्येव तेन मार्गेण ।
पश्यन्नलीकरूपान्, भोगानुल्लङ्घयत्येवम् ॥१००॥

३११ तांस्तत्त्वेन तु जानन्, मग्नो भावेन मोहजम्बाले ।
उभयभ्रष्टः स्पष्टं, निरन्तरं खेदमनुभवति ॥१०१॥

१७५ सूक्ष्मोऽस्त्यशेषविषयः, सावद्ये यत्र कर्मणि निषेधः ।
रागादिकुट्टनसहं, ध्यानं च स नाम कषशुद्धः ॥१०२॥

१७६ नो कार्या परपीडा, यथाऽत्र मनसा गिरा च वपुषा च ।
ध्यातव्यं च नितान्तं, रागादिविपक्षजालं तु ॥१०३॥

१८३ एतेन विधिनिषेधौ, बाध्येते यत्र नैव नियमेन ।
सम्भवतः परिशुद्धौ, ब्रुवते तं छेदपरिशुद्धम् ॥१०४॥

१८४ समितिसु पञ्चसु च तथा, तिसृषु च गुप्तिषु सदाऽप्रमत्तेन ।
विधिना यतिना कार्यं, कर्तव्यं कायिकाद्यपि हि ॥१०५॥

१८५ अपि च प्रमादजनकाः, त्याज्याः वासादयः परम्परया ।
मधुकरवृत्त्या भिक्षालब्ध्याऽऽत्मा पालनीयश्च ॥१०६॥

१९१ जीवादिभाववादो, दृष्टेष्टाभ्यां न यः खलु विरुद्धः ।
तापविशुद्धः सोऽन्यो, द्वाभ्यामपि नैव शुद्धः स्यात् ॥१०७॥

१९२ इह सदसदादिरूपे, जीवे बन्धादि युज्यते सर्वम् ।
नानीदृशे तु किञ्चित्, वरश्रुतं शुद्धमित्थं तत् ॥१०८॥

## ષોડશકાદિ સૂક્ત - રત્ન - મંજૂષા

### ~~ हरिभद्रसूरिकृतं धर्मबिन्दुप्रकरणम् ~~

२ धनदो धनार्थिनां प्रोक्तः, कामिनां सर्वकामदः ।
धर्म एवापवर्गस्य, पारम्पर्येण साधकः ॥१॥

धर्मश्चिन्तामणिः श्रेष्ठो, धर्मः कल्याणमुत्तमम् ।
हित एकान्ततो धर्मो, धर्म एवामृतं परम् ॥२॥

यत् किञ्चन शुभं लोके, स्थानं तत् सर्वमेव हि ।
अनुबन्धगुणोपेतं, धर्मादाप्नोति मानवः ॥३॥

३ वचनाद् यदनुष्ठानं, अविरुद्धाद् यथोदितम् ।
मैत्र्यादिभावसंयुक्तं, तद्धर्म इति कीर्त्यते ॥४॥

दुर्लभं प्राप्य मानुष्यं, विधेयं हितमात्मना ।
करोत्यकाण्ड एवेह, मृत्युः सर्वं न किञ्चन ॥५॥

बीजनाशे यथाऽभूमौ, प्ररोहो वेह निष्फलः ।
तथा सद्धर्मबीजानां, अपात्रेषु विदुर्बुधाः ॥६॥

न साधयति यः सम्यग्, अज्ञः स्वल्पं चिकीर्षितम् ।
अयोग्यत्वात् कथं मूढः, स महत् साधयिष्यति ? ॥७॥

अबोधेऽपि फलं प्रोक्तं, श्रोतॄणां मुनिसत्तमैः ।
कथकस्य विधानेन, नियमाच्छुद्धचेतसः ॥८॥

नोपकारो जगत्यस्मिन्, तादृशो विद्यते क्वचित् ।
यादृशी दुःखविच्छेदाद्, देहिनां धर्मदेशना ॥९॥

बाहुभ्यां दुस्तरो यद्वत्, क्रूरनक्रो महोदधिः ।
यतित्वं दुष्करं तद्वत्, इत्याहुस्तत्त्ववेदिनः ॥१०॥

भवस्वरूपविज्ञानात्, तद्विरागाच्च तत्त्वतः ।
अपवर्गानुरागाच्च, स्यादेतन्नान्यथा क्वचित् ॥११॥

उक्तं मासादिपर्याय-वृद्ध्या द्वादशभिः परम् ।
तेजः प्राप्नोति चारित्री, सर्वदेवेभ्य उत्तमम् ॥१२॥

~~ हरिभद्रसूरिकृतः शास्त्रवार्तासमुच्चयः ~~

३ दुःखं पापात् सुखं धर्मात्, सर्वशास्त्रेषु संस्थितिः ।
न कर्त्तव्यमतः पापं, कर्त्तव्यो धर्मसञ्चयः ॥१३॥

७ उपदेशः शुभो नित्यं, दर्शनं धर्मचारिणाम् ।
स्थाने विनय इत्येतत्, साधुसेवाफलं महत् ॥१४॥

८ मैत्रीं भावयतो नित्यं, शुभो भावः प्रजायते ।
ततो भावोदकाज्जन्तोः, द्वेषाग्निरुपशाम्यति ॥१५॥

९ अशेषदोषजननी, निःशेषगुणघातिनी ।
आत्मीयग्रहमोक्षेण, तृष्णाऽपि विनिवर्तते ॥१६॥

१२ अनित्यः प्रियसंयोगः, इहेर्ष्याशोकवत्सलः ।
अनित्यं यौवनं चापि, कुत्सिताचरणास्पदम् ॥१७॥

१३ अनित्याः सम्पदस्तीव्र-क्लेशवर्गसमुद्भवाः ।
अनित्यं जीवितं चेह, सर्वभावनिबन्धनम् ॥१८॥

~~ हरिभद्रसूरिकृतं अष्टकप्रकरणम् ~~

४/६ धर्मार्थं यस्य वित्तेहा, तस्यानीहा गरीयसी ।
प्रक्षालनाद्धि पङ्कस्य, दूरादस्पर्शनं वरम् ॥१९॥

८/१ अपेक्षा चाविधिश्चैवापरिणामस्तथैव च ।
प्रत्याख्यानस्य विघ्नास्तु, वीर्याभावस्तथाऽपरः ॥२०॥

८/८ जिनोक्तमिति सद्भक्त्या, ग्रहणे द्रव्यतोऽप्यदः ।
बाध्यमानं भवेद् भाव-प्रत्याख्यानस्य कारणं ॥२१॥

९/२ विषकण्टकरत्नादौ, बालादिप्रतिभासवत् ।
विषयप्रतिभासं स्यात्, तद्धेयत्वाद्यवेदकम् ॥२२॥

९/३ निरपेक्षप्रवृत्त्यादि-लिङ्गमेतदुदाहृतम् ।
अज्ञानावरणापायं, महाऽपायनिबन्धनम् ॥२३॥

९/४ पातादिपरतन्त्रस्य, तद्दोषादावसंशयम् ।
अनर्थाद्याप्तियुक्तं, चात्मपरिणतिमन्मतम् ॥२४॥

९/५ तथाविधप्रवृत्त्यादि-व्यङ्ग्यं सदनुबन्धि च ।
ज्ञानावरणह्रासोत्थं, प्रायो वैराग्यकारणम् ॥२५॥

९/६ स्वस्थवृत्तेः प्रशान्तस्य, तद्धेयत्वादिनिश्चयम् ।
तत्त्वसंवेदनं सम्यक्, यथाशक्तिफलप्रदम् ॥२६॥

९/७ न्याय्यादौ शुद्धवृत्त्यादि-गम्यमेतत् प्रकीर्तितम् ।
सज्ज्ञानावरणापायं, महोदयनिबन्धनम् ॥२७॥

२४/७ चित्तरत्नमसङ्क्लिष्टं, आन्तरं धनमुच्यते ।
यस्य तन्मुषितं दोषैः, तस्य शिष्टा विपत्तयः ॥२८॥

१०/२ इष्टेतरवियोगादि-निमित्तं प्रायशो हि यत् ।
यथाशक्त्यपि हेयादावप्रवृत्त्यादिवर्जितम् ॥२९॥

१०/३ उद्वेगकृद्विषादाढ्यं, आत्मघातादिकारणम् ।
आर्त्तध्यानं ह्यदो मुख्यं, वैराग्यं लोकतो मतम् ॥३०॥

१०/६ भूयांसो नामिनो बद्धा, बाह्येनेच्छादिना ह्यमी ।
आत्मानस्तद्वशात् कष्टं, भवे तिष्ठन्ति दारुणे ॥३१॥

१०/७ एवं विज्ञाय तत्त्याग-विधिस्त्यागश्च सर्वथा ।
वैराग्यमाहुः सज्ज्ञानसङ्गतं तत्त्वदर्शिनः ॥३२॥

११/१ दुःखात्मकं तपः केचित्, मन्यन्ते तन्न युक्तिमत् ।
कर्मोदयस्वरूपत्वाद्, बलीवर्दादिदुःखवत् ॥३३॥

११/५ मनइन्द्रिययोगानां, अहानिश्चोदिता जिनैः ।
यतोऽत्र तत् कथं त्वस्य, युक्ता स्याद् दुःखरूपता ? ॥३४॥

११/६ याऽपि चानशनादिभ्यः, कायपीडा मनाक् क्वचित् ।
व्याधिक्रिया समा साऽपि, नेष्टसिद्ध्याऽत्र बाधनी ॥३५॥

११/७ दृष्टा चेष्टार्थसंसिद्धौ, कायपीडा ह्यदुःखदाः ।
रत्नादिवणिगादिनां, तद्वदत्रापि भाव्यताम् ॥३६॥

११/८ विशिष्टज्ञानसंवेग-शमसारमतस्तपः ।
क्षायोपशमिकं ज्ञेयं, अव्याबाधसुखात्मकम् ॥३७॥

५/२ यतिर्ध्यानादियुक्तो यो, गुर्वाज्ञायां व्यवस्थितः ।
सदाऽनारम्भिणस्तस्य, सर्वसम्पत्करी मता ॥३८॥

५/३ वृद्धाद्यर्थमसङ्गस्य, भ्रमरोपमयाऽटतः ।
गृहिदेहोपकाराय, विहितेति शुभाशयात् ॥३९॥

६/६ विभिन्नं देयमाश्रित्य, स्वभोग्याद् यत्र वस्तुनि ।
सङ्कल्पनं क्रियाकाले, तद् दुष्टं विषयोऽनयोः ॥४०॥

६/७ स्वोचिते तु यदारम्भे, तथासङ्कल्पनं क्वचित् ।
न दुष्टं शुभभावत्वात्, तच्छुद्धापरयोगवत् ॥४१॥

२१/१ सूक्ष्मबुद्ध्या सदा ज्ञेयो, धर्मो धर्मार्थिभिर्नरैः ।
अन्यथा धर्मबुद्ध्यैव, तद्विघातः प्रसज्यते ॥४२॥

२१/२ गृहीत्वा ग्लानभैषज्य-प्रदानाभिग्रहं यथा ।
तदप्राप्तौ तदन्तेऽस्य, शोकं समुपगच्छतः ॥४३॥

२२/१ भावशुद्धिरपि ज्ञेया, यैषा मार्गानुसारिणी ।
प्रज्ञापनाप्रियाऽत्यर्थं, न पुनः स्वाग्रहात्मिका ॥४४॥

२२/४ न मोहोद्रिक्तताऽभावे, स्वाग्रहो जायते क्वचित् ।
गुणवत्पारतन्त्र्यं हि, तदनुत्कर्षसाधकम् ॥४५॥

२२/५ अत एवागमज्ञोऽपि, दीक्षादानादिषु ध्रुवम् ।
क्षमाश्रमणहस्तेनेत्याह सर्वसु कर्मसु ॥४६॥

२३/१ यः शासनस्य मालिन्ये-ऽनाभोगेनापि वर्तते ।
स तन्मिथ्यात्वहेतुत्वाद्, अन्येषां प्राणिनां ध्रुवम् ॥४७॥

२३/२ बध्नात्यपि तदेवालं, परं संसारकारणम् ।
विपाकदारुणं घोरं, सर्वानर्थविवर्धनम् ॥४८॥

२३/३ यस्तून्नतौ यथाशक्ति, सोऽपि सम्यक्त्वहेतुताम् ।
अन्येषां प्रतिपद्येह, तदेवाप्नोत्यनुत्तरम् ॥४९॥

२४/८ दया भूतेषु वैराग्यं, विधिवद् गुरुपूजनम् ।
विशुद्धा शीलवृत्तिश्च, पुण्यं पुण्यानुबन्ध्यदः ॥५०॥

~~ हरिभद्रसूरिकृतं षोडशकप्रकरणम् ~~

१/१४ यद्भाषितं मुनीन्द्रैः, पापं खलु देशना परस्थाने ।
उन्मार्गनयनमेतद्, भवगहने दारुणविपाकम् ॥५१॥

२/२ बाह्याचरणप्रधाना, कर्तव्या देशनेह बालस्य ।
स्वयमपि च तदाचारः, तदग्रतो नियमतः सेव्यः ॥५२॥

२/७ मध्यमबुद्धेस्त्वीर्यासमिति-प्रभृति त्रिकोटिपरिशुद्धम् ।
आद्यन्तमध्ययोगैः, हितदं खलु साधुसद्वृत्तम् ॥५३॥

२/८ अष्टौ साधुभिरनिशं, मातर इव मातरः प्रवचनस्य ।
नियमेन न मोक्तव्याः, परमं कल्याणमिच्छद्भिः ॥५४॥

२/९ एतत्सचिवस्य सदा, साधोर्नियमान्न भवभयं भवन्ति ।
भवति च हितमत्यन्तं, फलदं विधिनाऽऽगमग्रहणम् ॥५५॥

२/१० गुरुपारतन्त्र्यमेव च, तद्बहुमानात् सदाशयानुगतम् ।
परमगुरुप्राप्तेरिह बीजं, तस्माच्च मोक्ष इति ॥५६॥

२/१२ वचनाराधनया खलु धर्मः, तद्बाधया त्वधर्म इति ।
इदमत्र धर्मगुह्यं, सर्वस्वं चैतदेवास्य ॥५७॥

२/१४ अस्मिन् हृदयस्थे सति, हृदयस्थस्तत्त्वतो मुनीन्द्र इति ।
हृदयस्थिते च तस्मिन्, नियमात् सर्वार्थसंसिद्धिः ॥५८॥

३/७ प्रणिधानं तत्समये स्थितिमत्, तदधः कृपाऽनुगं चैव ।
निरवद्यवस्तुविषयं, परार्थनिष्पत्तिसारं च ॥५९॥

३/८ तत्रैव तु प्रवृत्तिः, शुभसारोपायसङ्गताऽत्यन्तम् ।
अधिकृतयत्नातिशयाद्, औत्सुक्यविवर्जिता चैव ॥६०॥

३/९ विघ्नजयस्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः ।
मार्ग इह कण्टकज्वर-मोहजयसमः प्रवृत्तिफलः ॥६१॥

३/१० सिद्धिस्तत्तद्धर्मस्थानावाप्तिः, इह तात्त्विकी ज्ञेया ।
अधिके विनयादियुता, हीने च दयादिगुणसारा ॥६२॥

३/११ सिद्धेश्चोत्तरकार्यं विनियोगो-ऽवन्ध्यमेतदेतस्मिन् ।
सत्यन्वयसम्पत्त्या, सुन्दरमिति तत्परं यावत् ॥६३॥

३/१२ आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽवगन्तव्याः ।
भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा ॥६४॥

४/२ औदार्यं दाक्षिण्यं, पापजुगुप्साऽथ निर्मलो बोधः ।
लिङ्गानि धर्मसिद्धेः, प्रायेण जनप्रियत्वं च ॥६५॥

४/९ तन्नास्य विषयतृष्णा, प्रभवत्युच्चैर्न दृष्टिसंमोहः ।
अरुचिर्न धर्मपथ्ये, न च पापा क्रोधकण्डूतिः ॥६६॥

६/६ तत्रासन्नोऽपि जनो-ऽसम्बन्ध्यपि दानमानसत्कारैः ।
कुशलाशयवान् कार्यो, नियमाद् बोध्यङ्गमयमस्य ॥६७॥

६/१६ यतनातो न च हिंसा, यस्मादेषैव तन्निवृत्तिफला ।
तदधिकनिवृत्तिभावाद्, विहितमतोऽदुष्टमेतद् ॥६८॥

९/६ पिण्डक्रियागुणगतैः, गम्भीरैर्विविधवर्णसंयुक्तैः ।
आशयविशुद्धिजनकैः, संवेगपरायणैः पुण्यैः ॥६९॥

९/७ पापनिवेदनगर्भैः, प्रणिधानपुरस्सरैर्विचित्रार्थैः ।
अस्खलितादिगुणयुतैः, स्तोत्रैश्च महामतिग्रथितैः ॥७०॥

५/१३ न्यायात्तं स्वल्पमपि हि, भृत्यानुपरोधतो महादानम् ।
दीनतपस्व्यादौ, गुर्वाज्ञया दानमन्यत्तु ॥७१॥

५/१४ देवगुणपरिज्ञानात्, तद्भावानुगतमुत्तमं विधिना ।
स्याद् आदरादियुक्तं, यत् तद् देवार्चनमिष्टम् ॥७२॥

५/१५ एवं गुरुसेवादि च, काले सद्योगविघ्नवर्जनया ।
इत्यादिकृत्यकरणं, लोकोत्तरतत्त्वसंप्राप्तिः ॥७३॥

६/५ शास्त्रबहुमानतः खलु, सच्चेष्टातश्च धर्मनिष्पत्तिः ।
परपीडात्यागेन च, विपर्ययात् पापसिद्धिरिव ॥७४॥

७/१३ आगमतन्त्रः सततं, तद्वद्भक्त्यादिलिङ्गसंसिद्धः ।
चेष्टायां तत्स्मृतिमान्, शस्तः खल्वाशयविशेषः ॥७५॥

१०/३ यत्रादरोऽस्ति परमः, प्रीतिश्च हितोदया भवति कर्तुः ।
शेषत्यागेन करोति यच्च, तत् प्रीत्यनुष्ठानम् ॥७६॥

१०/४ गौरवविशेषयोगाद्, बुद्धिमतो यद् विशेषतरयोगम् ।
क्रिययेतरतुल्यमपि, ज्ञेयं तद् भक्त्यनुष्ठानम् ॥७७॥

१०/६ वचनात्मिका प्रवृत्तिः, सर्वत्रौचित्ययोगतो या तु ।
वचनानुष्ठानमिदं, चारित्रवतो नियोगेन ॥७८॥

१०/७ यत्त्वभ्यासातिशयात्, सात्मीभूतमिव चेष्ट्यते सद्भिः ।
तदसङ्गानुष्ठानं, भवति त्वेतत्तदावेधात् ॥७९॥

१०/१० उपकार्यपकारिविपाकवचन-धर्मोत्तरा मता क्षान्तिः ।
आद्यद्वये त्रिभेदा, चरमद्वितये द्विभेदेति ॥८०॥

१०/१४ शृण्वन्नपि सिद्धान्तं, विषयपिपासाऽतिरेकतः पापः ।
प्राप्नोति न संवेगं, तदाऽपि यः सोऽचिकित्स्य इति ॥८१॥

१०/१५ नैवंविधस्य शस्तं, मण्डल्युपवेशनप्रदानमपि ।
कुर्वन्नेतद् गुरुरपि, तदधिकदोषोऽवगन्तव्यः ॥८२॥

११/१ शुश्रूषा चेहाद्यं लिङ्गं, खलु वर्णयन्ति विद्वांसः ।
तदभावेऽपि श्रावणं, असिराऽवनिकूपखननसमम् ॥८३॥

१२/३ यो निरनुबन्धदोषात्, श्राद्धोऽनाभोगवान् वृजिनभीरुः ।
गुरुभक्तो ग्रहरहितः, सोऽपि ज्ञान्येव तत्फलतः ॥८४॥

१२/४ चक्षुष्मानेकः स्याद्, अन्धोऽन्यस्तन्मतानुवृत्तिपरः ।
गन्तारौ गन्तव्यं, प्राप्नुत एतौ युगपदेव ॥८५॥

१२/५ यस्यास्ति सत्क्रियायां, इत्थं सामर्थ्ययोग्यताऽविकला ।
गुरुभावप्रतिबन्धाद्, दीक्षोचित एव सोऽपि किल ॥८६॥

१३/१ गुरुविनयः स्वाध्यायो, योगाभ्यासः परार्थकरणं च ।
इतिकर्तव्यतया सह, विज्ञेया साधुसच्चेष्टा ॥८७॥

१३/२ औचित्याद् गुरुवृत्तिः, बहुमानस्तत्कृतज्ञताचित्तम् ।
आज्ञायोगस्तत्सत्यकरणता, चेति गुरुविनयः ॥८७॥

१३/५ विहितानुष्ठानपरस्य, तत्त्वतो योगशुद्धिसचिवस्य ।
भिक्षाऽटनादि सर्वं, परार्थकरणं यतेर्ज्ञेयम् ॥८९॥

४/१५ परहितचिन्ता मैत्री, परदुःखविनाशिनी तथा करुणा ।
परसुखतुष्टिर्मुदिता, परदोषोपेक्षणमुपेक्षा ॥९०॥

१३/९ उपकारिस्वजनेतरसामान्य-गता चतुर्विधा मैत्री ।
मोहासुखसंवेगान्यहितयुता चैव करुणेति ॥९१॥

१३/१० सुखमात्रे सद्धेतौ, अनुबन्धयुते परे च मुदिता तु ।
करुणाऽनुबन्धनिर्वेद-तत्त्वसारा ह्युपेक्षेति ॥९२॥

१३/१५ सिद्धान्तकथा सत्सङ्गमश्च, मृत्युपरिभावनं चैव ।
दुष्कृतसुकृतविपाका-लोचनमथ मूलमस्यापि ॥९३॥

१४/३ खेदोद्वेगक्षेपोत्थान-भ्रान्त्यन्यमुद्रुगासङ्गैः ।
युक्तानि हि चित्तानि, प्रबन्धतो वर्जयेन् मतिमानः ॥९४॥

१४/४ खेदे दार्ढ्याभावात्, न प्रणिधानमिह सुन्दरं भवति ।
एतच्चेह प्रवरं, कृषिकर्मणि सलिलवज्ज्ञेयम् ॥९५॥

१४/५ उद्वेगे विद्वेषाद्, विष्टिसमं करणमस्य पापेन ।
योगिकुलजन्मबाधकं, अलमेतद् तद्विदामिष्टम् ॥९६॥

१४/६ क्षेपेऽपि चाप्रबन्धाद्, इष्टफलसमृद्धये न जात्वेतत् ।
नासकृदुत्पाटनतः, शालिरपि फलावहः पुंसः ॥९७॥

१४/७ उत्थाने निर्वेदात्, करणमकरणोदयं सदैवास्य ।
अत्यागत्यागोचितं, एतत्तु स्वसमयेऽपि मतम् ॥९८॥

१४/८ भ्रान्तौ विभ्रमयोगात्, न हि संस्कारः कृतेतरादिगतः ।
तदभावे तत्करणं, प्रक्रान्तविरोध्यनिष्टफलम् ॥९९॥

१४/९ अन्यमुदि तत्र रागात्, तदनादरताऽर्थतो महाऽपाया ।
सर्वानर्थनिमित्तं, मुद्विषयवृष्ट्यङ्गाराभा ॥१००॥

१४/१० रुजि निजजात्युच्छेदात्, करणमपि हि नेष्टसिद्धये नियमात् ।
अस्येत्यननुष्ठानं, तेनैतद् वन्ध्यफलमेव ॥१०१॥

१४/११ आसङ्गेऽप्यविधानाद्, असङ्गसक्त्युचितमित्यफलमेतत् ।
भवतीष्टफलमुच्चैः, तदप्यसङ्गं यतः परमम् ॥१०२॥

११/७ वाक्यार्थमात्रविषयं, कोष्ठकगतबीजसंनिभं ज्ञानम् ।
श्रुतमयमिह विज्ञेयं, मिथ्याऽभिनिवेशरहितमलम् ॥१०३॥

११/८ यत्तु महावाक्यार्थजं, अतिसूक्ष्मसुयुक्तिचिन्तयोपेतम् ।
उदक इव तैलबिन्दुः, विसर्पि चिन्तामयं तत् स्यात् ॥१०४॥

११/९ ऐदम्पर्यगतं यद्, विध्यादौ यत्नवत् तथैवोच्चैः ।
एतत्तु भावनामयं, अशुद्धसद्रत्नदीप्तिसमम् ॥१०५॥

१६/१२ ऐदम्पर्यं शुद्ध्यति, यत्रासावगमो सुपरिशुद्धः ।
तदभावे तद्देशः, कश्चित् स्यादन्यथाग्रहणात् ॥१०६॥

१६/१३ तत्रापि न द्वेषः कार्यो, विषयस्तु यत्नतः मृग्यः ।
तस्यापि न सद्वचनं, सर्वं यत् प्रवचनादन्यत् ॥१०७॥

१६/१४ अद्वेषो जिज्ञासा, शुश्रूषा श्रवणबोधमीमांसाः ।
परिशुद्धा प्रतिपत्तिः, प्रवृत्तिरष्टाङ्गिकी तत्त्वे ॥१०८॥

## યોગબિંદુ - યોગદૃષ્ટિ સમુચ્ચય સૂક્ત - રત્ન - મંજૂષા

~~ हरिभद्रसूरिकृतं योगबिन्दुप्रकरणं ~~

१ नत्वाऽऽद्यन्तविनिर्मुक्तं, शिवं योगीन्द्रवन्दितम् ।
योगबिन्दुं प्रवक्ष्यामि, तत्त्वसिद्ध्यै महोदयम् ॥१॥

३७ योगः कल्पतरुः श्रेष्ठो, योगश्चिन्तामणिः परः ।
योगः प्रधानं धर्माणां, योगः सिद्धेः स्वयंग्रहः ॥२॥

३८ तथा च जन्मबीजाग्निः, जरसोऽपि जरा परा ।
दुःखानां राजयक्ष्माऽयं, मृत्योर्मृत्युरुदाहृतः ॥३॥

३९ कुण्ठीभवन्ति तीक्ष्णानि, मन्मथास्त्राणि सर्वथा ।
योगवर्मावृते चित्ते, तपश्छिद्रकराण्यपि ॥४॥

४१ मलिनस्य यथा हेम्नोः, वह्नेः शुद्धिर्नियोगतः ।
योगाग्नेश्चेतसस्तद्वद्, अविद्यामलिनात्मनः ॥५॥

५२ किञ्चान्यद् योगतः स्थैर्यं, धैर्यं श्रद्धा च जायते ।
मैत्री जनप्रियत्वं च, प्रातिभं तत्त्वभासनम् ॥६॥

५३ विनिवृत्ताग्रहत्वं च, तथा द्वन्द्वसहिष्णुता ।
तदभावश्च लाभश्च, बाह्यानां कालसङ्गतः ॥७॥

५४ धृतिः क्षमा सदाचारो, योगवृद्धिः शुभोदया ।
आदेयता गुरुत्वं च, शमसौख्यमनुत्तरम् ॥८॥

५०९ पुत्रदारादिसंसारः, पुंसां सम्मूढचेतसाम् ।
विदुषां शास्त्रसंसारः, सद्योगरहितात्मनाम् ॥९॥

४१२ आगमेनानुमानेन, ध्यानाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां, लभते योगमुत्तमम् ॥१०॥

८७ क्षुद्रो लाभरतिर्दीनो, मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्यात्, निष्फलारम्भसङ्गतः ॥११॥

८८ लोकाराधनहेतोर्या, मलिनेनान्तरात्मना ।
क्रियते सत्क्रिया साऽत्र, लोकपङ्क्तिरुदाहृता ॥१२॥

८९ भवाभिनन्दिनो लोक-पङ्क्त्या धर्मक्रियामपि ।
महतो हीनदृष्ट्योच्चैः, दुरन्तां तद्विदो विदुः ॥१३॥

९० धर्मार्थं लोकपङ्क्तिः स्यात्, कल्याणाङ्गं महामतेः ।
तदर्थं तु पुनर्धर्मः, पापायाल्पधियामलम् ॥१४॥

१०९ पूर्वसेवा तु तन्त्रज्ञैः, गुरुदेवादिपूजनम् ।
सदाचारस्तपो मुक्त्यद्वेषश्चेह प्रकीर्तिता ॥१५॥

११० माता पिता कलाचार्य, एतेषां ज्ञातयस्तथा ।
वृद्धा धर्मोपदेष्टारो, गुरुवर्गः सतां मतः ॥१६॥

११२ पूजनं चास्य विज्ञेयं, त्रिसन्ध्यं नमनक्रिया ।
तस्यानवसरेऽप्युच्चैः, चेतस्यारोपितस्य तु ॥१७॥

११३ अभ्युत्थानादियोगश्च, तदन्ते निभृतासनम् ।
नामग्रहश्च नास्थाने, नावर्णश्रवणं क्वचित् ॥१८॥

११४ त्यागश्च तदनिष्टानां, तदिष्टेषु प्रवर्तनम् ।
औचित्येन त्विदं ज्ञेयं, प्राहुर्धर्माद्यपीडया ॥१९॥

११५ तदासनाद्यभोगश्च, तीर्थे तद्वित्तयोजनम् ।
तद्बिम्बन्याससंस्कार, ऊर्ध्वदेहक्रिया परा ॥२०॥

१२१ पात्रे दीनादिवर्गे च, दानं विधिवदिष्यते ।
पोष्यवर्गाविरोधेन, न विरुद्धं स्वतश्च यत् ॥२१॥

१२२ व्रतस्था लिङ्गिनः पात्रं, अपचास्तु विशेषतः ।
स्वसिद्धान्ताविरोधेन, वर्तन्ते ये सदैव हि ॥२२॥

१२३ दीनान्धकृपणा ये तु, व्याधिग्रस्ता विशेषतः ।
निःस्वाः क्रियाऽन्तराशक्ता, एतद्वर्गो हि मीलकः ॥२३॥

१२५ धर्मस्यादिपदं दानं, दानं दारिद्र्यनाशनम् ।
जनप्रियकरं दानं, दानं कीर्त्त्यादिवर्धनम् ॥२४॥

१२६ लोकापवादभीरुत्वं, दीनाभ्युद्धरणादरः ।
कृतज्ञता सुदाक्षिण्यं, सदाचारः प्रकीर्तितः ॥२५॥

१२७ सर्वत्र निन्दासन्त्यागो, वर्णवादश्च साधुषु ।
आपद्यदैन्यमत्यन्तं, तद्वत् सम्पदि नम्रता ॥२६॥

१२८ प्रस्तावे मितभाषित्वं, अविसंवादनं तथा ।
प्रतिपन्नक्रिया चेति, कुलधर्मानुपालनम् ॥२७॥

१२९ असद्व्ययपरित्यागः, स्थाने चैतत्क्रिया सदा ।
प्रधानकार्ये निर्बन्धः, प्रमादस्य विवर्जनम् ॥२८॥

१३० लोकाचारानुवृत्तिश्च, सर्वत्रौचित्यपालनम् ।
प्रवृत्तिर्गर्हिते नेति, प्राणैः कण्ठगतैरपि ॥२९॥

११८ सर्वान् देवान् नमस्यन्ति, नैकं देवं समाश्रिताः ।
जितेन्द्रिया जितक्रोधा, दुर्गाण्यतितरन्ति ते ॥३०॥

१५६ विषं लब्ध्याद्यपेक्षात, इदं सच्चित्तमारणात् ।
महतोऽल्पार्थनाज्ज्ञेयं, लघुत्वापादनात् तथा ॥३१॥

१५७ दिव्यभोगाभिलाषेण, गरमाहुर्मनीषिणः ।
एतद् विहितनीत्यैव, कालान्तरनिपातनात् ॥३२॥

१५८ अनाभोगवतश्चैतद्, अननुष्ठानमुच्यते ।
सम्प्रमुग्धं मनोऽस्येति, ततश्चैतद् यथोदितम् ॥३३॥

१५९ एतद्रागादिदं हेतुः, श्रेष्ठो योगविदो विदुः ।
सदनुष्ठानभावस्य, शुभभावांशयोगतः ॥३४॥

१६० जिनोदितमिति त्वाहुः, भावसारमदः पुनः ।
संवेगगर्भमत्यन्तं, अमृतं मुनिपुङ्गवाः ॥३५॥

२०३ भिन्नग्रन्थेस्तु यत्प्रायो, मोक्षे चित्तं भवे तनुः ।
तस्य तत्सर्व एवेह, योगो योगो हि भावतः ॥३६॥

२०४ नार्या यथाऽन्यसक्तायाः, तत्र भावे सदा स्थिते ।
तद्योगः पापबन्धश्च, तथा मोक्षेऽस्य दृश्यताम् ॥३७॥

२५३ शुश्रूषा धर्मरागश्च, गुरुदेवादिपूजनम् ।
यथाशक्ति विनिर्दिष्टं, लिङ्गमस्य महात्मभिः ॥३८॥

२११ विषयात्माऽनुबन्धैस्तु, त्रिधा शुद्धमुदाहृतम् ।
अनुष्ठानं प्रधानत्वं, ज्ञेयमस्य यथोत्तरम् ॥३९॥

२१२ आद्यं यदेव मुक्त्यर्थं, क्रियते पतनाद्यपि ।
तदेव मुक्त्युपादेय-लेशभावाच्छुभं मतम् ॥४०॥

२१३ द्वितीयं तु यमाद्येव, लोकदृष्ट्या व्यवस्थितम् ।
न यथाशास्त्रमेवेह, सम्यग्ज्ञानाद्ययोगतः ॥४१॥

२१४ तृतीयमप्यदः किन्तु, तत्त्वसंवेदनाऽनुगम् ।
प्रशान्तवृत्त्या सर्वत्र, दृढमौत्सुक्यवर्जितम् ॥४२॥

२१५ आद्यान्न दोषविगमः, तमोबाहुल्ययोगतः ।
तद्योग्यजन्मसन्धानं, अत एके प्रचक्षते ॥४३॥

२१७ द्वितीयाद् दोषविगमो, न त्वेकान्तानुबन्धनात् ।
गुरुलाघवचिन्तादि, न यत्तत्र नियोगतः ॥४४॥

२१९ तृतीयाद् दोषविगमः, सानुबन्धो नियोगतः ।
गृहाद्यभूमिकाऽऽपात-तुल्यः कैश्चिदुदाहृतः ॥४५॥

१४८ सच्चेष्टितमपि स्तोकं, गुरुदोषवतो न तत् ।
भौतहन्तुर्यथाऽन्यत्र, पादस्पर्शनिषेधनम् ॥४६॥

१४४ अत एव च शस्त्राग्नि-व्यालदुर्ग्रहसन्निभः ।
श्रामण्यदुर्ग्रहोऽस्वन्तः, शास्त्र उक्तो महात्मभिः ॥४७॥

२२५ पापामयौषधं शास्त्रं, शास्त्रं पुण्यनिबन्धनम् ।
चक्षुः सर्वत्रगं शास्त्रं, शास्त्रं सर्वार्थसाधनम् ॥४८॥

२२८ यस्य त्वनादरः शास्त्रे, तस्य श्रद्धादयो गुणाः ।
उन्मत्तगुणतुल्यत्वात्, न प्रशंसाऽऽस्पदं सताम् ॥४९॥

२२९ मलिनस्य यथाऽत्यन्तं, जलं वस्त्रस्य शोधनम् ।
अन्तःकरणरत्नस्य, तथा शास्त्रं विदुर्बुधाः ॥५०॥

२३० शास्त्रे भक्तिर्जगद्वन्द्यैः, मुक्तेर्दूती परोदिता ।
अत्रैवेयमतो न्याय्या, तत्प्राप्त्यासन्नभावतः ॥५१॥

२३१ तथाऽऽत्मगुरुलिङ्गानि, प्रत्ययस्त्रिविधो मतः ।
सर्वत्र सदनुष्ठाने, योगमार्गे विशेषतः ॥५२॥

३१ अध्यात्मं भावना ध्यानं, समता वृत्तिसंक्षयः ।
मोक्षेण योजनाद् योग, एष श्रेष्ठो यथोत्तरम् ॥५३॥

३५८ औचित्याद् वृत्तयुक्तस्य, वचनात् तत्त्वचिन्तनम् ।
मैत्र्यादिसारमत्यन्तं, अध्यात्मं तद्विदो विदुः ॥५४॥

३६० अभ्यासोऽस्यैव विज्ञेयः, प्रत्यहं वृद्धिसङ्गतः ।
मनःसमाधिसंयुक्तः, पौनःपुन्येन भावना ॥५५॥

३६२ शुभैकालम्बनं चित्तं, ध्यानमाहुर्मनीषिणः ।
स्थिरप्रदीपसदृशं, सूक्ष्माभोगसमन्वितम् ॥५६॥

३६४ अविद्याकल्पितेषूच्चैः, इष्टानिष्टेषु वस्तुषु ।
संज्ञानात् तद्व्युदासेन, समता समतोच्यते ॥५७॥

३६६ अन्यसंयोगवृत्तीनां, यो निरोधस्तथा तथा ।
अपुनर्भावरूपेण, स तु तत्संक्षयो मतः ॥५८॥

~~~ हरिभद्रसूरिकृतः योगदृष्टिसमुच्चयः ~~~

१ नत्वेच्छायोगतोऽयोगं, योगिगम्यं जिनोत्तमम् ।
वीरं वक्ष्ये समासेन, योगं तद्दृष्टिभेदतः ॥५९॥

३ कर्तुमिच्छोः श्रुतार्थस्य, ज्ञानिनोऽपि प्रमादतः ।
विकलो धर्मयोगो यः, स इच्छायोग उच्यते ॥६०॥

४ शास्त्रयोगस्त्विह ज्ञेयो, यथाशक्त्यप्रमादिनः ।
श्राद्धस्य तीव्रबोधेन, वचसाऽविकलस्तथा ॥६१॥

५ शास्त्रसन्दर्शितोपायः, तदतिक्रान्तगोचरः ।
शक्त्युद्रेकाद् विशेषेण, सामर्थ्याख्योऽयमुत्तमः ॥६२॥

२३ जिनेषु कुशलं चित्तं, तन्नमस्कार एव च ।
प्रणामादि च संशुद्धं, योगबीजमनुत्तमम् ॥६३॥

२५ उपादेयधियाऽत्यन्तं, संज्ञाविष्कम्भणान्वितम् ।
फलाभिसन्धिरहितं, संशुद्धं ह्येतदीदृशम् ॥६४॥
~~~

२६ आचार्यादिष्वपि ह्येतद्, विशुद्धं भावयोगिषु ।
वैयावृत्त्यं च विधिवत्, शुद्धाशयविशेषतः ॥६५॥

२७ भवोद्वेगश्च सहजो, द्रव्याभिग्रहपालनम् ।
तथा सिद्धान्तमाश्रित्य, विधिना लेखनादि च ॥६६॥

३२ दुःखितेषु दयाऽत्यन्तं, अद्वेषो गुणवत्सु च ।
औचित्यात् सेवनं चैव, सर्वत्रैवाविशेषतः ॥६७॥

६८ नास्माकं महती प्रज्ञा, सुमहान् शास्त्रविस्तरः ।
शिष्टाः प्रमाणमिह तद्, इत्यस्यां मन्यते सदा ॥६८॥

५२ कान्तकान्तासमेतस्य, दिव्यगेयश्रुतौ यथा ।
यूनो भवति शुश्रूषा, तथाऽस्यां तत्त्वगोचरा ॥६९॥

५३ बोधाम्भःस्रोतसश्चैषा, सिरातुल्या सतां मता ।
अभावेऽस्याः श्रुतं व्यर्थं, असिराऽवनिकूपवत् ॥७०॥

५४ श्रुताभावेऽपि भावेऽस्याः, शुभभावप्रवृत्तितः ।
फलं कर्मक्षयाख्यं स्यात्, परबोधनिबन्धनम् ॥७१॥

५८ प्राणेभ्योऽपि गुरुर्धर्मः, सत्यामस्यामसंशयम् ।
प्राणांस्त्यजति धर्मार्थं, न धर्मं प्राणसङ्कटे ॥७२॥

५९ एक एव सुहृद् धर्मो, मृतमप्यनुयाति यः ।
शरीरेण समं नाशं, सर्वमन्यत् तु गच्छति ॥७३॥

७९ जन्ममृत्युजराव्याधि-रोगशोकाद्युपद्रुतम् ।
वीक्षमाणा अपि भवं, नोद्विजन्तेऽतिमोहतः ॥७४॥

८० कुकृत्यं कृत्यमाभाति, कृत्यं चाकृत्यवत् सदा ।
दुःखे सुखधियाऽऽकृष्टा, कच्छूकण्डूयकादिवत् ॥७५॥

८१ यथा कण्डूयनेष्वेषां, धीर्न कच्छूनिवर्तने ।
भोगाङ्गेषु तथैतेषां, न तदिच्छा परिक्षये ॥७६॥

८४ बडिशामिषवत् तुच्छे, कुसुखे दारुणोदये ।
सक्तास्त्यजन्ति सच्चेष्टां, धिगहो ! दारुणं तमः ॥७७॥

१५३ बालधूलीगृहक्रीडा-तुल्याऽस्यां भाति धीमताम् ।
तमोग्रन्थिविभेदेन, भवचेष्टाऽखिलैव हि ॥७८॥

१५४ मायामरीचिगन्धर्व-नगरस्वप्नसंनिभान् ।
बाह्यान् पश्यन्ति तत्त्वेन, भावान् श्रुतविवेकतः ॥७९॥

१५८ धर्मादपि भवन् भोगः, प्रायोऽनर्थाय देहिनाम् ।
चन्दनादपि सम्भूतो, दहत्येव हुताशनः ॥८०॥

१५९ भोगात् तदिच्छाविरतिः, स्कन्धभारानुपपत्तये ।
स्कन्धान्तरसमारोपः, तत्संस्कारविधानतः ॥८१॥

१६३ मायाऽम्भस्तत्त्वतः पश्यन्, अनुद्विग्नस्ततो ध्रुवम् ।
तन्मध्येन प्रयात्येव, यथा व्याघातवर्जितः ॥८२॥

१६४ भोगान् स्वरूपतः पश्यन्, तथा मायोदकोपमान् ।
भुञ्जानोऽपि ह्यसङ्गः सन्, प्रयात्येव परं पदम् ॥८३॥

१७० सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम् ।
एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥८४॥

१७१ पुण्यापेक्षमपि ह्येवं, सुखं परवशं स्थितम् ।
ततश्च दुःखमेवैतत्, तल्लक्षणनियोगतः ॥८५॥

१०९ संसारिषु हि देवेषु, भक्तिस्तत्कायगामिनाम् ।
तदतीते पुनस्तत्त्वे, तदतीतार्थयायिनाम् ॥८६॥

८७ बोधरोगः शमापायः श्रद्धाभङ्गोऽभिमानकृत् ।
कुतर्कश्चेतसो व्यक्तं, भावशत्रुरनेकधा ॥८७॥

८८ कुतर्केऽभिनिवेशस्तद्, न युक्तो मुक्तिवादिनाम् ।
युक्तः पुनः श्रुते शीले, समाधौ च महात्मनाम् ॥८८॥

१४६ ग्रहः सर्वत्र तत्त्वेन, मुमुक्षूणामसङ्गतः ।
मुक्तौ धर्मा अपि प्रायः, त्यक्तव्या किमनेन तत् ? ॥८९॥

१२१ आदरः करणे प्रीतिः, अविघ्नः सम्पदागमः ।
जिज्ञासा तज्ज्ञसेवा च, सदनुष्ठानलक्षणम् ॥९०॥

११९ इन्द्रियार्थाश्रया बुद्धिः, ज्ञानं त्वागमपूर्वकम् ।
सदनुष्ठानवच्चैतद्, असंमोहोऽभिधीयते ॥९१॥

१२० रत्नोपलम्भतज्ज्ञान-तत्प्राप्त्यादि यथाक्रमम् ।
इहोदाहरणं साधु, ज्ञेयं बुद्ध्यादिसिद्धये ॥९२॥

१२२ बुद्धिपूर्वाणि कर्माणि, सर्वाण्येवेह देहिनाम् ।
संसारफलदान्येव, विपाकविरसत्वतः ॥९३॥

१२३ ज्ञानपूर्वाणि तान्येव, मुक्त्यङ्गं कुलयोगिनाम् ।
श्रुतशक्तिसमावेशाद्, अनुबन्धफलत्वतः ॥९४॥

१२४ असंमोहसमुत्थानि, त्वेकान्तपरिशुद्धितः ।
निर्वाणफलदान्याशु, भवातीतार्थयायिनाम् ॥९५॥

१४८ परपीडेह सूक्ष्माऽपि, वर्जनीया प्रयत्नतः ।
तद्वत् तदुपकारेऽपि, यतितव्यं सदैव हि ॥९६॥

१४९ गुरवो देवता विप्रा, यतयश्च तपोधनाः ।
पूजनीया महात्मानः, सुप्रयत्नेन चेतसा ॥९७॥

२०८ ये योगिनां कुले जाताः, तद्धर्मानुगताश्च ये ।
कुलयोगिन उच्यन्ते, गोत्रवन्तोऽपि नापरे ॥९८॥

२०९ सर्वत्राद्वेषिणश्चैते, गुरुदेवद्विजप्रियाः ।
दयालवो विनीताश्च, बोधवन्तो जितेन्द्रियाः ॥९९॥

२१० प्रवृत्तचक्रास्तु पुनः, यमद्वयसमाश्रयाः ।
शेषद्वयार्थिनोऽत्यन्तं, शुश्रूषादिगुणान्विताः ॥१००॥

२१३ तद्वत्कथाप्रीतियुता, तथाऽविपरिणामिनी ।
यमेष्विच्छाऽवसेयेह, प्रथमो यम एव तु ॥१०१॥

२१४ सर्वत्र शमसारं तु, यमपालनमेव यत् ।
प्रवृत्तिरिह विज्ञेया, द्वितीयो यम एव तत् ॥१०२॥

२१५ विपक्षचिन्तारहितं, यमपालनमेव यत् ।
तत् स्थैर्यमिह विज्ञेयं, तृतीयो यम एव हि ॥१०३॥

२१६ परार्थसाधकं त्वेतत्, सिद्धिः शुद्धान्तरात्मनः ।
अचिन्त्यशक्तियोगेन, चतुर्थो यम एव तु ॥१०४॥

२० प्रयाणभङ्गाभावेन, निशि स्वापसमः पुनः ।
विघातो दिव्यभवतः, चरणस्योपजायते ॥१०५॥

२१७ सद्भिः कल्याणसंपन्नैः, दर्शनादपि पावनैः ।
तथादर्शनतो योग, आद्यावञ्चक उच्यते ॥१०६॥

२१८ तेषामेव प्रणामादि-क्रियानियम इत्यलम् ।
क्रियाऽवञ्चकयोगः स्यात्, महापापक्षयोदयः ॥१०७॥

२१९ फलावञ्चकयोगस्तु, सद्भ्य एव नियोगतः ।
सानुबन्धफलावाप्तिः, धर्मसिद्धौ सतां मता ॥१०८॥

## द्धात्रिंशद् द्धात्रिंशिका सूक्त - रत्न - मंजूषा

## यशोविजयकृतं द्वात्रिंशद्द्वात्रिंशिकाप्रकरणं

१/१ ऐन्द्रशर्मप्रदं दानम्, अनुकम्पासमन्वितम् ।
भक्त्या सुपात्रदानं तु, मोक्षदं देशितं जिनैः ॥१॥

१/२० भक्तिस्तु भवनिस्तार-वाञ्छा स्वस्य सुपात्रतः ।
तया दत्तं सुपात्राय, बहुकर्मक्षयक्षमम् ॥२॥

१/७ क्षेत्रादि व्यवहारेण, दृश्यते फलसाधनम् ।
निश्चयेन पुनर्भावः, केवलः फलभेदकृत् ॥३॥

१/८ कालेऽल्पमपि लाभाय, नाकाले कर्म बह्वपि ।
वृष्टौ वृद्धिः कणस्यापि, कणकोटिर्वृथाऽन्यथा ॥४॥

१०/११ प्रणिधानं क्रियानिष्ठम्, अधोवृत्तिकृपाऽनुगम् ।
परोपकारसारं च, चित्तं पापविवर्जितम् ॥५॥

१०/१२ प्रवृत्तिः प्रकृतस्थाने, यत्नातिशयसम्भवा ।
अन्याभिलाषरहिता, चेतःपरिणति स्थिरा ॥६॥

१०/१३ बाह्यान्तर्व्याधिमिथ्यात्व-जयव्यङ्ग्याशयात्मकः ।
कण्टकज्वरमोहानां, जयैर्विघ्नजयः समः ॥७॥

१०/१४ सिद्धिस्तात्त्विकधर्माप्तिः, साक्षादनुभवात्मिका ।
कृपोपकारविनयान्विता हीनादिषु क्रमात् ॥८॥

१०/१५ अन्यस्य योजनं धर्मे, विनियोगस्तदुत्तरम् ।
कार्यमन्वयसम्पत्त्या, तदवन्ध्यफलं मतम् ॥९॥

१०/१६ एतैराशययोगैस्तु, विना धर्माय न क्रिया ।
प्रत्युत प्रत्यपायाय, लोभक्रोधक्रिया यथा ॥१०॥

१०/१६ शिरोदकसमो भावः, क्रिया च खननोपमा ।
भावपूर्वादनुष्ठानाद्, भाववृद्धिरतो ध्रुवा ॥११॥

१०/१६ मण्डूकचूर्णसदृशः, क्लेशध्वंसः क्रियाकृतः ।
तद्भस्मसदृशस्तु स्याद्, भावपूर्वक्रियाकृतः ॥१२॥

३/३० गुणी च गुणरागी च, गुणद्वेषी च साधुषु ।
श्रूयन्ते व्यक्तमुत्कृष्ट-मध्यमाधमबुद्धयः ॥१३॥

३२/५ सज्जनस्य विदुषां गुणग्रहे, दूषणे निविशते खलस्य धीः ।
चक्रवाकदृगहर्पतेर्द्युतौ, घूकदृक् तमसि सङ्गमङ्गति ॥१४॥

५/४ अप्रीतिर्नैव कस्यापि, कार्या धर्मोद्यतेन वै ।
इत्थं शुभानुबन्धः स्याद्, अत्रोदाहरणं प्रभुः ॥१५॥

४/२० अपरस्त्वाह राज्यादि-महाऽधिकरणं ददत् ।
शिल्पादि दर्शयंश्चार्हन्, महत्त्वं कथमृच्छति ? ॥१६॥

४/२१ तत्रेत्थमेव प्रकृताधिकदोषनिवारणात् ।
शक्तौ सत्यामुपेक्षाया, अयुक्तत्वान्महात्मनाम् ॥१७॥

४/२२ नागादे रक्षणायेव, गर्त्ताद्याकर्षणेऽत्र न ।
दोषोऽन्यथोपदेशेऽपि, स स्यात् परनयोद्भावनात् ॥१८॥

४/२८ अर्हमित्यक्षरं यस्य, चित्ते स्फुरति सर्वदा ।
परं ब्रह्म ततः शब्द-ब्रह्मणः सोऽधिगच्छति ॥१९॥

४/२९ सारमेतन्मया लब्धम्, श्रुताब्धेरवगाहनात् ।
भक्तिर्भागवती बीजं, परमानन्दसम्पदाम् ॥२०॥

१/३१ शुभयोगेऽपि यो दोषो, द्रव्यतः कोऽपि जायते ।
कूपज्ञातेन स पुनः, नानिष्टो यतनावतः ॥२१॥

१४/२७ आत्मनेष्टं गुरुर्ब्रूते, लिङ्गान्यपि वदन्ति तत् ।
त्रिधाऽयं प्रत्ययः प्रोक्तः, सम्पूर्णं सिद्धिसाधनम् ॥२२॥

२०/३१ मिथ्यात्वे मन्दतां प्राप्ते, मित्राद्या अपि दृष्टयः ।
मार्गाभिमुखभावेन, कुर्वते मोक्षयोजनम् ॥२३॥

२०/३२ प्रकृत्या भद्रकः शान्तो, विनीतो मृदुरुत्तमः ।
सूत्रे मिथ्यादृगप्युक्तः, परमानन्दभागतः ॥२४॥

१५/१ लक्ष्यते ग्रन्थिभेदेन, सम्यग्दृष्टिः स्वतन्त्रतः ।
शुश्रूषाधर्मरागाभ्याम्, गुरुदेवादिपूजया ॥२५॥

१५/२ भोगिकिन्नरगेयादि-विषयाधिक्यमीयुषी ।
शुश्रूषाऽस्य न सुप्तेश-कथाऽर्थविषयोपमा ॥२६॥

१५/३ अप्राप्ते भगवद्वाक्ये, धावत्यस्य मनो यथा ।
विशेषदर्शिनोऽर्थेषु, प्राप्तपूर्वेषु नो तथा ॥२७॥

१५/४ धर्मरागोऽधिको भावाद्, भोगिनः स्त्र्यादिरागतः ।
प्रवृत्तिस्त्वन्यथाऽपि स्यात्, कर्मणो बलवत्तया ॥२८॥

१५/५ तदलाभेऽपि तद्राग-बलवत्त्वं न दुर्वचम् ।
पूयिकाद्यपि यद् भुङ्क्ते, घृतपूर्णप्रियो द्विजः ॥२९॥

१५/६ गुरुदेवादिपूजाऽस्य, त्यागात् कार्यान्तरस्य च ।
भावसारा विनिर्दिष्टा, निजशक्त्यनतिक्रमात् ॥३०॥

१५/११ तप्तलोहपदन्यास-तुल्या वृत्तिः क्वचिद् यदि ।
इत्युक्तेः कायपात्येव, चित्तपाती न स स्मृतः ॥३१॥

१५/२९ मिथ्यादृष्टिगृहीतं हि, मिथ्या सम्यगपि श्रुतम् ।
सम्यग्दृष्टिगृहीतं तु, सम्यग् मिथ्येति नः स्थितिः ॥३२॥

१७/३० औचित्येन प्रवृत्त्या च, सुदृष्टिर्यत्नतोऽधिकात् ।
पल्योपमपृथक्त्वस्य, चारित्रं लभते व्ययात् ॥३३॥

१७/३१ मार्गानुसारिता श्रद्धा, प्राज्ञप्रज्ञापनारतिः ।
गुणरागश्च लिङ्गानि, शक्यारम्भोऽपि चास्य हि ॥३४॥

२८/३ यस्य क्रियासु सामर्थ्यं, स्यात् सम्यग् गुरुरागतः ।
योग्यता तस्य दीक्षायाम्, अपि माषतुषाकृतेः ॥३५॥

२७/२ पृथिव्यादींश्च षट्कायान्, सुखेच्छूनसुखद्विषः ।
गणयित्वाऽऽत्मतुल्यान्, यो महाव्रतरतो भवेत् ॥३६॥

२७/५ न यश्चागामिनेऽर्थाय, सन्निधत्तेऽशनादिकम् ।
साधर्मिकान् निमन्त्र्यैव, भुक्त्वा स्वाध्यायकृच्च यः ॥३७॥

२७/६ न कुप्यति कथायां यो, नाप्युच्चैः कलहायते ।
उचितेऽनादरो यस्य, नादरोऽनुचितेऽपि च ॥३८॥

२७/७ आक्रोशादीन् महात्मा यः, सहते ग्रामकण्टकान् ।
न बिभेति भयेभ्यश्च, स्मशाने प्रतिमास्थितः ॥३९॥

२७/८ आक्रुष्टो वा हतो वाऽपि, लूषितो वा क्षमासमः ।
व्युत्सृष्टत्यक्तदेहो यो-ऽनिदानश्चाकुतूहलः ॥४०॥

२७/९ यश्च निर्ममभावेन, काये दोषैरुपप्लुते ।
जानाति पुद्गलान्यस्य[१], न मे किञ्चिदुपप्लुतम् ॥४१॥

२७/१२ अज्ञातोञ्छं चरन् शुद्धं, अलोलोऽरसगृद्धिमान् ।
ऋद्धिसत्कारपूजाश्च, जीवितं यो न काङ्क्षति ॥४२॥

२७/१३ यो न कोपकरं ब्रूयात्, कुशीलं न वदेत् परम् ।
प्रत्येकं पुण्यपापज्ञो, जात्यादिमदवर्जितः ॥४३॥

२७/१५ उद्वेगो हसितं शोको, रुदितं क्रन्दितं तथा ।
यस्य नास्ति जुगुप्सा च, क्रीडा चापि कदाचन ॥४४॥

२७/१६ इदं शरीरमशुचि, शुक्रशोणितसम्भवम् ।
अशाश्वतं च मत्वा यः, शाश्वतार्थं प्रवर्तते ॥४५॥

२७/१७ स भावभिक्षुर्भेतृत्वाद्, आगमस्योपयोगतः ।
भेदनेनोग्रतपसा, भेद्यस्याशुभकर्मणः ॥४६॥

२७/२३ संवेगो विषयत्यागः, सुशीलानां च सङ्गतिः ।
ज्ञानदर्शनचारित्राराधना विनयस्तपः ॥४७॥

२७/२४ क्षान्तिर्मार्दवमृजुता, तितिक्षा मुक्त्यदीनते ।
आवश्यकविशुद्धिश्च, भिक्षोर्लिङ्गान्यकीर्त्तयन् ॥४८॥

२८/१४ इन्द्रियाणां कषायाणां, गृह्यते मुण्डनोत्तरम् ।
या शिरोमुण्डनव्यङ्ग्या, तां सद्दीक्षां प्रचक्षते ॥४९॥

२८/१७ शरीरेणैव युध्यन्ते, दीक्षापरिणतौ बुधाः ।
दुर्लभं वैरिणं प्राप्य, व्यावृत्ता बाह्ययुद्धतः ॥५०॥

२८/१९ शरीराद्यनुरागस्तु, न गतो यस्य तत्त्वतः ।
तेषामेकाकिभावोऽपि, क्रोधादिनियतः स्मृतः ॥५१॥

२८/२१ ससङ्गप्रतिपत्तिर्हि, ममतावासनाऽत्मिका ।
असङ्गप्रतिपत्तिश्च, मुक्तिवाञ्छाऽनुरोधिनी ॥५२॥

२८/२४ नारत्यानन्दयोरस्याम्, अवकाशः कदाचन ।
प्रचारो भानुमत्यभ्रे, न तमस्तारकत्विषोः ॥५३॥

२/७ गृहत्यागादिकं लिङ्गं, बाह्यं शुद्धिं विना वृथा ।
न भेषजं विनाऽऽरोग्यं, वैद्यवेषेण रोगिणः ॥५४॥

३/९ दर्शयद्भिः कुलाचार-लोपादामुष्मिकं भयं ।
वारयद्भिः स्वगच्छीय-गृहिणः साधुसङ्गतिम् ॥५५॥

३/१० द्रव्यस्तवं यतीनामप्यनुपश्यद्भिरुत्तमम् ।
विवेकविकलं दानम्, स्थापयद्भिर्यथा तथा ॥५६॥

३/११ अपुष्टालम्बनोत्सिक्तैः, मुग्धमीनेषु मैनिकैः ।
इत्थं दोषादसंविग्नैः, हहा ! विश्वं विडम्बितम् ॥५७॥

३/१२ अप्येष शिथिलोल्लापो, न श्राव्यो गृहमेधिनाम् ।
सूक्ष्मोऽर्थ इत्यदोऽयुक्तं, सूत्रे तद्गुणवर्णनात् ॥५८॥

३/१५ समुदाये मनाग् दोष-भीतैः स्वेच्छाविहारिभिः ।
संविग्नैरप्यगीतार्थैः, परेभ्यो नातिरिच्यते ॥५९॥

३/१७ गीतार्थपारतन्त्र्येण, ज्ञानमज्ञानिनां मतम् ।
विना चक्षुष्मदाधारम्, अन्धः पथि कथं व्रजेत् ? ॥६०॥

३/१८ तत्त्यागेनाफलं तेषां, शुद्धोञ्छादिकमप्यहो ! ।
विपरीतफलं वा स्याद्, नौभङ्ग इव वारिधौ ॥६१॥

३/१९ अभिन्नग्रन्थयः प्रायः, कुर्वन्तोऽप्यतिदुष्करम् ।
बाह्या इवाव्रता मूढा, ध्वांक्षज्ञातेन दर्शिताः ॥६२॥

३/२१ ये तु स्वकर्मदोषेण, प्रमाद्यन्तोऽपि धार्मिकाः ।
संविग्नपाक्षिकास्तेऽपि, मार्गान्वाचयशालिनः ॥६३॥

३/२२ शुद्धप्ररूपणैतेषां, मूलमुत्तरसम्पदः ।
सुसाधुग्लानिभैषज्य-प्रदानाभ्यर्चनादिकाः ॥६४॥

३/२३ आत्मार्थं दीक्षणं तेषां, निषिद्धं श्रूयते श्रुते ।
ज्ञानाद्यर्थाऽन्यदीक्षा च, स्वोपसम्पच्च नाहिता ॥६५॥

१३/६ गुरुदोषवतः स्वल्पा, सत्क्रियाऽपि गुणाय न ।
भौतहन्तुर्यथा तस्य, पादस्पर्शनिषेधनम् ॥६६॥

२/८ गुरुदोषकृतां वृत्तम्, अपि त्याज्यं लघुत्यजाम् ।
जाड्यत्यागाय पतनं, ज्वलति ज्वलने यथा ॥६७॥

२/१६ एतेनैवोपवासादेः, वैयावृत्त्यादिघातिनः ।
नित्यत्वमेकभक्तादेः, जानन्ति बलवत्तया ॥६८॥

७/२९ यत्नतो जीवरक्षाऽर्था, तत्पीडाऽपि न दोषकृत् ।
अपीडनेऽपि पीडैव, भवेदयतनावतः ॥६९॥

७/३० रहस्यं परमं साधोः, समग्रश्रुतधारिणः ।
परिणामप्रमाणत्वं, निश्चयैकाग्रचेतसः ॥७०॥

७/३१ तिष्ठतो न शुभो भावो, ह्यसदायतनेषु च ।
गन्तव्यं तत् सदाचार-भावाभ्यन्तरवर्त्मना ॥७१॥

८/२८ हिंस्यकर्मविपाके यद्, दुष्टाशयनिमित्तता ।
हिंसकत्वं न तेनेदं, वैद्यस्य स्याद् रिपोरिव ॥७२॥

३/१ मार्गः प्रवर्तकं मानं, शब्दो भगवतोदितः ।
संविग्नाशठगीतार्थाचरणं चेति स द्विधा ॥७३॥

३/२ द्वितीयानादरे हन्त !, प्रथमस्याप्यनादरः ।
जीतस्यापि प्रधानत्वं, साम्प्रतं श्रूयते यतः ॥७४॥

३/३ अनुमाय सतामुक्ताचारेणागममूलताम् ।
पथि प्रवर्तमानानां, शङ्क्या नान्धपरम्परा ॥७५॥

३/५ निषेधः सर्वथा नास्ति, विधिर्वा सर्वथाऽऽगमे ।
आयं व्ययं च तुलयेत्, लाभाकाङ्क्षी वणिग् यथा ॥७६॥

३/६ प्रवाहधारापतितं, निषिद्धं यन्न दृश्यते ।
अत एव न तन्मत्या, दूषयन्ति विपश्चितः ॥७७॥

९/१६ स्तोकस्यापि प्रमादस्य, परिणामोऽतिदारुणः ।
वर्ण्यमानः प्रबन्धेन, निर्वेजन्या रसः स्मृतः ॥७८॥

२/२४ वचनाराधनाद् धर्मो-ऽधर्मस्तस्य च बाधनात् ।
धर्मगुह्यमिदं वाच्यं, बुधस्य च विपश्चिता ॥७९॥

२/२८ आदौ यथारुचि श्राव्यं, ततो वाच्यं नयान्तरम् ।
ज्ञाते त्वेकनयेऽन्यस्मात्, परिशिष्टं प्रदर्शयेत् ॥८०॥

२/२९ संविग्नभाविता ये स्युः, ये च पार्श्वस्थभाविताः ।
मुक्त्वा द्रव्यादिकं तेषां, शुद्धोञ्छं तेन दर्शितम् ॥८१॥

२/३० दुर्नयाभिनिवेशे तु, तं दृढं दूषयेदपि ।
दुष्टांशछेदतो नाङ्गी, दूषयेद् विषकण्टकः ॥८२॥

२/३१ जानाति दातुं गीतार्थो, य एवं धर्मदेशनाम् ।
कलिकालेऽपि तस्यैव, प्रभावाद् धर्म एधते ॥८३॥

३/१ विधिना कथयन् धर्मं, हीनोऽपि श्रुतदीपनात् ।
वरं तु न क्रियास्थोऽपि, मूढो धर्माध्वतस्करः ॥८४॥

२/३ अनुग्रहधिया वक्तुः, धर्मित्वं नियमेन यत् ।
भणितं तत्तु देशादि-पुरुषादिविदं प्रति ॥८५॥

२/५ अज्ञातवाग्विवेकानां, पण्डितत्वाभिमानिनाम् ।
विषं यद् वर्तते वाचि, मुखे नाशीविषस्य तत् ॥८६॥

३/२६ मार्गभेदस्तु यः कश्चिद्, निजमत्या विकल्प्यते ।
स तु सुन्दरबुद्ध्याऽपि, क्रियमाणो न सुन्दरः ॥८७॥

२६/१ शास्त्रस्योपनिषद् योगो, योगो मोक्षस्य वर्तनी ।
अपायशमनो योगो, योगः कल्याणकारणम् ॥८८॥

२६/२ संसारवृद्धिर्धनिनां, पुत्रदारादिना यथा ।
शास्त्रेणापि तथा योगं, विना हन्त ! विपश्चिताम् ॥८९॥

२६/२९ योगस्पृहाऽपि संसार-तापव्ययतपात्ययः ।
महोदयसरस्तीर-समीरलहरीभवः ॥९०॥

२९/१ कर्मणां द्राग विनयाद्, विनयो विदुषां मतः ।
अपवर्गफलाढ्यस्य, मूलं धर्मतरोरयम् ॥९१॥

२९/४ अभिग्रहासनत्यागौ, अभ्युत्थानाञ्जलिग्रहौ ।
कृतिकर्म च शुश्रूषा, गतिः पश्चाच्च सम्मुखम् ॥९२॥

२९/५ कायिकोऽष्टविधश्चायं, वाचिकश्च चतुर्विधः ।
हितं मितं चापरुषं, ब्रुवतोऽनुविचिन्त्य च ॥९३॥

२९/६ मानसश्च द्विधा शुद्ध-प्रवृत्त्याऽसन्निरोधतः ।
छद्मस्थानामयं प्रायः, सकलोऽन्यानुवृत्तितः ॥९४॥

२९/७ अर्हत्सिद्धकुलाचार्योपाध्यायस्थविरेषु च ।
गण-सङ्घ-क्रिया-धर्म-ज्ञान-ज्ञानि-गणिष्वपि ॥९५॥

२९/८ अनाशातनया भक्त्या, बहुमानेन वर्णनात् ।
द्विपञ्चाशद्विधः प्रोक्तो, द्वितीयश्चौपचारिकः ॥९६॥

२९/९ एकस्याशातनाऽप्यत्र, सर्वेषामेव तत्त्वतः ।
अन्योऽन्यमनुविद्धा हि, तेषु ज्ञानादयो गुणाः ॥९७॥

२९/१० नूनमल्पश्रुतस्यापि, गुरोराचारशालिनः ।
हीलना भस्मसात् कुर्याद्, गुणं वह्निरिवेन्धनम् ॥९८॥

२९/११ शक्त्यग्रज्वलनव्याल-सिंहक्रोधातिशायिनी ।
अनन्तदुःखजननी, कीर्तिता गुरुहीलना ॥९९॥

२९/१२ पठेद् यस्यान्तिके धर्म-पदान्यस्यापि सन्ततम् ।
कायवाङ्मनसां शुद्ध्या, कुर्याद् विनयमुत्तमम् ॥१००॥

२९/१३ पर्यायेण विहीनोऽपि, शुद्धज्ञानगुणाधिकः ।
ज्ञानप्रदानसामर्थ्याद्, अतो रत्नाधिकः स्मृतः ॥१०१॥

२९/१७ विनयेन विना न स्याद्, जिनप्रवचनोन्नतिः ।
पयःसेकं विना किं वा, वर्धते भुवि पादपः ?॥१०२॥

२९/१८ विनयं ग्राह्यमाणो यो, मृदूपायेन कुप्यति ।
उत्तमां श्रियमायान्तीं, दण्डेनापनयत्यसौ ॥१०३॥

२९/१३ इत्थं च विनयो मुख्यः, सर्वानुगमशक्तितः ।
मिष्टान्नेष्विव सर्वेषु, निपतन्निक्षुजो रसः ॥१०४॥

२९/२९ श्रुतस्याप्यतिदोषाय, ग्रहणं विनयं विना ।
यथा महानिधानस्य, विना साधनसन्निधिम् ॥१०५॥

२९/३० विनयस्य प्रधानत्व-द्योतनायैव पर्षदि ।
तीर्थं तीर्थपतिर्नत्वा, कृतार्थोऽपि कथां जगौ ॥१०६॥

२९/३१ छिद्यते विनयो यैस्तु, शुद्धौञ्छादिपरैरपि ।
तैरप्यग्रेसरीभूय, मोक्षमार्गो विलुप्यते ॥१०७॥

३२/३२ यत्र स्याद्वादविद्या परमततिमिरध्वान्तसूर्यांशुधारा,
निस्तारात् जन्मसिन्धोः शिवपदपदवीं प्राणिनो यान्ति यस्मात् ।
अस्माकं किञ्च यस्माद् भवति शमरसैर्नित्यमाकण्ठतृप्तिः,
जैनेन्द्रं शासनं तद् विलसति परमानन्दकन्दाम्बुवाहः ॥१०८॥

## વીતરાગસ્તોત્ર સૂક્ત - રત્ન - મંજૂષા

## कलिकालसर्वज्ञहेमचन्द्रसूरिकृतं वीतरागस्तोत्रं

१/१ यः परात्मा परं ज्योतिः, परमः परमेष्ठिनाम् ।
आदित्यवर्णं तमसः, परस्तादामनन्ति यम् ।।१।।

१/२ सर्वे येनोदमूल्यन्त, समूलाः क्लेशपादपाः ।
मूर्ध्ना यस्मै नमस्यन्ति, सुरासुरनरेश्वराः ।।२।।

१/३ प्रावर्त्तन्त यतो विद्याः, पुरुषार्थप्रसाधिकाः ।
यस्य ज्ञानं भवद्भावि-भूतभावावभासकृत् ।।३।।

१/४ यस्मिन् विज्ञानमानन्दं, ब्रह्म चैकात्मतां गतम् ।
स श्रद्धेयः स च ध्येयः, प्रपद्ये शरणं च तम् ।।४।।

१/५ तेन स्यां नाथवाँस्तस्मै, स्पृहयेयं समाहितः ।
ततः कृतार्थो भूयासं, भवेयं तस्य किङ्करः ।।५।।

१/६ तत्र स्तोत्रेण कुर्यां च, पवित्रां स्वां सरस्वतीम् ।
इदं हि भवकान्तारे, जन्मिनां जन्मनः फलम् ।।६।।

१/७ क्वाहं पशोरपि पशुः ?, वीतरागस्तवः क्व च ? ।
उत्तितीर्षुररण्यानीं, पद्भ्यां पङ्गुरिवास्म्यतः ।।७।।

१/८ तथाऽपि श्रद्धामुग्धोऽहं, नोपालभ्यः स्खलन्नपि ।
विशृङ्खलाऽपि वाग्वृत्तिः, श्रद्दधानस्य शोभते ।।८।।

१/९ श्रीहेमचन्द्रप्रभवाद्, वीतरागस्तवादितः ।
कुमारपालभूपालः, प्राप्नोतु फलमीप्सितम् ।।९।।

२/१ प्रियङ्गु-स्फटिक-स्वर्ण-पद्मरागाञ्जनप्रभः ।
प्रभो ! तवाधौतशुचिः, कायः कमिव नाक्षिपेत् ? ।।१०।।

२/२ मन्दारदामवन्नित्यम्, अवासितसुगन्धिनि ।
तवाङ्गे भृङ्गतां यान्ति, नेत्राणि सुरयोषिताम् ।।११।।

२/३ दिव्यामृतरसास्वाद-पोषप्रतिहता इव ।
समाविशन्ति ते नाथ !, नाङ्गे रोगोरगव्रजाः ।।१२।।

२/४ त्वय्यादर्शतलालीन-प्रतिमाप्रतिरूपके ।
क्षरत्स्वेदविलीनत्व-कथाऽपि वपुषः कुतः? ।।१३।।

२/५ न केवलं रागमुक्तं, वीतराग ! मनस्तव ।
वपुःस्थितं रक्तमपि, क्षीरधारासहोदरम् ।।१४।।

२/६ जगद्विलक्षणं किं वा, तवान्यद्वक्तुमीश्महे ? ।
यदविस्रमबीभत्सं, शुभ्रं मांसमपि प्रभो ! ।।१५।।

२/७ जलस्थलसमुद्भूताः, सन्त्यज्य सुमनःस्रजः ।
तव निःश्वाससौरभ्यम्, अनुयान्ति मधुव्रताः ।।१६।।

२/८ लोकोत्तरचमत्कार-करी तव भवस्थितिः ।
यतो नाहारनीहारौ, गोचरश्चर्मचक्षुषाम् ।।१७।।

३/१ सर्वाभिमुख्यतो नाथ !, तीर्थकृन्नामकर्मजात् ।
सर्वथा सम्मुखीनस्त्वम्, आनन्दयसि यत्प्रजाः ।।१८।।

३/२ यद् योजनप्रमाणेऽपि, धर्मदेशनसद्मनि ।
सम्मान्ति कोटिशस्तिर्यग्-नृदेवाः सपरिच्छदाः ।।१९।।

३/३ तेषामेव स्वस्वभाषा-परिणाममनोहरम् ।
अप्येकरूपं वचनं, यत् ते धर्मावबोधकृत् ।।२०।।

३/४ साग्रेऽपि योजनशते, पूर्वोत्पन्ना गदाम्बुदाः ।
यदञ्जसा विलीयन्ते, त्वद्विहारानिलोर्मिभिः ।।२१।।

३/५ नाविर्भवन्ति यद् भूमौ, मूषकाः शलभाः शुकाः ।
क्षणेन क्षितिपक्षिप्ता, अनीतय इवेतयः ।।२२।।

३/६ स्त्रीक्षेत्रपद्रादिभवो, यद् वैराग्निः प्रशाम्यति ।
त्वत्कृपापुष्करावर्त्त-वर्षादिव भुवस्तले ।।२३।।

३/७ त्वत्प्रभावे भुवि भ्राम्यत्यशिवोच्छेदडिण्डिमे ।
सम्भवन्ति न यन्नाथ !, मारयो भुवनारयः ।।२४।।

३/८ कामवर्षिणि लोकानां, त्वयि विश्वैकवत्सले ।
अतिवृष्टिरवृष्टिर्वा, भवेद् यन्नोपतापकृत् ।।२५।।

३/९ स्वराष्ट्रपरराष्ट्रेभ्यो, यत् क्षुद्रोपद्रवा द्रुतम् ।
विद्रवन्ति त्वत्प्रभावात्, सिंहनादादिव द्विपाः ।।२६।।

३/१० यत् क्षीयते च दुर्भिक्षं, क्षितौ विहरति त्वयि ।
सर्वाद्भुतप्रभावाढ्ये, जङ्गमे कल्पपादपे ।।२७।।

३/११ यन्मूर्ध्नः पश्चिमे भागे, जितमार्त्तण्डमण्डलम ।
मा भूद् वपुर्दुरालोकं, इतीवोत्पिण्डितं महः ।।२८।।

३/१५ मैत्रीपवित्रपात्राय, मुदितामोदशालिने ।
कृपोपेक्षाप्रतीक्षाय, तुभ्यं योगात्मने नमः ।।२९।।

४/१ मिथ्यादृशां युगान्तार्कः, सुदृशाममृताञ्जनम् ।
तिलकं तीर्थकृल्लक्ष्म्याः, पुरश्चक्रं तवैधते ।।३०।।

४/२ एकोऽयमेव जगति, स्वामीत्याख्यातुमुच्छ्रिता ।
उच्चैरिन्द्रध्वजव्याजात्, तर्जनी जम्भविद्विषा ।।३१।।

४/३ यत्र पादौ पदं धत्तः, तव तत्र सुरासुराः ।
किरन्ति पङ्कजव्याजात्, श्रियं पङ्कजवासिनीम् ।।३२।।

४/४ दानशीलतपोभाव-भेदाद् धर्म्मं चतुर्विधम् ।
मन्ये युगपदाख्यातुं, चतुर्वक्त्रोऽभवद् भवान् ।।३३।।

४/५ त्वयि दोषत्रयात् त्रातुं, प्रवृत्ते भुवनत्रयीम् ।
प्राकारत्रितयं चक्रुः, त्रयोऽपि त्रिदिवौकसः ।।३४।।

४/६ अधोमुखाः कण्टकाः स्युः, धात्र्यां विहरतस्तव ।
भवेयुः संमुखीनाः किं, तामसास्तिग्मरोचिषः ? ।।३५।।

४/७ केशरोमनखश्मश्रु, तवावस्थितमित्ययम् ।
बाह्योऽपि योगमहिमा, नाप्तस्तीर्थकरैः परैः ।।३६।।

४/८ शब्दरूपरसस्पर्श-गन्धाख्याः पञ्च गोचराः ।
भजन्ति प्रातिकूल्यं न, त्वदग्रे तार्किका इव ।।३७।।

४/९ त्वत्पादावृतवः सर्वे, युगपत् पर्युपासते ।
आकालकृतकन्दर्प्पसाहाय्यकभयादिव ।।३८।।

४/१० सुगन्ध्युदकवर्षेण, दिव्यपुष्पोत्करेण च ।
भावित्वत्पादसंस्पर्शा, पूजयन्ति भुवं सुरा ।।३९।।

४/११ जगत्प्रतीक्ष्य ! त्वां यान्ति, पक्षिणोऽपि प्रदक्षिणम् ।
का गतिर्महतां तेषां, त्वयि ये वामवृत्तयः ? ।।४०।।

४/१२ पञ्चेन्द्रियाणां दौःशील्यं, क्व भवेद् भवदन्तिके ? ।
एकेन्द्रियोऽपि यन्मुञ्चत्यनिलः प्रतिकूलताम् ।।४१।।

४/१३ मूर्ध्ना नमन्ति तरवः, त्वन्माहात्म्यचमत्कृताः ।
तत्कृतार्थं शिरस्तेषां, व्यर्थं मिथ्यादृशां पुनः ।।४२।।

४/१४ जघन्यतः कोटिसङ्ख्याः, त्वां सेवन्ते सुरासुराः ।
भाग्यसम्भारलभ्येऽर्थे, न मन्दा अप्युदासते ।।४३।।

५/१ गायन्निवालिविरुतैः, नृत्यन्निव चलैर्दलैः ।
त्वद्गुणैरिव रक्तोऽसौ, मोदतेऽशोकपादपः ।।४४।।

५/२ आयोजनं सुमनसो-ऽधस्तान्निक्षिप्तबन्धनाः ।
जानुदघ्नीः सुमनसो, देशनोर्व्यां किरन्ति ते ।।४५।।

५/३ मालवकैशिकीमुख्य-ग्रामरागपवित्रितः ।
तव दिव्यो ध्वनिः पीतो, हर्षोद्ग्रीवैर्मृगैरपि ।।४६।।

५/४ तवेन्दुधामधवला, चकास्ति चमरावली ।
हंसालिरिव वक्त्राब्ज-परिचर्यापरायणा ।।४७।।

५/५ मृगेन्द्रासनमारूढे, त्वयि तन्वति देशनाम् ।
श्रोतुं मृगाः समायान्ति, मृगेन्द्रमिव सेवितुम् ।।४८।।

५/६ भासां चयैः परिवृतो, ज्योत्स्नाभिरिव चन्द्रमाः ।
चकोराणामिव दृशां, ददासि परमां मुदम् ।।४९।।

५/७ दुन्दुभिर्विश्वविश्वेश !, पुरो व्योम्नि प्रतिध्वनन् ।
जगत्याप्तेषु ते प्राज्यं, साम्राज्यमिव शंसति ।।५०।।

५/८ तवोर्ध्वमूर्ध्वं पुण्यर्द्धि-क्रमसब्रह्मचारिणी ।
छत्रत्रयी त्रिभुवन-प्रभुत्वप्रौढिशंसिनी ।।५१।।

६/५ त्वां प्रपद्यामहे नाथ !, त्वां स्तुमस्त्वामुपास्महे ।
त्वत्तो हि न परस्त्राता, किं ब्रूमः ? किमु कुर्महे ? ।।५२।।

६/१० कामरागस्नेहरागावीषत्करनिवारणौ ।
दृष्टिरागस्तु पापीयान्, दुरुच्छेदः सतामपि ।।५३।।

९/१ यत्राल्पेनापि कालेन, त्वद्भक्तेः फलमाप्यते ।
कलिकालः स एकोऽस्तु, कृतं कृतयुगादिभिः ।।५४।।

९/२ सुषमातो दुःषमायां, कृपा फलवती तव ।
मेरुतो मरुभूमौ हि, श्लाघ्या कल्पतरोः स्थितिः ।।५५।।

९/३ श्राद्धः श्रोता सुधीर्वक्ता, युज्येयातां यदीश ! तत् ।
त्वच्छासनस्य साम्राज्यं, एकच्छत्रं कलावपि ।।५६।।

९/६ निशि दीपोऽम्बुधौ द्वीपं, मरौ शाखी हिमे शिखी ।
कलौ दुरापः प्राप्तोऽयं, त्वत्पादाब्जरजःकणः ।।५७।।

९/७ युगान्तरेषु भ्रान्तोऽस्मि, त्वद्दर्शनविनाकृतः ।
नमोऽस्तु कलये यत्र, त्वद्दर्शनमजायत ।।५८।।

१०/२ निरीक्षितुं रूपलक्ष्मीं, सहस्राक्षोऽपि न क्षमः ।
स्वामिन् ! सहस्रजिह्वोऽपि, शक्तो वक्तुं न ते गुणान् ।।५९।।

१०/३ संशयान् नाथ ! हरसेऽनुत्तरस्वर्गिणामपि ।
अतः परोऽपि किं कोऽपि, गुणः स्तुत्योऽस्ति वस्तुतः ? ।।६०।।

१०/६ द्वयं विरुद्धं भगवन् !, तव नान्यस्य कस्यचित् ।
निर्ग्रन्थता परा या च, या चोच्चैश्चक्रवर्त्तिता ।।६१।।

१०/७ नारका अपि मोदन्ते, यस्य कल्याणपर्वसु ।
पवित्रं तस्य चारित्रं, को वा वर्णयितुं क्षमः ? ।।६२।।

१०/८ शमोऽद्भुतोऽद्भुतं रूपं, सर्वात्मसु कृपाऽद्भुता ।
सर्वाद्भुतनिधीशाय, तुभ्यं भगवते नमः ।।६३।।

११/१ निघ्नन् परीषहचमूं, उपसर्गान् प्रतिक्षिपन् ।
प्राप्तोऽसि शमसौहित्यं, महतां काऽपि वैदुषी ।।६४।।

११/६ रागादिषु नृशंसेन, सर्वात्मसु कृपालुना ।
भीमकान्तगुणेनोच्चैः, साम्राज्यं साधितं त्वया ।।६५।।

११/८ महीयसामपि महान्, महनीयो महात्मनाम् ।
अहो ! मे स्तुवतः स्वामी, स्तुतेर्गोचरमागमत् ।।६६।।

१२/२ दुःखहेतुषु वैराग्यं, न तथा नाथ ! निस्तुषम् ।
मोक्षोपायप्रवीणस्य, यथा ते सुखहेतुषु ।।६७।।

१२/४ यदा मरुन्नरेन्द्रश्रीः, त्वया नाथोपभुज्यते ।
यत्र तत्र रतिर्नाम, विरक्तत्वं तदाऽपि ते ।।६८।।

१२/६ सुखे दुःखे भवे मोक्षे, यदौदासीन्यमीशिषे ।
तदा वैराग्यमेवेति, कुत्र नासि विरागवान् ? ।।६९।।

१२/७ दुःखगर्भे मोहगर्भे, वैराग्ये निष्ठिताः परे ।
ज्ञानगर्भं तु वैराग्यं, त्वय्येकायनतां गतम् ।।७०।।

१२/८ औदासीन्येऽपि सततं, विश्वविश्वोपकारिणे ।
नमो वैराग्यनिघ्नाय, तायिने परमात्मने ।।७१।।

१३/१ अनाहूतसहायस्त्वं, त्वमकारणवत्सलः ।
अनभ्यर्थितसाधुस्त्वं, त्वमसम्बन्धबान्धवः ।।७२।।

१४/५ तथा परे न रज्यन्त, उपकारपरे परे ।
यथाऽपकारिणि भवान्, अहो ! सर्वमलौकिकम् ।।७३।।

१५/३ च्युतश्चिन्तामणिः पाणेः, तेषां लब्धा सुधा मुधा ।
यैस्त्वच्छासनसर्वस्वं, अज्ञानैर्नात्मसात्कृतम् ।।७४।।

१५/५ त्वच्छासनस्य साम्यं ये, मन्यन्ते शासनान्तरैः ।
विषेण तुल्यं पीयूषं, तेषां हन्त ! हतात्मनाम् ।।७५।।

१५/६ अनेडमूका भूयासुः, ते येषां त्वयि मत्सरः ।
शुभोदर्काय वैकल्यम्, अपि पापेषु कर्मसु ।।७६।।

१५/९ जन्मवानस्मि धन्योऽस्मि, कृतकृत्योऽस्मि यन्मुहुः ।
जातोऽस्मि त्वद्गुणग्राम-रामणीयकलम्पटः ।।७७।।

१६/१ त्वन्मतामृतपानोत्था, इतः शमरसोर्मयः ।
पराणयन्ति मां नाथ !, परमानन्दसम्पदम् ।।७८।।

१६/२ इतश्चानादिसंस्कार-मूर्च्छितो मूर्च्छयत्यलम् ।
रागोरगविषावेगो, हताशः करवाणि किम् ? ।।७९।।

१६/३ रागाहिगरलाघ्रातो-ऽकार्षं यत्कर्म वैशसम् ।
तद्वक्तुमप्यशक्तोऽस्मि, धिङ्मे प्रच्छन्नपापताम् ! ।।८०।।

१६/४ क्षणं सक्तः क्षणं मुक्तः, क्षणं क्रुद्धः क्षणं क्षमी ।
मोहाद्यैः क्रीडयैवाहं, कारितः कपिचापलम् ।।८१।।

१६/५ प्राप्यापि तव सम्बोधिं, मनोवाक्कायकर्मजैः ।
दुश्चेष्टितैर्मया नाथ !, शिरसि ज्वालितोऽनलः ।।८२।।

१६/५ त्वय्यपि त्रातरि त्रातर् !, यन्मोहादिमलिम्लुचैः ।
रत्नत्रयं मे ह्रियते, हताशो हा ! हतोऽस्मि तत् ।।८३।।

१६/७ भ्रान्तस्तीर्थानि दृष्टस्त्वं, मयैकस्तेषु तारकः ।
तत्तवाङ्घ्रौ विलग्नोऽस्मि, नाथ ! तारय तारय ।।८४।।

१६/८ भवत्प्रसादेनैवाहं, इयतीं प्रापितो भुवम् ।
औदासीन्येन नेदानीं, तव युक्तमुपेक्षितुम् ।।८५।।

१६/९ ज्ञाता तात ! त्वमेवैकः, त्वत्तो नान्यः कृपापरः ।
नान्यो मत्तः कृपापात्रम्, एधि यत्कृत्यकर्मठ ! ।।८६।।

१७/१ स्वकृतं दुष्कृतं गर्हन्, सुकृतं चानुमोदयन् ।
नाथ ! त्वच्चरणौ यामि, शरणं शरणोज्झितः ।।८७।।

१७/२ मनोवाक्कायजे पापे, कृतानुमतिकारितैः ।
मिथ्या मे दुष्कृतं भूयाद्, अपुनःक्रिययाऽन्वितम् ।।८८।।

१७/३ यत्कृतं सुकृतं किञ्चिद्, रत्नत्रितयगोचरम् ।
तत्सर्वमनुमन्येऽहं, मार्गमात्रानुसार्यपि ।।८९।।

१७/४ सर्वेषामर्हदादीनां, यो योऽर्हत्त्वादिको गुणः ।
अनुमोदयामि तं तं, सर्वं तेषां महात्मनाम् ।।९०।।

१७/५ त्वां त्वत्फलभूतान् सिद्धान्, त्वच्छासनरतान् मुनीन् ।
त्वच्छासनं च शरणं, प्रतिपन्नोऽस्मि भावतः ।।९१।।

१७/६ क्षमयामि सर्वान् सत्त्वान्, सर्वे क्षाम्यन्तु ते मयि ।
मैत्र्यस्तु तेषु सर्वेषु, त्वदेकशरणस्य मे ।।९२।।

१७/७ एकोऽहं नास्ति मे कश्चिद्, न चाहमपि कस्यचित् ।
त्वदङ्घ्रिशरणस्थस्य, मम दैन्यं न किञ्चन ।।९३।।

१७/८ यावन्नाप्नोमि पदवीं, परां त्वदनुभावजाम् ।
तावन्मयि शरण्यत्वं, मा मुञ्च शरणं श्रिते ।।९४।।

१९/१ तव चेतसि वर्तेऽहं, इति वार्त्ताऽपि दुर्लभा ।
मच्चित्ते वर्त्तसे चेत् त्वम्, अलमन्येन केनचित् ।।९५।।

१९/४ वीतराग ! सपर्यायाः, तवाज्ञापालनं वरम् ।
आज्ञाऽऽराद्धा विराद्धा च, शिवाय च भवाय च ।।९६।।

१९/५ आकालमियमाज्ञा ते, हेयोपादेयगोचरा ।
आश्रवः सर्वथा हेयः, उपादेयश्च संवरः ।।९७।।

१९/६ आश्रवो भवहेतुः स्यात्, संवरो मोक्षकारणम् ।
इतीयमार्हती मुष्टिः, अन्यदस्याः प्रपञ्चनम् ।।९८।।

१९/७ इत्याज्ञाराधनपरा, अनन्ताः परिनिर्वृताः ।
निर्वान्ति चान्ये क्वचन, निर्वास्यन्ति तथाऽपरे ।।९९।।

१९/८ हित्वा प्रसादनादैन्यं, एकयैव त्वदाज्ञया ।
सर्वथैव विमुच्यन्ते, जन्मिनः कर्मपञ्जरात् ।।१००।।

२०/१ पादपीठलुठन्मूर्ध्नि, मयि पादरजस्तव ।
चिरं निवसतां पुण्य-परमाणुकणोपमम् ।।१०१।।

२०/२ मद्दृशौ त्वन्मुखासक्ते, हर्षबाष्पजलोर्मिभिः ।
अप्रेक्ष्यप्रेक्षणोद्भूतं, क्षणात् क्षालयतां मलम् ।।१०२।।

२०/३ त्वत्पुरो लुठनैर्भूयाद्, मद्भालस्य तपस्विनः ।
कृतासेव्यप्रणामस्य, प्रायश्चित्तं किणावलिः ।।१०३।।

२०/४ मम त्वद्दर्शनोद्भूताः, चिरं रोमाञ्चकण्टकाः ।
तुदन्तां चिरकालोत्थां, असद्दर्शनवासनाम् ।।१०४।।

२०/५ त्वद्वक्त्रकान्तिज्योत्स्नासु, निपीतासु सुधास्विव ।
मदीयैर्लोचनाम्भोजैः, प्राप्यतां निर्निमेषता ।।१०५।।

२०/६ त्वदास्यलासिनी नेत्रे, त्वदुपास्तिकरौ करौ ।
त्वद्गुणश्रोतृणी श्रोत्रे, भूयास्तां सर्वदा मम ।।१०६।।

२०/७ कुण्ठाऽपि यदि सोत्कण्ठा, त्वद्गुणग्रहणं प्रति ।
ममैषा भारती तर्हि, स्वस्त्येतस्यै किमन्यया ? ।।१०७।।

२०/८ तव प्रेष्योऽस्मि दासोऽस्मि, सेवकोऽस्म्यस्मि किङ्करः ।
ओमिति प्रतिपद्यस्व, नाथ ! नातः परं ब्रुवे ।।१०८।।

# સ્તુતિસંગ્રહ સૂક્ત - રત્ન - મંજૂષા

## ~~~ पूर्वाचार्यविरचितम् जिननामसहस्रस्तोत्रम् ~~~

१ नमस्ते समस्तेप्सितार्थप्रदाय, नमस्ते महाऽऽर्हन्त्यलक्ष्मीप्रदाय ।
नमस्ते चिदानन्दतेजोमयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१॥

६ नमस्ते महस्विन् ! नमस्ते यशस्विन् !,
नमस्ते वचस्विन् ! नमस्ते तपस्विन् ! ।
नमस्ते गुणैरद्भुतैरद्भुताय,
नमस्ते नमस्ते नमस्ते नमस्ते ॥२॥

११ नमस्ते सुधासारनेत्राञ्जनाय, नमस्ते सदाऽस्मन्मनोरञ्जनाय ।
नमस्ते भवभ्रान्तिभीभञ्जनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥३॥

१५ नमस्तेऽवतीर्णाय विश्वोपकृत्यै, नमस्ते कृतार्थाय सद्धर्मकृत्यैः ।
नमस्ते प्रकृत्या जगद्वत्सलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४॥

१७ नमोऽनुत्तरस्वर्गिभिः पूजिताय, नमस्तन्मनःसंशयछेदकाय ।
नमोऽनुत्तरज्ञानलक्ष्मीश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥५॥

२७ नमस्तेऽद्भुतकम्पितेन्द्रासनाय, नमस्ते मुदा तैः कृतोपासनाय ।
नमः कल्पितध्वान्तनिर्वासनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥६॥

२८ नमस्ते सुराद्रौ सुरैः प्रापिताय, नमस्ते कृतस्नात्रपूजोत्सवाय ।
नमस्ते विनीताप्सरःपूजिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥७॥

२९ नमोऽङ्गुष्ठपीयूषपानोच्छ्रिताय, नमस्ते वपुःसर्वनष्टामयाय ।
नमस्ते यथायुक्तसर्वाङ्गकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥८॥

३० नमस्ते मलस्वेदखेदोज्झिताय, नमस्ते शुचिक्षीररुक्शोणिताय ।
नमस्ते मुखश्वासह्रीणाम्बुजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥९॥

३१ नमस्ते मणिस्वर्णजिद्गौरभाय, नमस्ते प्रसर्पद्वपुःसौरभाय ।
नमोऽनीक्षिताहारनीहारकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१०॥

५० नमो दत्तसांवत्सरोत्सर्जनाय, नमो विश्वदारिद्र्यनिस्तर्जनाय ।
नमस्ते कृतार्थीकृतार्थिव्रजाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥११॥

५६ नमस्ते मनःकामकल्पद्रुमाय, नमस्ते प्रभो ! कामधेनूपमाय ।
नमस्ते निरस्तार्थिनामाश्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१२॥

५७ नमस्त्यक्तसप्ताङ्गराज्येन्दिराय, नमस्त्यक्तसत्सुन्दरीमन्दिराय ।
नमस्त्यक्तमाणिक्यमुक्ताफलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१३॥

६६ नमस्ते मनःपर्यवज्ञानशालिन् !, नमश्चारुचारित्रपावित्र्यमालिन् ! ।
नमो नाथ ! षड्जीवकायावकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१४॥

६७ नमस्ते समुद्यद्विहारक्रमाय, नमः कर्मवैरिस्फुरद्विक्रमाय ।
नमः स्वीयदेहेऽपि ते निर्ममाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१५॥

७० नमस्तुल्यचित्ताय मित्रे रिपौ वा, नमस्तुल्यचित्ताय लोष्टे मणौ वा ।
नमस्तुल्यचित्ताय गालौ स्तुतौ वा, नमस्ते नमस्ते नमस्ते नमस्ते ॥१६॥

७१ नमस्तुल्यचित्ताय मोक्षे भवे वा, नमस्तुल्यचित्ताय जीर्णे नवे वा ।
नमस्तुल्यचित्ताय मेध्येऽशुचौ वा, नमस्ते नमस्ते नमस्ते नमस्ते ॥१७॥

७२ नमस्ते प्रभो ! मृत्युतो निर्भयाय, नमस्ते प्रभो ! जीविते निःस्पृहाय ।
नमस्ते प्रभो ! ते स्वरूपे स्थिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१८॥

८७ नमस्ते चतुर्दिग्विराजन्मुखाय, नमस्तेऽभितः संसदां सत्सुखाय ।
नमो योजनच्छायचैत्यद्रुमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥१९॥

८८ नमो योजनासीनतावज्जनाय, नमश्चैकवाग्बुद्धनानाजनाय ।
नमो भानुजैत्रप्रभामण्डलाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२०॥

८९ नमो दूरनष्टेतिवैरज्वराय, नमो नष्टदुर्वृष्टिरुग्विड्वराय ।
नमो नष्टसर्वप्रजोपद्रवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२१॥

९० नमो धर्मचक्रत्रसत्तामसाय, नमः केतुहृष्यत्सुदृग्मानसाय ।
नमो व्योमसञ्चारिसिंहासनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२२॥

९१ नमश्चामरैरष्टभिर्विजिताय, नमः स्वर्णपद्माहिताङ्घ्रिद्वयाय ।
( नमो नाथ ! छत्रत्रयेणान्विताय, ) नमस्ते नमस्ते नमस्ते नमस्ते ॥२३॥

९२ नमोऽधोमुखाग्रीभवत्कण्टकाय, नमो ध्वस्तकर्मारिनिष्कण्टकाय ।
नमस्तेऽभितो नम्रमार्गद्रुमाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२४॥

९३ नमस्तेऽनुकूलीभवन्मारुताय, नमस्ते सुखकृद्विहायोरुताय ।
नमस्तेऽम्बुसिक्ताभितो योजनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२५॥

९४ नमो योजनाजानुपुष्पोच्चयाय, नमोऽवस्थितश्मश्रूकेशादिकाय ।
नमस्ते सुपञ्चेन्द्रियार्थोदयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२६॥

९५ नमो नाकिकोट्याऽविविक्तान्तिकाय,
नमो दुन्दुभिप्रष्टभूमित्रिकाय ।
नमोऽभ्रलिहाग्रोदितेन्द्रध्वजाय,
नमस्ते नमस्ते नमस्ते नमस्ते ॥२७॥

९६ नमः प्रातिहार्याष्टकालङ्कृताय, नमो योजनव्याप्तवाक्यामृताय ।
नमस्ते विनाऽलङ्कृतिं सुन्दराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२८॥

९७ नमः क्लृप्ततीर्थस्थितिस्थापनाय, नमः सच्चतुःसङ्घसत्यापनाय ।
नमस्ते चतुर्भेदधर्मार्पकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥२९॥

१०४ नमो बुद्धतत्त्वाय तद्बोधकाय, नमः कर्ममुक्ताय तन्मोचकाय ।
नमस्तीर्णजन्माब्धये तारकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥३०॥

१०५ नमो लोकनाथाय लोकोत्तमाय, नमस्ते त्रिलोकप्रदीपोपमाय ।
नमो निर्निदानं जनेभ्यो हिताय, नमस्ते नमस्ते नमस्ते नमस्ते ॥३१॥

११८ नमस्ते प्रभो ! श्रीयुगादीश्वराय, नमस्तेऽजिताय प्रभो ! सम्भवाय ।
नमो नाथ ! सैद्धार्थतीर्थेश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥३२॥

११९ नमो माङ्गलीयस्फुरन्मङ्गलाय, नमस्ते महासद्मपद्मप्रभाय ।
नमस्ते सुपार्श्वाय चन्द्रप्रभाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥३३॥

१२० नमः पुष्पदन्ताय ते शीतलाय, नमः श्रीजितेन्द्राय ते वैष्णवाय ।
नमो वासुपूज्याय पूज्याय सद्भिः, नमस्ते नमस्ते नमस्ते नमस्ते ॥३४॥

१२१ नमः श्यामया सुप्रसूताय नेतः !, नमोऽनन्तनाथाय धर्मेश्वराय ।
नमः शान्तये कुन्थुनाथाय तुभ्यं, नमस्ते नमस्ते नमस्ते नमस्ते ॥३५॥

१२२ नमस्तेऽप्यराख्येश ! नम्रामराय, नमो मल्लिदेवाय ते सुव्रताय ।
नमस्ते नमिस्वामिने नेमयेऽर्हन्, नमस्ते नमस्ते नमस्ते नमस्ते ॥३६॥

१२३ नमस्ते प्रभो ! पार्श्वविश्वेश्वराय, नमस्ते विभो ! वर्धमानाभिधाय ।
नमोऽचिन्त्यमाहात्म्यचिद्वैभवाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥३७॥

१२५ नमोऽनागतोऽत्सर्प्पिणीकालभोगे, चतुर्विंशतावेष्यदार्हन्त्यशक्त्यै ।
नमः स्वामिने पद्मनाभादिनाम्ने, नमस्ते नमस्ते नमस्ते नमस्ते ॥३८॥

१२६ दशस्वप्यथैवं नमः कर्मभूषु, चतुर्विंशतौ ते नमोऽनन्तमूर्त्यै ।
नमोऽध्यक्षमूर्त्यै विदेहावनीषु, नमस्ते नमस्ते नमस्ते नमस्ते ॥३९॥

१२७ नमः प्रभो ! स्वामीसीमन्धराय, नमस्तेऽधुनाऽऽर्हन्त्यलक्ष्मीवराय ।
नमः प्राग्विदेहावनीमण्डनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४०॥

१३२ नमस्तीर्थराजाय तेऽष्टापदाय, नमः स्वर्णरत्नार्हदर्चास्पदाय ।
नमस्ते नतश्राद्धविद्याधराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४१॥

१३३ नमस्तीर्थसम्मेतशैलाह्वयाय, नमो विंशतिप्राप्तनिःश्रेयसाय ।
नमः श्रव्यदिव्यप्रभावाश्रयाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४२॥

१३४ नमश्चोज्जयन्ताद्रितीर्थोत्तमाय, नमो जातनेमित्रिकल्याणकाय ।
नमः शोभितोद्धारसौराष्ट्रकाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४३॥

१३६ नमस्ते प्रभो ! पार्श्वशङ्खेश्वराय, नमस्ते यशोगौरगोडीधराय ।
नमस्ते वरक्काणतीर्थेश्वराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४४॥

१३७ नमस्तेऽन्तरिक्षाय वामाऽङ्गजाय, नमः सुरतस्थाय ते दिग्गजाय ।
नमो नाथ ! जीराउलीमण्डनाय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४५॥

१३९ नमो वर्द्धमानप्रभोः शासनाय, नमश्चतुर्वर्णसङ्घाय नित्यम् ।
नमो मन्त्रराजाय ते ध्येयपञ्च !, नमस्ते नमस्ते नमस्ते नमस्ते ॥४६॥

१४० नमो जैनसिद्धान्तदुग्धार्णवाय, नमोऽनेकतत्त्वार्थरत्नाश्रयाय ।
नमो हृद्यविद्येन्दिरासुन्दराय, नमस्ते नमस्ते नमस्ते नमस्ते ॥४७॥

~~ रत्नाकरसूरिविरचिता रत्नाकरपञ्चविंशतिका ~~

१ श्रेयःश्रियां मङ्गलकेलिसद्म !, नरेन्द्रदेवेन्द्रनताङ्घ्रिपद्म ! ।
सर्वज्ञसर्वातिशयप्रधान !, चिरं जय ज्ञानकलानिधान ! ॥४८॥

२ जगत्त्रयाधार ! कृपावतार !,
दुर्वारसंसारविकारवैद्य ! ।
श्रीवीतराग ! त्वयि मुग्धभावाद्,
विज्ञप्रभो ! विज्ञपयामि किञ्चित् ॥४९॥

३ किं बाललीलाकलितो न बालः, पित्रोः पुरो जल्पति निर्विकल्पः ?
तथा यथाऽर्थं कथयामि नाथ !, निजाशयं सानुशयस्तवाग्रे ॥५०॥

४ दत्तं न दानं परिशीलितं च,
न शालि शीलं न तपोऽभितप्तम् ।
शुभो न भावोऽप्यभवद् भवेऽस्मिन्,
विभो ! मया भ्रान्तमहो ! मुधैव ॥५१॥

५ दग्धोऽग्निना क्रोधमयेन दष्टो,
दुष्टेन लोभाख्यमहोरगेण ।
ग्रस्तोऽभिमानाजगरेण माया-
जालेन बद्धोऽस्मि कथं भजे त्वाम् ? ॥५२॥

६ कृतं मयाऽमुत्र हितं न चेहलोकेऽपि लोकेश ! सुखं न मेऽभूत् ।
अस्मादृशां केवलमेव जन्म, जिनेश ! जज्ञे भवपूरणाय ॥५३॥

७ मन्ये मनो यन्न मनोज्ञवृत्तं, त्वदास्यपीयूषमयूखलाभात् ।
द्रुतं महाऽऽनन्दरसं कठोरम्, अस्मादृशां देव तदश्मतोऽपि ॥५४॥

८ त्वत्तः सुदुष्प्राप्यमिदं मयाऽऽप्तं, रत्नत्रयं भूरिभवभ्रमेण ।
प्रमादनिद्रावशतो गतं तत्, कस्याग्रतो नायक ! पूत्करोमि ? ॥५५॥

९ वैराग्यरङ्गो परवञ्चनाय,
धर्मोपदेशो जनरञ्जनाय ।
वादाय विद्याऽध्ययनं च मेऽभूत्,
कियद् ब्रुवे हास्यकरं स्वमीश !? ॥५६॥

१० परापवादेन मुखं सदोषम्, नेत्रं परस्त्रीजनवीक्षणेन ।
चेतः परापायविचिन्तनेन, कृतं भविष्यामि कथं विभोऽहम् ? ॥५७॥

११ विडम्बितं यत्स्मरघस्मरार्तिदशावशात् स्वं विषयान्धलेन ।
प्रकाशितं तद्भवतो ह्रियैव, सर्वज्ञ ! सर्वं स्वयमेव वेत्सि ॥५८॥

१२ ध्वस्तोऽन्यमन्त्रैः परमेष्ठिमन्त्रः,
कुशास्त्रवाक्यैर्निहताऽऽगमोक्तिः ।
कर्तुं वृथा कर्म कुदेवसङ्गाद्,
अवाञ्छि ही नाथ ! मतिभ्रमो मे ॥५९॥

१३ विमुच्य दृग्लक्ष्यगतं भवन्तम्, ध्याता मया मूढधिया हृदन्तः ।
कटाक्षवक्षोजगभीरनाभि-कटीतटीयाः सुदृशां विलासाः ॥६०॥

१४ लोलेक्षणावक्त्रनिरीक्षणेन,
यो मानसे रागलवो विलग्नः ।
न शुद्धसिद्धान्तपयोधिमध्ये,
धौतोऽप्यगात् तारक ! कारणं किम् ? ॥६१॥

१५ अङ्गं न चङ्गं न गणो गुणानां, न निर्मलः कोऽपि कलाविलासः ।
स्फुरत्प्रभा न प्रभुता च काऽपि, तथाऽप्यहङ्कारकदर्थितोऽहम् ॥६२॥

१६ आयुर्गलत्याशु न पापबुद्धिः, गतं वयो नो विषयाभिलाषः ।
यत्नश्च भैषज्यविधौ न धर्मे, स्वामिन् ! महामोहविडम्बना मे ॥६३॥

१७ नात्मा न पुण्यं न भवो न पापं,
मया विटानां कटुगीरपीयम् ।
अधारि कर्णे त्वयि केवलार्के,
पुरः स्फुटे सत्यपि देव ! धिङ्माम् ॥६४॥

१८ न देवपूजा न च पात्रपूजा, न श्राद्धधर्मश्च न साधुधर्मः ।
लब्ध्वाऽपि मानुष्यमिदं समस्तं, कृतं मयाऽरण्यविलापतुल्यम् ॥६५॥

१९ चक्रे मयाऽसत्स्वपि कामधेनु-कल्पद्रुचिन्तामणिषु स्पृहार्त्तिः ।
न जैनधर्मे स्फुटशर्मदेऽपि, जिनेश ! मे पश्य विमूढभावम् ॥६६॥

२० सद्भोगलीला न च रोगकीला, धनागमो नो निधनागमश्च ।
दारा न कारा नरकस्य चित्ते, व्यचिन्ति नित्यं मयकाऽधमेन ॥६७॥

२१ स्थितं न साधोर्हृदि साधुवृत्तात्, परोपकारान्न यशोऽर्ज्जितं च ।
कृतं न तीर्थोद्धरणादिकृत्यं, मया मुधा हारितमेव जन्म ॥६८॥

२२ वैराग्यरङ्गो न गुरूदितेषु,
न दुर्जनानां वचनेषु शान्तिः ।
नाध्यात्मलेशो मम कोऽपि देव !,
तार्यः कथङ्कारमयं भवाब्धिः ? ॥६९॥

२३ पूर्वे भवेऽकारि मया न पुण्यम्, आगामिजन्मन्यपि नो करिष्ये ।
यदीदृशोऽहं मम तेन नष्टा, भूतोद्भवद्भाविभवत्रयीश ! ॥७०॥

२४ किं वा मुधाऽहं बहुधा सुधाभुक्-पूज्य ! त्वदग्रे चरितं स्वकीयम् ।
जल्पामि यस्मात् त्रिजगत्स्वरूप-निरूपकस्त्वं कियदेतदत्र ? ॥७१॥

२५ दीनोद्धारधुरन्धरस्त्वदपरो नास्ते मदन्यः कृपा-
पात्रं नात्र जने जिनेश्वर ! तथाऽप्येतां न याचे श्रियम् ।
किन्त्वर्हन्निदमेव केवलमहो ! सद्बोधिरत्नं शिवं,
श्रीरत्नाकर ! मङ्गलैकनिलय ! श्रेयस्करं प्रार्थये ॥७२॥

~~ कुमारपालभूपालविरचिता आत्मनिन्दाद्वात्रिंशिका ~~

४ तव स्तवेन क्षयमङ्गभाजां, भजन्ति जन्मार्जितपातकानि ।
कियच्चिरं चण्डरुचेर्मरीचि-स्तोमे तमांसि स्थितिमुद्वहन्ति ? ॥७३॥

५ शरण्य ! कारुण्यपरः परेषां, निहंसि मोहज्वरमाश्रितानाम् ।
मम त्वदाज्ञां वहतोऽपि मूर्ध्ना, शान्ति न यात्येष कुतोऽपि हेतोः ॥७४॥

६ भवाटवीलङ्घनसार्थवाहं, त्वामाश्रितो मुक्तिमहं यियासुः ।
कषायचौरैर्जिन ! लुण्ट्यमानं, रत्नत्रयं मे तदुपेक्षसे किम् ? ॥७५॥

७ लब्धोऽसि स त्वं मयका महात्मा,
भवाम्बुधौ बम्भ्रमता कथञ्चित् ।
आः ! पापपिण्डेन नतो न भक्त्या,
न पूजितो नाथ ! न तु स्तुतोऽसि ॥७६॥

८ संसारचक्रे भ्रमयन् कुबोध-दण्डेन मां कर्ममहाकुलालः ।
करोति दुःखप्रचयस्थभाण्डं, ततः प्रभो ! रक्ष जगच्छरण्य ! ॥७७॥

९ कदा त्वदाज्ञाकरणाप्ततत्त्वः,
त्यक्त्वा ममत्वादि भवैककन्दम् ।
आत्मैकसारो निरपेक्षवृत्तिः,
मोक्षेऽप्यनिच्छो भविताऽस्मि नाथ ! ? ॥७८॥

११ एतावतीं भूमिमहं त्वदङ्घ्रि-पद्मप्रसादाद् गतवान् अधीश !
हठेन पापास्तदपि स्मराद्या, ही ! मामकार्येषु नियोजयन्ति ॥७९॥

१२ भद्रं न किं त्वय्यपि नाथ ! नाथे, सम्भाव्यते मे यदपि स्मराद्याः ? ।
अपाक्रियन्ते शुभभावनाभिः, पृष्ठिं न मुञ्चन्ति तथाऽपि पापाः ॥८०॥

१३ भवाम्बुराशौ भ्रमतः कदाऽपि, मन्ये न मे लोचनगोचरोऽभूः ।
निस्सीमसीमन्तकनारकादिदुःखातिथित्वं कथमन्यथेश ! ? ॥८१॥

१४ चक्रासिचापाङ्कुशवज्रमुख्यैः, सल्लक्षणैर्लक्षितमङ्घ्रियुग्मम् ।
नाथ ! त्वदीयं शरणं गतोऽस्मि, दुर्वारमोहादिविपक्षभीतः ॥८२॥

१५ अगण्यकारुण्य ! शरण्य ! पुण्य !
सर्वज्ञ ! निष्कण्टक ! विश्वनाथ ! ।
दीनं हताशं शरणागतं च,
मां रक्ष रक्ष स्मरभिल्लमल्लैः ॥८३॥

१६ त्वया विना दुष्कृतचक्रवालं,
नान्यः क्षयं नेतुमलं ममेश ! ।
किं वा विपक्षप्रतिचक्रमूलं,
चक्रं विना छेत्तुमलम्भविष्णुः ? ॥८४॥

१७ यद्देवदेवोऽसि महेश्वरोऽसि, बुद्धोऽसि विश्वत्रयनायकोऽसि ।
तेनान्तरङ्गारिगणाभिभूतः, तवाग्रतो रोदिमि हा ! सखेदम् ॥८५॥

१८ स्वामिन्नधर्म्मव्यसनानि हित्वा, मनः समाधौ निदधामि यावत् ।
तावत् क्रुधेवान्तरवैरिणो माम्, अनल्पमोहान्ध्यवशं नयन्ति ॥८६॥

१९ त्वदागमाद्वेद्मि सदैव देव !, मोहादयो यन्मम वैरिणोऽमी ।
तथाऽपि मूढस्य परात्तबुद्ध्या, तत्सन्निधौ ही न किमप्यकृत्यम् ॥८७॥

२० म्लेच्छैर्नृशंसैरतिराक्षसैश्च, विडम्बितोऽमीभिरनेकशोऽहम् ।
प्राप्तस्त्विदानीं भुवनैकवीर !, त्रायस्व मां यत्तव पादलीनम् ॥८८॥

२१ हित्वा स्वदेहेऽपि ममत्वबुद्धिं, श्रद्धापवित्रीकृतसद्विवेकः ।
मुक्तान्यसङ्गः समशत्रुमित्रः, स्वामिन् ! कदा संयममातनिष्ये ? ॥८९॥

२२ त्वमेव देवो मम वीतराग !, धर्मो भवद्दर्शितधर्म एव ।
इति स्वरूपं परिभाव्य तस्माद्, नोपेक्षणीयो भवता स्वभृत्यः ॥९०॥

२३ जिता जिताशेषसुराऽसुराद्याः, कामादयः काममभी त्वयेश ! ।
त्वां प्रत्यशक्तास्तव सेवकं तु, निघ्नन्ति ही मां परुषं रुषेव ॥९१॥

२४ सामर्थ्यमेतद्भवतोऽस्ति सिद्धिं,
सत्त्वानशेषानपि नेतुमीश ! ।
क्रियाविहीनं भवदङ्घ्रिलीनं,
दीनं न किं रक्षसि मां शरण्य ! ? ॥९२॥

२५ त्वत्पादपद्मद्वितयं जिनेन्द्र !, स्फुरत्यजस्त्रं हृदि यस्य पुंसः ।
विश्वत्रयीश्रीरपि नूनमेति, तत्राश्रयार्थं सहचारिणीव ॥९३॥

२६ अहं प्रभो ! निर्गुणचक्रवर्ती, क्रूरो दुरात्मा हतकः सपाप्मा ।
ही दुःखराशौ भववारिराशौ, यस्मान्निमग्नोऽस्मि भवद्विमुक्तः ॥९४॥

२७ स्वामिन्निमग्नोऽस्मि सुधासमुद्रे, यन्नेत्रपात्रातिथिरद्य मेऽभूः ।
चिन्तामणौ स्फूर्जति पाणिपद्मे, पुंसामसाध्यो न हि कश्चिदर्थः ॥९५॥

२८ त्वमेव संसारमहाम्बुराशौ, निमज्जतो मे जिन ! यानपात्रम् ।
त्वमेव मे श्रेष्ठसुखैकधाम, विमुक्तिरामाघटनाऽभिरामः ॥९६॥

२९ चिन्तामणिस्तस्य जिनेश ! पाणौ,
कल्पद्रुमस्तस्य गृहाङ्गणस्थः ।
नमस्कृतो येन सदाऽपि भक्त्या,
स्तोत्रैः स्तुतो दामभिरर्चितोऽसि ॥९७॥

३२ भवजलनिधिमध्यान्नाथ ! निस्तार्य कार्यः,
शिवनगरकुटुम्बी निर्गुणोऽपि त्वयाऽहम् ।
न हि गुणमगुणं वा संश्रितानां महान्तो,
निरुपमकरुणार्द्राः सर्वथा चिन्तयन्ति ॥९८॥

३३ प्राप्तस्त्वं बहुभिः शुभैस्त्रिजगतश्चूडामणिर्देवता,
निर्वाणप्रतिभुरसावपि गुरुः श्रीहेमचन्द्रप्रभुः ।
तन्नातः परमस्ति वस्तु किमपि स्वामिन् ! यदभ्यर्थये,
किन्तु त्वद्वचनादरः प्रतिभवं स्ताद् वर्द्धमानो मम ॥९९॥

~~~ श्रीगौतमाष्टकम् ~~~

१ श्रीइन्द्रभूतिं वसुभूतिपुत्रं, पृथ्वीभवं गौतमगोत्ररत्नम् ।
स्तुवन्ति देवासुरमानवेन्द्राः, स गौतमो यच्छतु वाञ्छितं मे ॥१००॥

२ श्रीवर्धमानात् त्रिपदीमवाप्य, मुहूर्तमात्रेण कृतानि येन ।
अङ्गानि पूर्वाणि चतुर्दशापि, स गौतमो यच्छतु वाञ्छितं मे ॥१०१॥

३ श्रीवीरनाथेन पुरा प्रणीतम्, मन्त्रं महानन्दसुखाय यस्य ।
ध्यायन्त्यमी सूरिवराः समग्राः, स गौतमो यच्छतु वाञ्छितं मे ॥१०२॥

४ यस्याभिधानं मुनयोऽपि सर्वे, गृह्णन्ति भिक्षाभ्रमणस्य काले ।
मिष्टान्नपानाम्बरपूर्णकामाः, स गौतमो यच्छतु वाञ्छितं मे ॥१०३॥

५ अष्टापदाद्रौ गगने स्वशक्त्या, ययौ जिनानां पदवन्दनाय ।
निशम्य तीर्थातिशयं सुरेभ्यः, स गौतमो यच्छतु वाञ्छितं मे ॥१०४॥

६ त्रिपञ्चसङ्ख्याशततापसानाम्, तपःकृशानामपुनर्भवाय ।
अक्षीणलब्ध्या परमान्नदाता, स गौतमो यच्छतु वाञ्छितं मे ॥१०५॥

७ सदक्षिणं भोजनमेव देयं, साधर्मिकं सङ्घसपर्ययेति ।
कैवल्यवस्त्रं प्रददौ मुनीनाम्, स गौतमो यच्छतु वाञ्छितं मे ॥१०६॥

८ शिवं गते भर्तरि वीरनाथे, युगप्रधानत्वमिहैव मत्वा ।
पट्टाभिषेको विदधे सुरेन्द्रैः, स गौतमो यच्छतु वाञ्छितं मे ॥१०७॥

९ श्रीगौतमस्याष्टकमादरेण, प्रबोधकाले मुनिपुङ्गवा ये ।
पठन्ति ते सूरिपदं च देवानन्दं लभन्ते सुतरां क्रमेण ॥१०८॥
~~~

# योगशास्त्र सूक्त - रत्न - मंजूषा

## कलिकालसर्वज्ञहेमचन्द्रसूरिकृतं योगशास्त्रं

१/१ नमो दुर्वाररागादि-वैरिवारनिवारिणे ।
अर्हते योगिनाथाय, महावीराय तायिने ॥१॥

१/२ पन्नगे च सुरेन्द्रे च, कौशिके पादसंस्पृशि ।
निर्विशेषमनस्काय, श्रीवीरस्वामिने नमः ॥२॥

१/४ श्रुताम्भोधेरधिगम्य, सम्प्रदायाच्च सद्‌गुरोः ।
स्वसंवेदनतश्चापि, योगशास्त्रं विरच्यते ॥३॥

१/५ योगः सर्वविपद्वल्ली-विताने परशुः शितः ।
अमूलमन्त्रतन्त्रं च, कार्मणं निर्वृतिश्रियः ॥४॥

१/६ भूयांसोऽपि हि पाप्मानः, प्रलयं यान्ति योगतः ।
चण्डवाताद् घनघना, घनाघनघटा इव ॥५॥

१/७ क्षिणोति योगः पापानि, चिरकालार्जितान्यपि ।
प्रचितानि यथैधांसि, क्षणादेवाशुशुक्षणिः ॥६॥

१/१० अहो ! योगस्य माहात्म्यं, प्राज्यं साम्राज्यमुद्वहन् ।
अवाप केवलज्ञानं, भरतो भरताधिपः ॥७॥

१/११ पूर्वमप्राप्तधर्माऽपि, परमानन्दनन्दिता ।
योगप्रभावतः प्राप, मरुदेवा परं पदम् ॥८॥

१/१२ ब्रह्मस्त्रीभ्रूणगोघात-पातकान्नरकातिथेः ।
दृढप्रहारिप्रभृतेः, योगो हस्तावलम्बनम् ॥९॥

१/१३ तत्कालकृतदुष्कर्म-कर्मठस्य दुरात्मनः ।
गोप्त्रे चिलातीपुत्रस्य, योगाय स्पृहयेन्न कः ? ॥१०॥

१/१५ चतुर्वर्गेऽग्रणीर्मोक्षो, योगस्तस्य च कारणम्।
ज्ञानश्रद्धानचारित्र-रूपं रत्नत्रयं च सः ॥११॥

१/१६ यथावस्थिततत्त्वानां, संक्षेपाद् विस्तरेण वा ।
योऽवबोधस्तमत्राहुः, सम्यग्ज्ञानं मनीषिणः ॥१२॥

१/१७ रुचिर्जिनोक्ततत्त्वेषु, सम्यक्श्रद्धानमुच्यते ।
जायते तन्निसर्गेण, गुरोरधिगमेन वा ॥१३॥

१/१८ सर्वसावद्ययोगानां, त्यागश्चारित्रमिष्यते ।
कीर्तितं तदहिंसादि-व्रतभेदेन पञ्चधा ॥१४॥

१/२० न यत् प्रमादयोगेन, जीवितव्यपरोपणम् ।
त्रसानां स्थावराणां च, तदहिंसाव्रतं मतम् ॥१५॥

१/२१ प्रियं पथ्यं वचस्तथ्यं, सूनृतव्रतमुच्यते ।
तत्तथ्यमपि नो तथ्यम्, अप्रियं चाहितं च यत् ॥१६॥

१/२२ अनादानमदत्तस्यास्तेयव्रतमुदीरितम् ।
बाह्याः प्राणा नृणामर्थो, हरता तं हता हि ते ॥१७॥

१/२३ दिव्यौदारिककामानां, कृतानुमतिकारितैः ।
मनोवाक्कायतस्त्यागो, ब्रह्माष्टादशधा मतम् ॥१८॥

१/२४ सर्वभावेषु मूर्च्छायाः, त्यागः स्यादपरिग्रहः ।
यदसत्स्वपि जायेत, मूर्च्छया चित्तविप्लवः ॥१९॥

१/२६ मनोगुप्त्येषणाऽऽदानेर्याभिः समितिभिः सदा ।
दृष्टान्नपानग्रहणेनाहिंसां भावयेत् सुधीः ॥२०॥

१/२७ हास्यलोभभयक्रोध-प्रत्याख्यानैर्निरन्तरम् ।
आलोच्य भाषणेनापि, भावयेत् सूनृतव्रतम् ॥२१॥

१/२८ आलोच्यावग्रहयाञ्चा-भीक्ष्णावग्रहयाचनम् ।
एतावन्मात्रमेवैतद्, इत्यवग्रहधारणम् ॥२२॥

१/२९ समानधार्मिकेभ्यश्च, तथाऽवग्रहयाचनम् ।
अनुज्ञापितपानान्नाशनमस्तेयभावनाः ॥२३॥

१/३० स्त्रीषण्ढपशुमद्वेश्मासनकुड्यन्तरोज्झनात् ।
सरागस्त्रीकथात्यागात्, प्राग्रतस्मृतिवर्जनात् ॥२४॥

१/३१ स्त्रीरम्याङ्गेक्षणस्वाङ्ग-संस्कारपरिवर्जनात् ।
प्रणीतात्यशनत्यागाद्, ब्रह्मचर्यं तु भावयेत् ॥२५॥

१/३२ स्पर्शे रसे च गन्धे च, रूपे शब्दे च हारिणि ।
पञ्चस्वितीन्द्रियार्थेषु, गाढं गार्ध्यस्य वर्जनम् ॥२६॥

१/३३ एतेष्वेवामनोज्ञेषु, सर्वथा द्वेषवर्जनम् ।
आकिञ्चन्यव्रतस्यैवं, भावनाः पञ्च कीर्त्तिताः ॥२७॥

१/३६ लोकातिवाहिते मार्गे, चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य, गतिरीर्या मता सताम् ॥२८॥

१/३७ अवद्यत्यागतः सर्व-जनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा, भाषासमितिरुच्यते ॥२९॥

१/३८ द्विचत्वारिंशता भिक्षा-दोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते, सैषणासमितिर्मता ॥३०॥

१/३९ आसनादीनि संवीक्ष्य, प्रतिलिख्य च यत्नतः ।
गृह्णीयाद् निक्षिपेद्वा यत्, साऽऽदानसमितिः स्मृता ॥३१॥

१/४० कफमूत्रमलप्रायं, निर्जन्तुजगतीतले ।
यत्नाद् यदुत्सृजेत् साधुः, सोत्सर्गसमितिर्भवेत् ॥३२॥

१/४१ विमुक्तकल्पनाजालं, समत्वे सुप्रतिष्ठितम् ।
आत्मारामं मनः तज्ज्ञैः, मनोगुप्तिरुदाहृता ॥३३॥

१/४२ संज्ञादिपरिहारेण, यन्मौनस्यावलम्बनम् ।
वाग्वृत्तेः संवृत्तिर्वा या, सा वाग्गुप्तिरिहोच्यते ॥३४॥

१/४३ उपसर्गप्रसङ्गेऽपि, कायोत्सर्गजुषो मुनेः ।
स्थिरीभावः शरीरस्य, कायगुप्तिर्निगद्यते ॥३५॥

१/४४ शयनासननिक्षेपादानचङ्क्रमणेषु यः ।
स्थानेषु चेष्टानियमः, कायगुप्तिस्तु साऽपरा ॥३६॥

१/४५ एताश्चारित्रगात्रस्य, जननात् परिपालनात् ।
संशोधनाच्च साधूनां, मातरोऽष्टौ प्रकीर्त्तिताः ॥३७॥

२/१५ शमसंवेगनिर्वेदानुकम्पास्तिक्यलक्षणैः ।
लक्षणैः पञ्चभिः सम्यक्, सम्यक्त्वमुपलक्ष्यते ॥३८॥

२/१६ स्थैर्यं प्रभावना भक्तिः, कौशलं जिनशासने ।
तीर्थसेवा च पञ्चास्य, भूषणानि प्रचक्षते ॥३९॥

२/१७ शङ्का काङ्क्षा विचिकित्सा, मिथ्यादृष्टिप्रशंसनम् ।
तत्संस्तवश्च पञ्चापि, सम्यक्त्वं दूषयन्त्यलम् ॥४०॥

२/२० आत्मवत् सर्वभूतेषु, सुखदुःखे प्रियाप्रिये ।
चिन्तयन्नात्मनोऽनिष्टां, हिंसामन्यस्य नाचरेत् ॥४१॥

२/२७ श्रूयते प्राणिघातेन, रौद्रध्यानपरायणौ ।
सुभूमो ब्रह्मदत्तश्च, सप्तमं नरकं गतौ ॥४२॥

२/४८ यो भूतेष्वभयं दद्याद्, भूतेभ्यस्तस्य नो भयम् ।
यादृग् वितीर्यते दानं, तादृगासाद्यते फलम् ॥४३॥

२/५२ दीर्घमायुः परं रूपम्, आरोग्यं श्लाघनीयता ।
अहिंसायाः फलं सर्वं, किमन्यत् कामदैव सा ॥४४॥

२/५३ मन्मनत्वं काहलत्वं, मूकत्वं मुखरोगिताम् ।
वीक्ष्यासत्यफलं कन्यालीकाद्यसत्यमुत्सृजेत् ॥४५॥

२/५५ सर्वलोकविरुद्धं यद्, यद् विश्वसितघातकम् ।
यद् विपक्षश्च पुण्यस्य, न वदेत्तदसूनृतम् ॥४६॥

२/५६ असत्यतो लघीयस्त्वम्, असत्याद् वचनीयता ।
अधोगतिरसत्याच्च, तदसत्यं परित्यजेत् ॥४७॥

२/५९ निगोदेष्वथ तिर्यक्षु, तथा नरकवासिषु ।
उत्पद्यन्ते मृषावाद-प्रसादेन शरीरिणः ॥४८॥

२/६० ब्रूयाद् भियोपरोधाद् वा, नासत्यं कालिकार्यवत् ।
यस्तु ब्रूते स नरकं, प्रयाति वसुराजवत् ॥४९॥

२/६१ न सत्यमपि भाषेत, परपीडाकरं वचः ।
लोकेऽपि श्रूयते यस्मात्, कौशिको नरकं गतः ॥५०॥

२/६४ अलीकं ये न भाषन्ते, सत्यव्रतमहाधनाः ।
नापराद्धुमलं तेभ्यो, भूतप्रेतोरगादयः ॥५१॥

२/६५ दौर्भाग्यं प्रेष्यतां दास्यम्, अङ्गच्छेदं दरिद्रताम् ।
अदत्तात्तफलं ज्ञात्वा, स्थूलस्तेयं विवर्जयेत् ॥५२॥

२/७३ दूरे परस्य सर्वस्वम्, अपहर्तुमुपक्रमः ।
उपाददीत नादत्तं, तृणमात्रमपि क्वचित् ॥५३॥

२/७७ रम्यमापातमात्रे यत्, परिणामेऽतिदारुणम् ।
किम्पाककफलसङ्काशं, तत् कः सेवेत मैथुनम् ? ॥५४॥

२/७८ कम्पः स्वेदः श्रमो मूर्च्छा, भ्रमिः ग्लानिः बलक्षयः ।
राजयक्ष्मादिरोगाश्च, भवेयुः मैथुनोत्थिताः ॥५५॥

२/८१ स्त्रीसम्भोगेन यः कामज्वरं प्रतिचिकीर्षति ।
स हुताशं घृताहुत्या, विध्यापयितुमिच्छति ॥५६॥

२/८२ वरं ज्वलदयस्तम्भ-परिरम्भो विधीयते ।
न पुनर्नरकद्वार-रामाजघनसेवनम् ॥५७॥

२/१०१ अकलङ्कमनोवृत्तेः, परस्त्रीसन्निधावपि ।
सुदर्शनस्य किं ब्रूमः, सुदर्शनसमुन्नतेः ? ॥५८॥

२/१०४ प्राणभूतं चरित्रस्य, परब्रह्मैककारणम् ।
समाचरन् ब्रह्मचर्यं, पूजितैरपि पूज्यते ॥५९॥

२/१०५ चिरायुषः सुसंस्थाना, दृढसंहनना नराः ।
तेजस्विनो महावीर्या, भवेयुर्ब्रह्मचर्यतः ॥६०॥

२/१०७ परिग्रहमहत्त्वाद्धि, मज्जत्येव भवाम्बुधौ ।
महापोत इव प्राणी, त्यजेत् तस्मात् परिग्रहम् ॥६१॥

२/११४ असन्तोषवतः सौख्यं, न शक्रस्य न चक्रिणः ।
जन्तोः सन्तोषभाजो यद्, अभयस्येव जायते ॥६२॥

४/५ अयमात्मैव संसारः, कषायेन्द्रियनिर्जितः ।
तमेव तद्विजेतारं, मोक्षमाहुः मनीषिणः ॥६३॥

४/९ तत्रोपतापकः क्रोधः, क्रोधो वैरस्य कारणम् ।
दुर्गतेः वर्तनी क्रोधः, क्रोधः शमसुखार्गला ॥६४॥

४/१० उत्पद्यमानः प्रथमं, दहत्येव स्वमाश्रयम् ।
क्रोधः कृशानुवत् पश्चाद्, अन्यं दहति वा न वा ॥६५॥

४/११ क्रोधवह्नेस्तदह्नाय, शमनाय शुभात्मभिः ।
श्रयणीया क्षमैकैव, संयमारामसारणिः ॥६६॥

४/१२ विनयश्रुतशीलानां, त्रिवर्गस्य च घातकः ।
विवेकलोचनं लुम्पन्, मानोऽन्धङ्करणो नृणाम् ॥६७॥

४/१३ जातिलाभकुलैश्वर्यबलरूपतपःश्रुतैः ।
कुर्वन् मदं पुनस्तानि, हीनानि लभते जनः ॥६८॥

४/१४ उत्सर्पयन् दोषशाखा, गुणमूलान्यधो नयन् ।
उन्मूलनीयो मानद्रुः, तन्मार्दवसरित्प्लवैः ॥६९॥

४/१५ असूनृतस्य जननी, परशुः शीलशाखिनः ।
जन्मभूमिरविद्यानां, माया दुर्गतिकारणम् ॥७०॥

४/१७ तदार्जवमहौषध्या, जगदानन्दहेतुना ।
जयेज्जगद्द्रोहकरीं, मायां विषधरीमिव ॥७१॥

४/१८ आकरः सर्वदोषाणां, गुणग्रसनराक्षसः ।
कन्दो व्यसनवल्लीनां, लोभः सर्वार्थबाधकः ॥७२॥

४/२२ लोभसागरमुद्वेलम्, अतिवेलं महामतिः ।
सन्तोषसेतुबन्धेन, प्रसरन्तं निवारयेत् ॥७३॥

४/२४ विनेन्द्रियजयं नैव, कषायाञ्जेतुमीश्वरः ।
हन्यते हैमनं जाड्यं, न विना ज्वलितानलम् ॥७४॥

४/२५ अदान्तैरिन्द्रियहयैः, चलैरपथगामिभिः ।
आकृष्य नरकारण्ये, जन्तुः सपदि नीयते ॥७५॥

४/२८ वशास्पर्शसुखास्वाद-प्रसारितकरः करी ।
आलानबन्धनक्लेशम्, आसादयति तत्क्षणात् ॥७६॥

४/२९ पयस्यगाधे विचरन्, गिलन् गलगतामिषम् ।
मैनिकस्य करे दीनो, मीनः पतति निश्चितम् ॥७७॥

४/३० निपतन् मत्तमातङ्ग-कपोले गन्धलोलुपः ।
कर्णतालतलाघाताद्, मृत्युमाप्नोति षट्पदः ॥७८॥

४/३१ कनकच्छेदसङ्काश-शिखाऽऽलोकविमोहितः ।
रभसेन पतन् दीपे, शलभो लभते मृतिम् ॥७९॥

४/३२ हरिणो हारिणीं गीतिम्, आकर्णयितुमुद्धुरः ।
आकर्णाकृष्टचापस्य, याति व्याधस्य वेध्यताम् ॥८०॥

४/३३ एवं विषय एकैकः, पञ्चत्वाय निषेवितः ।
कथं हि युगपत् पञ्च, पञ्चत्वाय भवन्ति न ? ॥८१॥

४/३७ अनिरुद्धमनस्कः सन्, योगश्रद्धां दधाति यः ।
पद्भ्यां जिगमिषुः ग्रामं, स पङ्गुरिव हस्यते ॥८२॥

४/४१ सत्यां हि मनसः शुद्धौ, सन्त्यसन्तोऽपि यद् गुणाः ।
सन्तोऽप्यसत्यां नो सन्ति, सैव कार्या बुधैस्ततः ॥८३॥

४/४२ मनःशुद्धिमबिभ्राणा, ये तपस्यन्ति मुक्तये ।
त्यक्त्वा नावं भुजाभ्यां ते, तितीर्षन्ति महाऽर्णवम् ॥८४॥

४/४३ तपस्विनो मनःशुद्धि-विनाभूतस्य सर्वथा ।
ध्यानं खलु मुधा चक्षुर्विकलस्येव दर्पणः ॥८५॥

४/५१ प्रणिहन्ति क्षणार्धेन, साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यात् नरस्तीव्र-तपसा जन्मकोटिभिः ॥८६॥

४/५७ यत् प्रातः तन्न मध्याह्ने, यन्मध्याह्ने न तन्निशि ।
निरीक्ष्यते भवेऽस्मिन् ही, पदार्थानामनित्यता ॥८७॥

४/५९ कल्लोलचपला लक्ष्मीः, सङ्गमाः स्वप्नसंनिभाः ।
वात्याव्यतिकरोत्क्षिप्त-तूलतुल्यं च यौवनम् ॥८८॥

४/६१ इन्द्रोपेन्द्रादयोऽप्येते, यन्मृत्योर्यान्ति गोचरम् ।
अहो ! तदन्तकातङ्के, कः शरण्यः शरीरिणाम् ? ॥८९॥

४/६२ पितुर्मातुः स्वसुर्भ्रातुः, तनयानां च पश्यताम् ।
अत्राणो नीयते जन्तुः, कर्मभिर्यमसद्मनि ॥९०॥

४/६३ शोचन्ति स्वजनानन्तं, नीयमानान् स्वकर्मभिः ।
नेष्यमाणं तु शोचन्ति, नात्मानं मूढबुद्धयः ॥९१॥

४/६४ संसारे दुःखदावाग्नि-ज्वलज्ज्वालाकरालिते ।
वने मृगार्भकस्येव, शरणं नास्ति देहिनः ॥९२॥

४/६५ श्रोत्रियः श्वपचः स्वामी, पत्तिः ब्रह्मा कृमिश्च सः ।
संसारनाट्ये नटवत्, संसारी हन्त ! चेष्टते ॥९३॥

४/६७ समस्तलोकाकाशेऽपि, नानारूपैः स्वकर्मतः ।
वालाग्रमपि तन्नास्ति, यन्न स्पृष्टं शरीरिभिः ॥९४॥

४/६८ एक उत्पद्यते जन्तुः एक एव विपद्यते ।
कर्माण्यनुभवत्येकः, प्रचितानि भवान्तरे ॥९५॥

४/६९ अन्यैस्तेनार्जितं वित्तं, भूयः संभूय भुज्यते ।
स त्वेको नरकक्रोडे, क्लिश्यते निजकर्मभिः ॥९६॥

४/७० यत्रान्यत्वं शरीरस्य, वैसदृश्यात् शरीरिणः ।
धनबन्धुसहायानां, तत्रान्यत्वं न दुर्वचम् ॥९७॥

४/७२ रसासृग्मांसमेदोऽस्थि-मज्जाशुक्रान्त्रवर्चसाम् ।
अशुचीनां पदं कायः, शुचित्वं तस्य तत् कुतः ? ॥९७८।

४/७३ नवस्त्रोतःस्त्रवद्विस्त्र-रसनिःस्यन्दपिच्छिले ।
देहेऽपि शौचसङ्कल्पो, महन्मोहविजृम्भितम् ॥९९॥

४/८८ सदोषमपि दीप्तेन, सुवर्णं वह्निना यथा ।
तपोऽग्निना तप्यमानः, तथा जीवो विशुध्यति ॥१००॥

४/९४ धर्मप्रभावतः कल्प-द्रुमाद्या ददतीप्सितम् ।
गोचरेऽपि न ते यत्स्युः, अधर्माधिष्ठितात्मनाम् ॥१०१॥

४/९५ अपारे व्यसनाम्भोधौ, पतन्तं पाति देहिनम् ।
सदा सविधवर्त्येक-बन्धुर्धर्मोऽतिवत्सलः ॥१०२॥

४/१०० अबन्धूनामसौ बन्धुः, असखीनामसौ सखा ।
अनाथानामसौ नाथो, धर्मो विश्वैकवत्सलः ॥१०३॥

४/१०१ रक्षोयक्षोरगव्याघ्र-व्यालानलगरादयः ।
नापकर्तुमलं तेषां, यैर्धर्मः शरणं श्रितः ॥१०४॥

४/११८ मा कार्षीत् कोऽपि पापानि, मा च भूत् कोऽपि दुःखितः ।
मुच्यतां जगदप्येषा, मतिर्मैत्री निगद्यते ॥१०५॥

४/११९ अपास्ताशेषदोषाणां, वस्तुतत्त्वावलोकिनाम् ।
गुणेषु प क्षपातो यः, स प्रमोदः प्रकीर्तितः ॥१०६॥

४/१२० दीनेष्वार्त्तेषु भीतेषु, याचमानेषु जीवितम् ।
प्रतीकारपरा बुद्धिः, कारुण्यमभिधीयते ॥१०७॥

४/१२१ क्रूरकर्मसु निःशङ्कं, देवतागुरुनिन्दिषु ।
आत्मशंसिषु योपेक्षा, तन्माध्यस्थ्यमुदीरितम् ॥१०८॥

# યોગસારાદિ સૂક્ત - રત્ન - મંજૂષા

## ~~~ योगसारः ~~~

१/१ प्रणम्य परमात्मानं, रागद्वेषविवर्जितम् ।
योगसारं प्रवक्ष्यामि, गम्भीरार्थं समासतः ॥१॥

१/२१ कृतकृत्योऽयमाराध्यः, स्यादाज्ञापालनात् पुनः ।
आज्ञा तु निर्मलं चित्तं, कर्तव्यं स्फटिकोपमम् ॥२॥

१/२ ज्ञानदर्शनशीलानि, पोषणीयानि सर्वदा ।
रागद्वेषादयो दोषा, हन्तव्याश्च क्षणे क्षणे ॥३॥

१/२३ एतावत्येव तस्याज्ञा, कर्मद्रुमकुठारिका ।
समस्तद्वादशाङ्गार्थ-सारभूताऽतिदुर्लभा ॥४॥

१/२७ सर्वजन्तुहिताऽऽज्ञैवाज्ञैव मोक्षैकपद्धतिः ।
चरिताज्ञैव चारित्रं, आज्ञैव भवभञ्जनी ॥५॥

१/३४ येनाज्ञा यावदाराद्धा, स तावल्लभते सुखम् ।
यावद् विराधिता येन, तावद् दुःखं लभेत सः ॥६॥

१/४२ वीतरागं यतो ध्यायन्, वीतरागो भवेद् भवी ।
इलिका भ्रमरी भीता, ध्यायन्ती भ्रमरीं यथा ॥७॥

१/४३ रागादिदूषितं ध्यायन्, रागादिविवशो भवेत् ।
कामुकः कामिनीं ध्यायन्, यथा कामैकविह्वलः ॥८॥

२/५ परे हितमतिर्मैत्री, मुदिता गुणमोदनम् ।
उपेक्षा दोषमाध्यस्थ्यं, करुणा दुःखमोक्षधीः ॥९॥

२/६ मैत्री निखिलसत्त्वेषु, प्रमोदो गुणशालिषु ।
माध्यस्थ्यमविनेयेषु, करुणा दुःखिदेहिषु ॥१०॥

२/७ धर्मकल्पद्रुमस्यैता, मूलं मैत्र्यादिभावनाः ।
यैर्न ज्ञाता न चाभ्यस्ताः, स तेषामतिदुर्लभः ॥११॥

२/८ अहो ! विचित्रं मोहान्ध्यं, तदन्धैरिह यज्जनैः ।
दोषा असन्तोऽपीक्ष्यन्ते, परे सन्तोऽपि नात्मनि ॥१२॥

२/११ यथाऽऽहतानि भाण्डानि, विनश्यन्ति परस्परम् ।
तथा मत्सरिणोऽन्योऽन्यं, ही दोषग्रहणाद् हताः ॥१३॥

२/१२ परं पतन्तं पश्यन्ति, न तु स्वं मोहमोहिताः ।
कुर्वन्तः परदोषाणां, ग्रहणं भवकारणम् ॥१४॥

२/१३ यथा परस्य पश्यन्ति, दोषान् यद्यात्मनस्तथा ।
सैवाजरामरत्वाय, रससिद्धिस्तदा नृणाम् ॥१५॥

२/३२ अणुमात्रा अपि गुणा, दृश्यन्ते स्वधियाऽऽत्मनि ।
दोषास्तु पर्वतस्थूला, अपि नैव कथञ्चन ॥१६॥

२/१४ रागद्वेषविनाभूतं, साम्यं तत्त्वं यदुच्यते ।
स्वशंसिनां क्व तत् तेषां, परदूषणदायिनाम् ? ॥१७॥

२/१५ मानेऽपमाने निन्दायां, स्तुतौ वा लोष्ठुकाञ्चने ।
जीविते मरणे लाभालाभे रङ्के महर्द्धिके ॥१८॥

२/१६ शत्रौ मित्रे सुखे दुःखे, हृषीकार्थे शुभाशुभे ।
सर्वत्रापि यदेकत्वं, तत्त्वं तद् भेद्यतां परम् ॥१९॥

३/२१ वृक्षस्य च्छेद्यमानस्य, भूष्यमाणस्य वाजिनः ।
यथा न रोषस्तोषश्च, भवेद् योगी समस्तथा ॥२०॥

२/१८ क्रियते दधिसाराय, दधिमन्थो यथा किल ।
तथैव साम्यसाराय, योगाभ्यासो यमादिकः ॥२१॥

२/१९ अद्य कल्येऽपि कैवल्यं, साम्येनानेन नान्यथा ।
प्रमादः क्षणमप्यत्र, ततः कर्तुं न साम्प्रतम् ॥२२॥

२/३८ साम्यं समस्तधर्माणां, सारं ज्ञात्वा ततो बुधाः ।
बाह्यं दृष्टिग्रहं मुक्त्वा, चित्तं कुरुत निर्मलम् ॥२३॥

३/१६ साम्यं मानसभावेषु, साम्यं वचनवीचिषु ।
साम्यं कायिकचेष्टासु, साम्यं सर्वत्र सर्वदा ॥२४॥

२/२८ तथा चिन्त्यं तथा वाच्यं, चेष्टितव्यं तथा तथा ।
मलीमसं मनोऽत्यर्थं, यथा निर्मलतां व्रजेत् ॥२५॥

२/३० सुकरं मलधारित्वं, सुकरं दुस्तपः तपः ।
सुकरोऽक्षनिरोधश्च, दुष्करं चित्तशोधनम् ॥२६॥

३/२३ यथा गुडादिदानेन, यत्किञ्चित् त्याज्यते शिशुः ।
चलं चित्तं शुभध्यानेनाशुभं त्याज्यते तथा ॥२७॥

३/१७ यदि त्वं साम्यसन्तुष्टो, विश्वं तुष्टं तदा तव ।
तल्लोकस्यानुवृत्त्या किं ?, स्वमेवैकं समं कुरु ॥२८॥

३/२६ तोषणीयो जगन्नाथः, तोषणीयश्च सद्गुरुः ।
तोषणीयस्तथा स्वात्मा, किमन्यैर्बत तोषितैः ? ॥२९॥

३/२७ कषायविषयाक्रान्तो, बहिर्बुद्धिरयं जनः ।
किं तेन रुष्टतुष्टेन ?, तोषरोषौ च तत्र किम् ? ॥३०॥

३/२८ असदाचारिणः प्रायो, लोकाः कालानुभावतः ।
द्वेषस्तेषु न कर्तव्यः, संविभाव्य भवस्थितिम् ॥३१॥

२/२ दृष्टिरागो महामोहो, दृष्टिरागो महाभवः ।
दृष्टिरागो महामारो, दृष्टिरागो महाज्वरः ॥३२॥

३/२ कषाया विषया दुःखम्, इति वेत्ति जनः स्फुटम् ।
तथाऽपि तन्मुखः कस्माद्, धावतीति न बुध्यते ॥३३॥

३/३ सर्वसङ्गपरित्यागः, सुखमित्यपि वेत्ति सः ।
संमुखोऽपि भवेत् किं न ?, तस्येत्यपि न बुध्यते ॥३४॥

३/६ शब्दरूपरसस्पर्श-गन्धाश्च मृगतृष्णिका ।
दुःखयन्ति जनं सर्वं, सुखाभासविमोहितम् ॥३५॥

५/४३ दुःखकूपेऽत्र संसारे, सुखलेशभ्रमोऽपि यः ।
सोऽपि दुःखसहस्रेणानुविद्धोऽतः कुतः सुखम् ? ॥३६॥

३/७ नोपेन्द्रस्य न चेन्द्रस्य, तत् सुखं नैव चक्रिणः ।
साम्यामृतविनिर्मग्नो, योगी प्राप्नोति यत् सुखम् ॥३७॥

३/२६ प्रशान्तस्य निरीहस्य, सदाऽऽनन्दस्य योगिनः ।
इन्द्रादयोऽपि ते रङ्क-प्रायाः स्युः किमुतापरे ? ॥३८॥

४/२८ नार्थ्यते यावदैश्वर्यं, तावदायाति संमुखम् ।
यावदभ्यर्थ्यते तावत्, पुनर्याति पराङ्मुखम् ॥३९॥

३/८ रागोऽभीष्टेषु सर्वेषु, द्वेषोऽनिष्टेषु वस्तुषु ।
क्रोधः कृतापराधेषु, मानः परपराभवे ॥४०॥

३/९ लोभः परार्थसम्प्राप्तौ, माया च परवञ्चने ।
गते मृते तथा शोको, हर्षश्चागतजातयोः ॥४१॥

३/१० अरतिर्विषयग्रामे, याऽशुभे च शुभे रति ।
चौरादिभ्यो भयं चैव, कुत्सा कुत्सितवस्तुषु ॥४२॥

३/११ वेदोदयश्च सम्भोगे, व्यलीयेत मुनेर्यदा ।
अन्तःशुद्धिकरं साम्यामृतमुज्जृम्भते तदा ॥४३॥

३/१३ दुर्विजेया दुरुच्छेद्या, एतेऽभ्यन्तरवैरिणः ।
उत्तिष्ठमाना एवातो, रक्षणीयाः प्रयत्नतः ॥४४॥

३/१४ यद्यात्मा निर्जितोऽमीभिः, ततो दुःखागमो महान् ।
यद्यात्मना जिता एते, महान् सौख्यागमस्तदा ॥४५॥

५/१६ संसारसरणिर्लोभो, लोभः शिवपथाचलः ।
सर्वदुःखखनिर्लोभो, लोभो व्यसनमन्दिरम् ॥४६॥

५/१७ शोकादीनां महाकन्दो, लोभो क्रोधानलानिलः ।
मायावल्लिसुधाकुल्या, मानमत्तेभवारुणी ॥४७॥

५/१८ त्रिलोक्यामपि ये दोषाः, ते सर्वे लोभसम्भवाः ।
गुणास्तथैव ये केऽपि, ते सर्वे लोभवर्जनात् ॥४८॥

५/१९ नैरपेक्ष्यादनौत्सुक्यं, अनौत्सुक्याच्च सुस्थता ।
सुस्थता च परानन्दः, तदपेक्षां क्षयेन्मुनिः ॥४९॥

५/२० अधर्मो जिह्मता यावद्, धर्मः स्याद् यावदार्जवम् ।
अधर्मधर्मयोरेतद्, द्वयमादिमकारणम् ॥५०॥

५/२१ सुखमार्जवशीलत्वं, सुखं नीचैश्च वर्तनम् ।
सुखमिन्द्रियसन्तोषः, सुखं सर्वत्र मैत्र्यकम् ॥५१॥

५/३९ सप्तधातुमये श्लेष्म-मूत्राद्यशुचिपूरिते ।
शरीरकेऽपि पापाय, कोऽयं शौचाग्रहस्तव ? ॥५२॥

५/३६ एको गर्भे स्थितो जात, एक एको विनङ्क्ष्यति ।
तथाऽपि मूढ ! पत्न्यादीन्, किं ममत्वेन पश्यसि ? ॥५३॥

५/३७ पापं कृत्वा स्वतो भिन्नं, कुटुम्बं पोषितं त्वया ।
दुःखं सहिष्यते स्वेन, भ्रान्तोऽसि हा ! महाऽन्तरे ॥५४॥

५/१० औचित्यं ये विजानन्ति, सर्वकार्येषु सिद्धिदम् ।
सर्वप्रियङ्करा ये च, ते नरा विरला जने ॥५५॥

५/११ औचित्यं परमो बन्धुः, औचित्यं परमं सुखम् ।
धर्मादिमूलमौचित्यं, औचित्यं जनमान्यता ॥५६॥

५/१२ कर्मबन्धदृढश्लेषं, सर्वस्याप्रीतिकं सदा ।
धर्मार्थिना न कर्तव्यं, वीरेण जटिनि यथा ॥५७॥

५/८ मुनिना मसृणं शान्तं, प्राञ्जलं मधुरं मृदु ।
वदता तापलेशोऽपि, त्याज्यः स्वस्य परस्य च ॥५८॥

४/५ कषायविषयग्रामे, धावन्तमतिदुर्जयम् ।
यः स्वमेव जयत्येकं, स वीरतिलकः कुतः ?॥५९॥

४/६ धीराणामपि वैधुर्य-करै रौद्रपरीषहैः ।
स्पृष्टः सन् कोऽपि वीरेन्द्रः, संमुखो यदि धावति ॥६०॥

४/७ उपसर्गे सुधीरत्वं, सुभीरुत्वमसंयमे ।
लोकातिगं द्वयमिदं, मुनेः स्याद् यदि कस्यचित् ॥६१॥

४/९ जगत्त्रयैकमल्लश्च, कामः केन विजीयते ? ।
मुनिवीरं विना कश्चित्, चित्तनिग्रहकारिणम् ॥६२॥

५/२३ सुकुमारसुरूपेण, शालिभद्रेण भोगिना ।
तथा तप्तं तपो ध्यायन्, न भवेत् कस्तपोरतः ? ॥६३॥

४/३१ ये सिद्धा ये च सेत्स्यन्ति, सर्वे सत्त्वे प्रतिष्ठिताः ।
सत्त्वं विना हि सिद्धिर्न, प्रोक्ता कुत्रापि शासने ॥६४॥

५/१७ अनन्तान् पुद्गलावर्तान्, आत्मन्नेकेन्द्रियादिषु ।
भ्रान्तोऽसि छेदभेदादि-वेदनाभिरभिद्रुतः ॥६५॥

५/२८ साम्प्रतं तु दृढीभूय, सर्वदुःखदवानलम् ।
व्रतदुःखं कियत्कालं, सह मा मा विषीद भोः ! ॥६६॥

५/३० यदा दुःखं सुखत्वेन, दुःखत्वेन सुखं यदा ।
मुनिर्वेत्ति तदा तस्य, मोक्षलक्ष्मीः स्वयंवरा ॥६७॥

४/२२ किन्तु सातैकलिप्सुः स, वस्त्राहारादिमूर्च्छया ।
कुर्वाणो मन्त्रतन्त्रादि, गृहव्याप्तिं च गेहिनाम् ॥६८॥

४/२३ कथयँश्च निमित्ताद्यं, लाभालाभं शुभाशुभम् ।
कोटिं काकिणिमात्रेण, हारयेत् स्वं व्रतं त्यजन् ॥६९॥

५/२९ उपदेशादिना किञ्चित्, कथञ्चित् कार्यते परः ।
स्वात्मा तु स्वहिते योक्तुं, मुनीन्द्रैरपि दुष्करः ॥७०॥

४/४० मानुष्यं दुर्लभं लब्ध्वा, ये न लोकोत्तरफलम् ।
गृह्णन्ति सुखमायत्यां, पशवस्ते नरा अपि ॥७१॥

४/४१ तत्पुनर्मोक्षदो धर्मः, शीलाङ्गवहनात्मकः ।
प्रतिस्रोतःप्लवात् साध्यः, सत्त्वसारैकमानसैः ॥७२॥

~~ देहात्मभेदप्रकरणम् ~~

१ येनात्माऽबुध्यतात्मैव, परत्वेनैव चापरम् ।
अक्षयानन्तबोधाय, तस्मै सिद्धात्मने नमः ॥७३॥

१३ देहे स्वबुद्धिरात्मानं, युनक्त्येतेन निश्चयात् ।
स्वात्मन्येवात्मधीस्तस्माद्, वियोजयति देहिनाम् ॥७४॥

१४ देहेष्वात्मधिया जाताः, पुत्रभार्यादिकल्पनाः ।
सम्पत्तिमात्मनस्ताभिः, मन्यते हा ! हतं जगत् ॥७५॥

१५ मूलं संसारदुःखस्य, देह एवात्मधीस्ततः ।
त्यक्त्वैनां प्रविशेदन्तः, बहिरव्यापृतेन्द्रियः ॥७६॥

३३ यो न वेत्ति परं देहाद्, एवमात्मानमव्ययम् ।
लभते न स निर्वाणं, तप्त्वाऽपि परमं तपः ॥७७॥

६४ जीर्णे वस्त्रे यथाऽऽत्मानं, न जीर्णं मन्यते तथा ।
जीर्णे स्वदेहेऽप्यात्मानं, न जीर्णं मन्यते बुधः ॥७८॥

६५ नष्टे वस्त्रे यथाऽऽत्मानं, न नष्टं मन्यते तथा ।
नष्टे स्वदेहेऽप्यात्मानं, न नष्टं मन्यते बुधः ॥७९॥

७४ देहान्तरगतेर्बीजं, देहेऽस्मिन्नात्मभावना ।
बीजं विदेहनिष्पत्तेः, आत्मन्येवात्मभावना ॥८०॥

७७ आत्मन्येवात्मधीरन्यां, शरीरगतिमात्मनः ।
मन्यते निर्भयं त्यक्त्वा, वस्त्रं वस्त्रान्तरग्रहम् ॥८१॥

~~ हृदयप्रदीपषट्त्रिंशिका ~~

३ सम्यग् विरक्तिर्ननु यस्य चित्ते, सम्यग् गुरुर्यस्य च तत्त्ववेत्ता ।
सदाऽनुभूत्या दृढनिश्चयो यः, तस्यैव सिद्धिर्न हि चापरस्य ॥८२॥

४ विग्रहं कृमिनिकायसङ्कुलं, दुःखदं हृदि विवेचयन्ति ये ।
गुप्तिबद्धमिव चेतनं हि ते, मोचयन्ति तनुयन्त्रयन्त्रितम् ॥८३॥

५ भोगार्थमेतद् भविनां शरीरं,
ज्ञानार्थमेतत् किल योगिनां वै ।
जाता विषं चेद् विषया हि सम्यग्-
ज्ञानात् ततः किं कुणपस्य पुष्ट्या ? ॥८४॥

६ त्वङ्मांसमेदोऽस्थिपुरीषमूत्र-
पूर्णेऽनुरागः कुणपे कथं ते ? ।
द्रष्टा च वक्ता च विवेकरूपः,
त्वमेव साक्षात् किमु मुह्यसीत्थम् ? ॥८५॥

७ धनं न केषां निधनं गतं वै ?,
दरिद्रिणः के धनिनो न दृष्टाः ? ।
दुःखैकहेतौ विभवेऽतितृष्णां,
त्यक्त्वा सुखी स्यादिति मे विचारः ॥८६॥

८ संसारदुःखान्न परोऽस्ति रोगः, सम्यग्विचारात् परमौषधं न ।
तद्रोगदुःखस्य विनाशनाय, सच्छास्त्रतोऽयं क्रियते विचारः ॥८७॥

९ अनित्यताया यदि चेत् प्रतीतिः, तत्त्वस्य निष्ठा च गुरुप्रसादात् ।
सुखी हि सर्वत्र जने वने च, नो चेद् वने चाथ जनेषु दुःखी ॥८८॥

१० मोहान्धकारे भ्रमतीह तावत्, संसारदुःखैश्च कदर्थ्यमानः ।
यावद् विवेकार्कमहोदयेन, यथास्थितं पश्यति नात्मरूपम् ॥८९॥

११ अर्थो ह्यनर्थो बहुधा मतोऽयम्, स्त्रीणां चरित्राणि शवोपमानि ।
विषेण तुल्या विषयाश्च तेषां, येषां हृदि स्वात्मलयानुभूतिः ॥९०॥

१२ कार्यं च किं ते परदोषदृष्ट्या ?,
कार्यं च किं ते परचिन्तया च ? ।
वृथा कथं खिद्यसि बालबुद्धे !?,
कुरु स्वकार्यं त्यज सर्वमन्यत् ॥९१॥

१३ यस्मिन् कृते कर्मणि सौख्यलेशो,
दुःखानुबन्धस्य तथाऽस्ति नान्तः ।
मनोऽभितापो मरणं हि यावत्,
मूर्खोऽपि कुर्यात् खलु तन्न कर्म ॥९२॥

१४ यदर्जितं वै वयसाऽखिलेन,
ध्यानं तपो ज्ञानमुखं च सत्यम् ।
क्षणेन सर्वं प्रदहत्यहो ! तत्,
कामो बली प्राप्य छलं यतीनाम् ॥९३॥

१५ बलादसौ मोहरिपुर्जनानां, ज्ञानं विवेकं च निराकरोति ।
मोहाभिभूतं हि जगद्विनष्टं, तत्त्वावबोधादपयाति मोहः ॥९४॥

१६ सर्वत्र सर्वस्य सदा प्रवृत्तिः,
दुःखस्य नाशाय सुखस्य हेतोः ।
तथाऽपि दुःखं न विनाशमेति,
सुखं न कस्यापि भजेत् स्थिरत्वम् ॥९५॥

१७ यत् कृत्रिमं वैषयिकादिसौख्यम्,
भ्रमन् भवे को न लभेत मर्त्यः ? ।
सर्वेषु तच्चाधममध्यमेषु,
यद् दृश्यते तत्र किमद्भुतं च ? ॥९६॥

१९ गृहीतलिङ्गस्य च चेद् धनाशा, गृहीतलिङ्गो विषयाभिलाषी ।
गृहीतलिङ्गो रसलोलुपश्चेद्, विडम्बनं नास्ति ततोऽधिकं हि ॥९७॥

२० ये लुब्धचित्ता विषयार्थभोगे, बहिर्विरागा हृदि बद्धरागाः ।
ते दाम्भिका वेषधराश्च धूर्ताः, मनांसि लोकस्य तु रञ्जयन्ति ॥९८॥

२२ ये निःस्पृहास्त्यक्तसमस्तरागाः,
तत्त्वैकनिष्ठा गलिताभिमानाः ।
सन्तोषपोषैकविलीनवाञ्छाः,
ते रञ्जयन्ति स्वमनो न लोकम् ॥९९॥

२३ तावद्विवादी जनरञ्जकश्च,
यावन्न चैवात्मरसे सुखज्ञः ।
चिन्तामणिं प्राप्य वरं हि लोके,
जने जने कः कथयन् प्रयाति ? ॥१००॥

२६ रुष्टैर्जनैः किं यदि चित्तशान्तिः ?,
तुष्टैर्जनैः किं यदि चित्ततापः ?।
प्रीणाति नो नैव दुनोति चान्यान्,
स्वस्थः सदौदासपरो हि योगी ॥१०१॥

२७ एकः पापात् पतति नरके, याति पुण्यात् स्वरेकः,
पुण्यापुण्यप्रचयविगमात् मोक्षमेकः प्रयाति ।
सङ्गान्नूनं न भवति सुखम्, न द्वितीयेन कार्यम्,
तस्मादेको विचरति सदाऽऽनन्दसौख्येन पूर्णः ॥१०२॥

२८ त्रैलोक्यमेतद् बहुभिर्जितं यैः, मनोजये तेऽपि यतो न शक्ताः ।
मनोजयस्यात्र पुरो हि तस्मात्, तृणं त्रिलोकीविजयं वदन्ति ॥१०३॥

२९ मनोलयान्नास्ति परो हि योगो, ज्ञानं तु तत्त्वार्थविचारणाच्च ।
समाधिसौख्यान्न परं च सौख्यम्, संसारसारं त्रयमेतदेव ॥१०४॥

३१ विदन्ति तत्त्वं न यथास्थितं वै,
सङ्कल्पचिन्ताविषयाकुला ये ।
संसारदुःखैश्च कदर्थितानां,
स्वप्नेऽपि तेषां न समाधिसौख्यम् ॥१०५॥

३२ श्लोको वरं परमतत्त्वपथप्रकाशी,
न ग्रन्थकोटिपठनं जनरञ्जनाय ।
सञ्जीवनीति वरमौषधमेकमेव,
व्यर्थः श्रमप्रजननो न तु मूलभारः ॥१०६॥

३३ तावत् सुखेच्छा विषयार्थभोगे,
यावन् मनःस्वास्थ्यसुखं न वेत्ति ।
लब्धे मनःस्वास्थ्यसुखैकलेशे,
त्रैलोक्यराज्येऽपि न तस्य वाञ्छा ॥१०७॥

३४ न देवराजस्य न चक्रवर्तिनः, तद् वै सुखं रागयुतस्य मन्ये ।
यद् वीतरागस्य मुनेः सदाऽत्मनिष्ठस्य चित्ते स्थिरतां प्रयाति ॥१०८॥

# યતિલક્ષણસમુચ્ચય-ઉપદેશરહસ્ય સૂક્ત - રત્ન - મંજૂષા

~~ वाचकयशोविजयकृतः यतिलक्षणसमुच्चयः ~~

१ सिद्धत्थरायपुत्तं, तित्थयरं पणमिऊण भत्तीए ।
सुत्तोइअणीइए, सम्मं जइलक्खणं वुच्छं ॥१॥

३ मग्गाणुसारिकिरिया, पन्नवणिज्जत्तमुत्तमा सद्धा ।
किरिआसु अप्पमाओ, आरंभो सक्कणुट्ठाणे ॥२॥

४ गरुओ गुणाणुराओ, गुरुआणाराहणं तहा परमं ।
अक्खयचरणधणाणं, सत्तविहं लक्खणं एयं ॥३॥

६ मग्गो आगमणीई, अहवा संविग्गबहुजणाइन्नं ।
उभयाणुसारिणी जा, सा मग्गणुसारिणी किरिया ॥४॥

७ अन्नह भणियं पि सुए, किंची कालाइकारणाविक्खं ।
आइन्नमन्नह च्चिय, दीसइ संविग्गगीएहिं ॥५॥

१० जं सव्वहा न सुत्ते पडिसिद्धं, नेव जीववहहेऊ ।
तं सव्वं पि पमाणं, चारित्तधणाण भणिअं च ॥६॥

११ अवलंबिऊण कज्जं, जं किंचि समायरंति गीयत्था ।
थोवावराहबहुगुणं, सव्वेसिं तं पमाणं तु ॥७॥

१२ जं पुण पमायरूवं, गुरुलाघवचिंतविरहियं सवहं ।
सुहसीलसढाइन्नं, चरित्तिणो तं न सेवंति ॥८॥

१५ सारसिओ परिणामो, अहवा उत्तमगुणप्पणप्पवणो ।
हंदि भुजंगमनलिआ-यामसमाणो मओ मग्गो ॥९॥

१६ इत्थं सुहोहनाणा, सुत्ताचरणा य नाणविरहे वि ।
गुरुपरतंतमईणं, जुत्तं मग्गाणुसारित्तं ॥१०॥

४४ जो न य पन्नवणिज्जो, गुरुवयणं तस्स पगइमहुरं पि ।
पित्तज्जरगहिअस्स व, गुडखंड कडुअमाभाइ ॥११॥

४५ पन्नवणिज्जस्स पुणो, उत्तमसद्धा हवे फलं जीसे ।
विहिसेवा य अतत्ती, सुदेसणा खलिअपरिसुद्धि ॥१२॥

५० निरुओ भुज्जरसन्नू, किंचि अवत्थं गओ असुहमन्नं ।
भुंजइ तंमि न रज्जइ, सुहभोअणलालसो धणिअं ॥१३॥

५१ इय सुद्धचरणरसिओ, सेवंतो दव्वओ विरुद्धं पि ।
सद्धागुणेण एसो, न भावचरणं अइक्कमइ ॥१४॥

६० एगंतेण णिसेहो, जोगेसु ण देसिओ विही वा वि ।
दलिअं पप्प णिसेहो, हुज्ज विही वा जहा रोगे ॥१५॥

६१ जंमि णिसेविज्जंते, अइआरो हुज्ज कस्सइ कया वि ।
तेणेव य तस्स पुणो, कयाइ सोही हविज्जाहि ॥१६॥

६२ अणुमित्तो वि न कस्सइ बंधो, परवत्थुपच्चओ भणिओ ।
तह वि खलु जयंति जई, परिणामविसोहिमिच्छंता ॥१७॥

६४ तम्हा सया विसुद्धं, परिणामं इच्छया सुविहिएणं ।
हिंसाययणा सव्वे, परिहरिअव्वा पयत्तेणं ॥१८॥

६६ पाउणइ णेव तित्तिं, सद्धालू नाणचरणकज्जेसु ।
वेयावच्चतवाइसु, अपुव्वगहणे य उज्जमइ ॥१९॥

६८ छुहिअस्स जहा खणमवि, विच्छिज्जइ णेव भोअणे इच्छा ।
एवं मोक्खत्थीणं, छिज्जइ इच्छा ण कज्जंमि ॥२०॥

७० सुपरिचिअआगमत्थो, अवगयपत्तो सुहगुरुअणुण्णाओ ।
मज्झत्थो हियकंखी, सुविसुद्धं देसणं कुणइ ॥२१॥

७२ जह जह बहुस्सुओ संमओ य, सीसगणसंपरिवुडो य ।
अविणिच्छिओ अ समए,तह तह सिद्धंतपडिणीओ ॥२२॥

७४ सावज्जऽणवज्जाणं, वयणाणं जो न जाणइ विसेसं ।
वुत्तुं पि तस्स ण खमं, किमंग पुण देसणं काउं ? ॥२३॥

७६ पत्तंमि जं पदिन्नं, अणुकंपासंगयं च जं दाणं ।
जं च गुणंतरहेऊ, पसंसणिज्जं तयं होइ ॥२४॥

८० जं पुण अपत्तदाणे, पावं भणिअं धुवं भगवईए ।
तं खलु फुडं अपत्ते, पत्ताभिणिवेसमहिगिच्चा ॥२५॥

८३ गुरुणा य अणुण्णाओ, गुरुभावं देसउ लहुं जम्हा ।
सीसस्स हुंति सीसा, ण हुंति सीसा असीसस्स ॥२६॥

८५ जं च ण सुत्ते विहिअं, ण य पडिसिद्धं जणंमि चिररूढं ।
समइविगप्पियदोसा, तं पि ण दूसंति गीयत्था ॥२७॥

८६ संविग्गा गीयतमा, विहिरसिआ पुव्वसूरिणो आसी ।
तददूसिअमायरिअं, अणइसई को णिवारेइ ? ॥२८॥

८७ अइसाहसमेअं जं, उस्सुत्तपरूवणा कडुविवागं ।
जाणंतेहि विहिज्जइ, णिद्देसो सुत्तबज्झत्थे ॥२९॥

९४ पत्तंमि देसणा खलु, णियमा कल्लाणसाहणं होइ ।
कुणइ अ अपत्तपत्ता, विणिवायसहस्सकोडीओ ॥३०॥

९६ आमे घडे णिहत्तं, जहा जलं तं घडं विणासेइ ।
इय सिद्धंतरहस्सं, अप्पाहारं विणासेइ ॥३१॥

१०३ पडिलेहणाई चिट्ठा, छक्कायविघाइणी पमत्तस्स ।
भणिआ सुअंमि तम्हा, अपमाई सुविहिओ हुज्जा ॥३२॥

१११ संजमजोगेसु सया, जे पुण संतवीरिया वि सीअंति ।
कह ते विसुद्धचरणा, बाहिरकरणालसा हुंति ? ॥३४॥

११३ सहसा असक्कचारी, पउरपमायंमि जो पडइ पच्छा ।
खलमित्ति व्व ण किरिया, सलाहणिज्जा हवे तस्स ॥३५॥

११४ दव्वाइनाणनिउणं, अवमन्नंतो गुरुं असक्कचारि जो ।
सिवभूइ व्व कुणंतो, हिंडइ संसाररन्नंमि ॥३६॥

११५ हवइ असक्कारंभो, अत्तुक्करिसजणएण कम्मेण ।
निउणेण साणुबंधं, णज्जइ पुण एसणिज्जं च ॥३७॥

१२१ गुणवुड्ढिइ परग्गय-गुणरत्तो गुणलवं पि संसेइ ।
तं चेव पुरो काउं, तग्गयदोसं उवेहेइ ॥३८॥

१२२ जह अइमुत्तयमुणिणो, पुरोकयं आगमेसिभद्दत्तं ।
थेराण पुरो न पुणो, वयखलिअं वीरणाहेणं ॥३९॥

१२४ दंसणनाणचरित्तं, तवविणयं जत्थ जत्तिअं पासे ।
जिणपन्नत्तं भत्तीइ, पूअए तं तहिं भावं ॥४०॥

१२६ परगुणगहणावेसो, भावचरित्तिस्स जह भवे पवरो ।
दोसलवेण वि निअए, जहा गुणे निग्गुणे गुणइ ॥४१॥

१२८ सीसो सज्झिलओ वा, गणिव्वओ वा न सोग्गइं णेइ ।
जे तत्थ नाणदंसणचरणा ते सुग्गईमग्गो ॥४२॥

१२९ करुणावसेण नवरं, ठावइ मग्गंमि तं पि गुणहीणं ।
अच्चंताजुग्गं पुण, अरत्तदुट्ठो उवेहेइ ॥४३॥

१३२ ण वहइ जो गुणरायं, दोसलवं कड्ढिउं गुणड्ढे वि ।
तस्स णियमा चरित्तं, नत्थि त्ति भणंति समयन्नू ॥४४॥

१३३ गुणदोसाण य भणियं, मज्झत्थत्तं वि निचियमविवेए ।
गुणदोसो पुण लीला, मोहमहारायआणाए ॥४५॥

१३४ सयणप्पमुहेहिंतो जस्स, गुणड्ढंमि णाहिओ रागो ।
तस्स न दंसणसुद्धी, कत्तो चरणं च निव्वाणं ? ॥४६॥

१३५ उत्तमगुणाणुराया, कालाईदोसओ अपत्ता वि ।
गुणसंपया परत्थ वि, न दुल्लहा होइ भव्वाणं ॥४७॥

१३६ गुणरत्तस्स य मुणिणो, गुरुआणाराहणं हवे णियमा ।
बहुगुणरयणनिहाणा, तओ ण अहिओ जओ को वि ॥४८॥

१३७ तिण्हं दुप्पडिआरं, अम्मापिउणो तहेव भट्टिस्स ।
धम्मायरियस्स पुणो, भणिअं गुरुणो विसेसेउं ॥४९॥

१३९ नाणस्स होइ भागी, थिरयरओ दंसणे चरित्ते य ।
धन्ना आवकहाए, गुरुकुलवासं न मुंचंति ॥५०॥

१४० सव्वगुणमूलभूओ, भणिओ आयारपढमसुत्तंमि ।
गुरुकुलवासो तत्थ य, दोसा वि गुणा जओ भणिअं ॥५१॥

१४१ एयस्स परिच्चाया, सुद्धुंछाइ वि णेव हिययाणि ।
कम्माइ वि परिसुद्धं, गुरुआणावत्तिणो बिंति ॥५२॥

१४३ गुरुआणाए चाए, जिणवरआणा न होइ णियमेण ।
सच्छंदविहाराणं, हरिभद्देणं जओ भणिअं ॥५३॥

१४४ एअंमि परिचत्ते, आणा खलु भगवओ परिचत्ता ।
तीए अ परिच्चाए, दुण्ह वि लोगाण चाओ त्ति ॥५४॥

१४८ भावस्स हु णिक्खेवे, जिणगुरुआणाण होइ तुल्लत्तं ।
सरिसं णासा भणियं, महाणिसीहंमि फुडमेयं ॥५५॥

१४९ गुणपुण्णस्स वि वुत्तो, गोअमणाएण गुरुकुले वासो ।
विणयसुदंसणरागा, किमंग पुण वच्चमिअरस्स? ॥५६॥

१५० ण य मोत्तव्वो एसो, कुलवहुणाएण समयभणिएणं ।
बज्झाभावे वि इहं, संवेगो देसणाईहिं ॥५७॥

१५१ खंताइगुणुक्करिसो, सुविहियसंगेण बंभगुत्ती य ।
गुरुवेयावच्चेण य, होइ महाणिज्जरालाहो ॥५८॥

१५३ जह सागरंमि मीणा, संखोहं सागरस्स असहंता ।
निंति तओ सुहकामी, निग्गयमित्ता विणस्संति ॥५९॥

१५४ एवं गच्छसमुद्दे, सारणमाईहिं चोइआ संता ।
निंति तओ सुहकामी, मीणा व जहा विणस्संति ॥६०॥

१५९ गीयत्थो अ विहारो, बीओ गीयत्थनीसिओ भणिओ ।
एत्तो तइअ विहारो, नाणुन्नाओ जिणवरेहिं ॥६१॥

१६९ तित्थयरसमो सूरी, सम्मं जो जिणमयं पयासेइ ।
आणं च अइक्कंतो, सो कापुरिसो ण सप्पुरिसो ॥६२॥

१७६ जो हेउवायपक्खंमि, हेउओ आगमे अ आगमिओ ।
सो ससमयपण्णवओ, सिद्धंतविराहगो अन्नो ॥६३॥

१७८ गुरुगुणरहिओ वि इहं, दट्ठव्वो मूलगुणविउत्तो जो ।
न उ गुणमित्तविहूणो त्ति, चंडरुद्दो उदाहरणं ॥६४॥

२०७ जइ वि न सक्कं काउं, सम्मं जिणभासिअं अणुट्ठाणं ।
तो सम्मं भासिज्जा, जह भणियं खीणरागेहिं ॥६५॥

२०८ ओसन्नो य विहारे, कम्मं सोहेइ सुलहबोही अ ।
चरणकरणं विसुद्धं, उववूहंतो परूवंतो ॥६६॥

२०९ सम्मग्गमग्गसंपट्ठिआण, साहूण कुणइ वच्छल्लं ।
ओसहभेसज्जेहि य, सयमन्नेणं तु कारेई ॥६७॥

२१२ नाणाहिओ वरतरो, हीणो वि हु पवयणं पभावंतो ।
ण य दुक्करं करंतो, सुट्ठु वि अप्पागमो पुरिसो ॥६८॥

२१४ तम्हा सुद्धपरूवगं, आसज्ज गुरुं ण चेव मुंचंति ।
तस्साणाइ सुविहिआ, सविसेसं उज्जमंति पुणो ॥६९॥

२१५ एअं अवमन्नंतो, वुत्तो सुत्तंमि पावसमणु त्ति ।
महामोहबंधगो वि अ, खिंसंतो अपरितप्पंतो ॥७०॥

२२४ बकुसकुसीलेहिं तित्थं, दोसलवा तेसु णियमसंभविणो ।
जइ तेहिं वज्जणिज्जो, अवज्जणिज्जो तओ णत्थि ॥७१॥

२२५ आसयसुद्धीए तओ, गुरुपरतंतस्स सुद्धलिंगस्स ।
भावजइत्तं जुत्तं, अज्झप्पज्झाणणिरयस्स ॥७२॥

~~ वाचकयशोविजयकृतं उपदेशरहस्यम् ~~

१ नमिऊण वद्धमाणं, वुच्छं भविआण विबोहणट्ठाए ।
सम्मं गुरूवइट्ठं, उवएसरहस्समुक्किट्ठं ॥७३॥

१० मग्गणुसारी सड्ढो, पन्नवणिज्जो किरियापरो चेव ।
गुणरागी जो सक्कं, आरभइ अवंकगामी सो ॥७४॥

२२ सो अपुणबंधगो जो, णो पावं कुव्वइ तिव्वभावेणं ।
बहुमण्णइ णेव भवं, सेवइ सव्वत्थ उचियठिइं ॥७५॥

२३ सुस्सूसइ अणुरज्जइ, धम्मे णियमेण कुणइ जहसत्ति।
गुरुदेवाणं भत्तिं, सम्मद्दिट्ठी इमो भणिओ ॥७६॥

२५ णाऊण परिहरंतो, सव्वं सावज्जजोगमुज्जुत्तो ।
पंचसमिओ तिगुत्तो, सव्वचरित्ती महासत्तो ॥७७॥

२६ एएसिं दव्वाणा, भावाणाजणणजोग्गयाए उ ।
थोवा वि हु जं सुद्धा, बीआहाणेण पुण्णफला ॥७८॥

१८ गंठिगया सइबंधग, मग्गाभिमुहा य मग्गपडिआ य।
तह अभविआ य तेसिं पूआदत्थेण दव्वाणा ॥७९॥

१९ लिंगाइं होंति तीसे, ण तदत्थालोअणं न गुणरागो।
नापत्तपुव्वहरिसो, विहिभंगे णो भवभयं च ॥८०॥

४ भण्णइ आणाबज्झा, लोगुत्तरणीइओ ण उ अहिंसा।
सा णज्जइ सुत्ताओ, हेउसरूवाणुबंधेहिं ॥८१॥

५ परिणामो वि अ णियमा, आणाबज्झो न सुंदरो भणिओ।
तित्थयरेऽबहुमाणाऽसग्गहदुट्ठो त्ति तंतंमि ॥८२॥

७ मंडुक्कचुण्णकप्पो, किरिआजणिओ खओ किलेसाणं ।
तद्दड्ढचुण्णकप्पो, नाणकओ तं च आणाए ॥८३॥

५४ तम्हा आणाजोगो, अणुसरियव्वो बुहेहिं जं सो ।
कज्जलमिव प्पईवो, अणुबंधइ उत्तरं धम्मं ॥८४॥

१४५ जयणा खलु आणाए, आचरणा वि अविरुद्धगा आणा ।
णासंविग्गाचरणा, जं असयालंबणकया सा ॥८५॥

१०६ सुद्धुंछाईसु जत्तो, गुरुकुलचागाइणा ण हियहेऊ ।
हंदि भुयाहिं महोअहि-तरणं जह पोअभंगेणं ॥८६॥

१५४ सुत्तत्थाण विसुद्धी, सीसाणं होइ सुगुरुसेवाए ।
सुत्ताओ वि य अत्थे, विहिणा जत्तो दढो जुत्तो ॥८७॥

१४ सुत्तं अत्थणिबद्धं, छायाछायावओ जह णिबद्धा ।
तेणं केवलसुत्ते, अणुरत्तो होइ पडिणीओ ॥८८॥

८६ अंधो असायरहिओ, पुराणुसारी जहा सयं होइ ।
एवं मग्गणुसारी, मुणी अणाभोगपत्तो वि ॥८९॥

१०७ उववासो वि य एक्को, ण सुंदरो इयरकज्जचाएणं ।
णेमित्तिओ जमेसो, णिच्चं एक्कासणं भणियं ॥९०॥

१०३ चरणकरणप्पहाणा, ससमयपरसमयमुक्कवावारा ।
चरणकरणस्स सारं, णिच्छयसुद्धं ण याणंति ॥९१॥

१२० सामाइयं चिय जओ, उचियपवित्तिप्पहाणमक्खायं ।
तो तग्गुणस्स ण हवइ, कइया वि हु गरहणिज्जत्तं ॥९२॥

१३२ कामं सव्वपदेसुं, उस्सग्गऽववायधम्मया जुत्ता ।
मोत्तुं मेहुणभावं, ण विणा सो रागदोसेहिं ॥९३॥

१३४ रागद्दोसाणुगयं, नाणुट्ठाणं तु होइ णिद्दोसं ।
जयणाजुअंमि तंमि तु, अप्पतरं होइ पच्छित्तं ॥९४॥

१३७ जावइया उस्सग्गा, तावइया चेव हुंति अववाया ।
जावइया अववाया, उस्सग्गा तत्तिया चेव ॥९५॥

१३९ ण वि किंचि अणुण्णायं, पडिसिद्धं वा वि जिणवरिंदेहिं ।
एसा तेसिं आणा, कज्जे सच्चेण होअव्वं ॥९६॥

१४० दोसा जेण निरुज्झंति, जेण छिज्जंति पुव्वकम्माइं ।
सो सो मोक्खोवाओ, रोगावत्थासु समणं व ॥९७॥

१४३ बज्झकिरियाविसेसे, ण णिसेहो वा विही व संभवइ ।
जं सो भावाणुगओ, तयत्थमंगीकया जयणा ॥९८॥

६९ साभाविअं खलु सुहं, आयसभावस्स दंसणेऽपुव्वं ।
अणहीणमपडिवक्खं, सम्मद्दिट्ठीस्स पसमवओ ॥९९॥

७० तिमिरहरा जइ दिट्ठी, जणस्स दीवेण णत्थि कायव्वं ।
तह सोक्खं सयमाया, विसया किं तत्थ कुव्वंति ? ॥१००॥

७१ अंतरधारालग्गे, सुहंमि बज्झं पि सुक्खमणुवडइ ।
जह नीरं खीरंमि, निच्छयओ भिन्नरूवं तु ॥१०१॥

१८३ एवं जिणोवएसो, विचित्तरूवोऽपमायसारो वि ।
उचियावेक्खाइ च्चिय, जुज्जइ लोगाण सव्वेसिं ॥१०२॥

१९४ संबंधो कायव्वो, सद्धिं कल्लाणहेउमित्तेहिं ।
सोअव्वं जिणवयणं, धरियव्वा धारणा सम्मं ॥१०३॥

१९५ कज्जो परोवयारो, परिहरिअव्वा परेसिं पीडा य ।
हेया विसयपवित्ती, भावेयव्वं भवसरूवं ॥१०४॥

१९६ पुज्जा पूएअव्वा, न निंदियव्वा य केइ जियलोए ।
लोगोऽणुवत्तिअव्वो, गुणरागो होइ कायव्वो ॥१०५॥

१९७ अगुणे मज्झत्थत्तं, कायव्वं तह कुसीलसंसग्गी ।
वज्जेअव्वा जत्ता, परिहरिअव्वो पमाओ अ ॥१०६॥

१९८ छिंदिउमसुहविगप्पं, कोहाइकसायचायसुद्धीए ।
सहजं आयसरूवं, भावेअव्वं जहावसरं ॥१०७॥

२०१ किं बहुणा ? इह जह जह, रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टिअव्वं, एसा आणा जिणिंदाणं ॥१०८॥